SRI PRATAP COLLEGE

LIBRARY

Class No. 891·211

Book No. U49R

Accession No 3893



श्रीउमेशचन्द्र विद्यारत्नः ।

RIGVEDA SAMHITA

PART—I.

UPODGHAT PRAKARANAM

OR

SANSKRIT INTRODUCTION

BY

UMES´CHANDRA VIDYARATNA,

AUTHOR OF

Dvaivatakanda, Bhoumakanda, Manaver Adijanmabhumi (Original Abode of Mankind), Sarasvatakanda, Mandar-mala etc.

इदमहम् अनृतात् सत्यमुपैमि । यजुः

PUBLISHED BY

ASUTOSH DAS´.

CALCUTTA.

19, Sarkar's Lane, Simla, Kansaripara,

P. O.—Bara Bazar.

All rights reserved]

Price Rs. 2.

Cloth „ 2-8

Printed by—Amrita Lall Sircar,
AT the KATTAYANI PRESS.
39-1, Sibnarayan Das's Lane, Calcutta.

PREFACE.

TO THE INTRODUCTION TO THE VEDAS.

I state in the Introduction to the *Rig Veda* what I have come to learn and understand about the *Vedas* by studying for fifty-two years the Vedas themselves and other *Sastras* of the Hindoos. I must say this that my opinions do not tally with those of the etymologists and commentators whether they are of India or of other countries of the world. Let impartial and truth-loving savants judge whether I or the other *Vaidic* scholars are to blame for the discrepancies. I have made it easy for all to decide what is the true interpretation, by first setting forth the commentaries and opinions of other scholars and then stating my own commentaries, just in the same way as I have followed in interpreting the *mantras* of the Vedas ; there I have first given the commentaries of other scholars and then added my own *tika* or commentary with Bengali and English renderings of the same. From a perusal of the commentaries compiled in the above fashion, every one can understand why I have differed with other scholars.

In fact "It is we who are the first natives of this world." "The four *Vedas* are a great treasure produced in India, Heaven, Hell and Gods are spiritual entities" and such other mistakes are due to the ignorance of Indian scholars in the matter of correct philology and geography

and hence the Indian scholars have missed the mark in explaining the Vedas and other *Sastras.* Now, Sankar and other commentators considerd the "*Devayana*" and "*Pitriyana*" paths, by which students and merchants went to heaven on foot, as merely spiritual and hence imaginary ways leading to the spiritual realm where people went after their deaths. For this reason they have failed to interpret correctly "*The Vedanta Philosophy*", the *Upanishats*, and the *Gita* and *Manu*. Hence though there have been written in India and Europe several dictionaries, in the compliation of which researches in the *Vedas* and philology have been utilised, yet the want of a full and correct dictionary is urgently felt now. The modern etymologist Yaska has followed the old etymologists Sakapuni, Aurnanabha and others and Vedic dictionary writers. But these ancient etymologies and dictionaries are so rife with mistakes that Yaska has missed the point by following them. It is a fact that Sayana, who is extremely modest, says, तस्मात् वेदार्थविबोधाय उपयुक्तं निरुक्तम् i. e. 'for the purpose of understanding the Vedas, the Niruktas or the etymologies of Yask are the true means". But Sayana does not really adhere to this opinion. If it were so, then, why does he differ from Yaska and almost always gives independent interpretations of his own ? Really the old dictionaries are incomplete and useless as those of Yaska and others of his class. There is some truth in the old dictionaries (the *Nighantoos*) but the etymologies of Yaska and others are absolutely useless.

Sayana's commentaries on the *Vedas* are the best. Yet there are several mistakes in his commentaries, as they were the interpretations given by himself and by about a dozen of his pupils who were not criticised and thus the errors were not rectified, Inspite of the errors, I must say, that two or three of his disciples have given so consistent

and Judicious interpretations, that I feel inclined to put the dust of their feet on my head. On the other hand, some other pupils of Sayana have given so erroneous interpretations that they must be as cautiously and critically accepted as those of Yaska, Sakapuni, Aurnanava, Sankaracharyya and others. Sankar has written commentaries on ten or twelve *Upanishads*. This tradition is current. But from the examination of facts, I think that Sankar really wrote commentaries on the *Brihadaranyaka Upanisat* and the *Vedanta philosophy* only. There are mistakes in these commentaries also, yet they are *eight annas* (half) correct. That Sankara or may be a disciple of his, who has written the commentary on the *Gita* is much less correct, (only one half of his commentary may be accepted). Those disciples of Sankara who have written commentaries on the *Chhandagyopanisat* are equally wrong. It must be admitted, however, that the commentaries of Sankara on the *Prasnopanisat* are excellent in many places. The interpretations of Medhatithi and others on *Manusamhita* are the best on many passages and again, erroneous in other places. For these reasons I have undertaken, after studying the Vedas for more than half a century, to write a commentary on the Rig-veda with a Bengali translation. Though I am an old man, seventy-one years old now, I have a mind to write a commentary on *Manu*, a dictionary in Bengali, and another in sanskrit, before I take leave of this world.

In this Introduction I shall discuss the following points : whether the *Vedas* are eternal or ephemeral truths ; whether they were written by men or revealed by God ; when and how they were produced ; whether the first book of mankind viz, the *Shamveda* was written in Mongolia ; whether the birth place of the *Rigveda* and *Atharva Veda* was India ; whether the *Yajur Veda* was written in Antariksha, i. e.

Turkey, Persia, Afganistan ; in what order were the *Vedas* written ; what is the age of the *Vedas* ; critcism of the commentaris on the *Vedas*, and a geographical account of the places mentioned in the *Vedas*. No other scholar has hitherto written an introduction containing so deep researches into the above points. My introduction itself is a book. It will give an account of the real history of the *Vedas*.

Owing to financial difficulties I am not in a position to do my work satisfactorily. Our native princes and chiefs do not care for scholarship and learning, and therefore they are not in the habit of helping the genuine *Pandits* of our own country. I have travelled over whole Aryavarta but could not have an interview with any Raja or Maharaj. There are some natives chiefs who are educated and enlightened, but things are arranged in such a way in their courts that it is impossible for people of my class to get access to them. Is it not a wonder that in the very same country,where once a Vikramaditya or a Bhoja Raja or a Samudragupta so munificenlty patronised their"Navaratna"or nine gems or"Pancharatna"or five gems, whose discussions on literature,and *Vedas* filled the whole court,the doors of the kings are closed against pandits ?

I require for the publication of my commentary on the *Rig Veda* thirty thousand Rupees. The Bombay edition of the *Rig Veda* which contains only the commentary of Sayana cost Rs. 18000. My edition will contain the commetaries of Yaska, Uvata, Mohidhar, Sayana, Dayananda, Ramanath Saraswati, R. C. Dutt etc. in addition to my own commentary and Bengali translation. I shall add also an English translation of my own interpretation. Hence it will be a very costly affair. I appeal therefore to people of all classes to extend their charity to me and thus to enable me to bring out my book. I think when my edition of the *Vedas* will see the light a great revolution in

the literary world will happen. People will see that the sanskrit literature is not a repository of refuges, but it is a treasure for the whole civilized humanity, containing, as it does, an unlimited amount of knowledge. People look down upon the *Vedas* as mere simple songs of peasants, because the true meanings of the *Vedas* have not yet been explained.

By the way, I have to refer to a few savants such as Max Muller, Grassman, Ludwig and others. If they had not published the *Vedas*, we should have remained quite ignorant of them, and have known nothing beyond their names. The European scholars therefore deserve too many thanks from us. But for the sake of truth, I am constrained to say that they also have fallen into errors by following Yaska and the Nighantoo (dictionary of the *Vedas*). I believe that if they studied the principal works in the *sastras* of the Hindus freely and independently, then they would arrive at correct meanings. Mr. Wilson after quoting the opinion of Roth says :—

"Therefore we do not believe, as H. H. Wilson does, that Sayana better understood the expressions of the Veda than any European exegete ; on the contrary we believe that a conscientious European exegete may understand the Veda much more correctly and better than Sayana. We do not consider it the (our) immediate purpose to obtain that understanding of the Veda which was current in India some centuries ago, but we search for the meaning which the poets themselves gave to their songs and phrases. We consequently hold that the writings of Sayana and of the other commentors must not be an authority to the exegete, but merely one of the means of which he has to avail himself in the accomplishment of his task. We have therefore endeavoured to take the road which is prescribed by philology, to

elicit the sense of the texts by putting together all the passages which are kindred either in regard to their words or their sense. The purely etymological proceeding, as it must be followed up by those who endeavour to guess the sense of a word, without having before them the ten or twenty other passages in which the same word recurs, can possibly lead to a correct result." Rudolph Roth's preface to his great sanskrit-Worterbuch.

I do not see my way to approve of what is said in the above extract, because, though the European savants command a knowledge of comparative philology and the historical method, yet they labour under some disqualifications and prejudices which stand in their way of explaining the *Vedas* corretly. Sayana and his disciples were in intimate touch with the religious beliefs and traditions of the Hindoos, which no European scholar, however profound and vastly learned he may be, can claim. It is an admitted fact that native scholars are far better equipped to appreciate their own things than foreigners, however shrewd they may be. The commentaries of Sayana and his disciples I find to be much more correct than those of the European scholars. The errors of the Hindu Scholars were due to the fact that they believed Swarga (heaven) and Narake (hell) as spiritual or Antariksha (gagan) as the sky. They further mistook by thinking that the four *Vedas* were composed in India and the Hindoos were autochthones of the land. European scholars have erred by taking Swarga etc. as spiritual things following the Hindoos and the four *Vedas* as composed here, though they have found out that the Hindoos had come here from central Asia. They have further strayed from the right track by supposing that Sanskrit is a sister of the other Indo-European languages. But I believe on the

contrary, and am convinced by studying the *Vedas* and other *Sastras* and by deep research into philology that *Sanskrit was the mother of all other Indo-European languages. And all the Aryan people of Europe, Africa America and Asia after settling in India, coming from Mongolia, migrated to other countries such as Mesopotamia, Babylonia, Asia Minor, Egypt, Arabia, Greece, Italy, Germany etc. Even the people of China, Japan Burma, Siam and adjacent islands migrated to their new homes from India.* If European scholars had truly understood the *Vedas* and other *Sastras* of the Hindoos, they also would have arrived at the same conclusion. They started with wrong hypotheses, viz, that one branch of the Aryans passed over to Europe through the Caucasus region and another branch came southwards to Iran and then quarrelled and divided into two groups, one of which came to India and the other remained there. This is a fundamental mistake, because when the Devas (Brahmins i. e. people who knew the *Vedas*) having left *Swarga* through the opposition of the *Daityas* and *Danavas* (the Red Indians of America) came to India singing the psalms of the *Shama Veda*, at that time neither Siberia (Dyuloka) nor Turkey, nor Persia, nor the whole of Afghanistan, nor Arabia, nor Africa, nor Europe, (Hariupia, vide V. 27, 6 Mandal, *Rig Veda*) was in existence. They had not as yet been upheaved from the bottom of the sea.

If the European and our native commentators Yaska, Sayan and others, really understood the *Vedas*, they would not have taken, 'Dyava Prithivi' (Mongolia and India) and Antariksha (Turkey, Persia and Afghanistan) in a spiritual sense; neither would they have taken the Aswinikumaras in the sense of dawn and dusk. They were really physicians and two priests among the Devas (the educated people of

Mongolia). They have also made mistakes by taking Indra as the Rain-God and the Devatas as imaginary beings,having no real existence. Really these Devas were the ancestors of all the Aryan people. There are many other historical and geographical points which neither Indian nor European scholars have correctly understood. They have been pointed out clearly in the body of this Introduction.

I think that all the Vaidic as well as other dictionaries that have been compiled in India and Europe on sanskrit are full of errors, because the foundations on which they are based viz, Yaska's commentary, *the Brahman* (commentary on the *Vedas*) and *the Bhashyas* (commentaries) of others are all erroneous. Hence the compilation of new dictionaries is urgently needed in the interest of true scholarship.

Erratum

Page	Line	What is	What ought to be
1	15	With	from
2	3	Considerd	Considered
2	9	Compliation	Compilation
2	18	Yask	Yaska
2	28		
3	1	Judicious	judicious
3	10	or may	or it may
4	2	critcism	criticism
4	2	commentaris	commentaries
4	12	natives	native
4	16	munificenltv	munificently
4	22	commetaries	commentaries
5	25	commentors	commentators
6	4	the	the
6	12	corretly	correctly

सूचीपत्रम् ।

Preface 1-8

१। मङ्गलाचरणम् १

२। कथं प्रकृतार्थवाहिनी प्रणीयते ? ६

३। अथ वेदोत्पत्तिकथनम् १७

देवा मन्त्रप्रणेतारः २६

ऋषयो मन्त्रप्रणेतारः ३०

राजानो मन्त्रप्रणेतारः ३२

पारशवपारशवीशूद्राः—मन्त्रप्रणेतारः— ३३

४। वेदा नित्या न वा ? ३७

के अक्षराणामुद्भावयितारः ३७

वेदानां नूतनत्वप्रदर्शनम् ४२

भाषाया उत्पादका देवाः ४४

५। वेदा अपौरुषेयाः पौरुषेया वा ? ४४

सर्वेषां मतखण्डनम् । वेदे भ्रमप्रमादाः हिंसाद्वेष संशयाः वेदेषु भौगोलिक प्रमादाः । वयाण पित्रयाण पयसो भौमत्वम् । द्योव्योमाकाशादीनां च भौमत्व

६। वेदानामुत्पत्तिस्थानम् ७३

संस्कृतभाषाया उत्पत्तिकथनम् ७३

७। अथ वेदविभागः ८२

अष्टाविंशति व्यासानां नामकीर्त्तनम्— ८३

सामादिवेदानां लक्षणम् ८५

ऋग्वेदशाखाविभागः ८६

यजुर्वेदशाखाविभागः ८८

सामवेदशाखाविभागः ... ... ऐ

अथर्ववेदशाखाविभागः ८८

८। वेदानां पौर्वापर्य्यम् ९०
पाश्चात्य मतखण्डनम् १००
९। वेदानां वय:क्रम: १०४
वेदानां ग्रन्थाकारे परिणति: १०५
राजतरङ्गिणीमत—खण्डनं १०८
बङ्किमचन्द्रस्य मतखण्डनम् १०८
बाइबेलग्रन्थस्य प्रवरजत्वम् ११२
सृष्टे विवर्त्तनवाद: ११३
म्याकडोलाण्डमतखण्डनम् ११४
१०। व्याख्याप्रकरणम् १२१
क। उपनिषत् १२१
ख। ब्राह्मणम् १२१
ग। आरण्यकम् १२४
घ। षडङ्गकथनम् १२४
ङ। पुराणं १२८
च। के के वेदभाष्यकारा: १२८
११। व्याख्यासमालोचना १४०
यास्कादीनां भ्रमप्रदर्शनम् १४१
सायणदयानन्दादीनां प्रमादप्रदर्शनम् ... १५०
माक्षमूलरादीनां भ्रमप्रदर्शनम् १५४
अघमर्षणमन्त्रव्याख्यायां हलायुधसायणयो: ... १५४
मनुसंहिताव्याख्यायां मेधातिथिप्रभृतीनां ... १६०
पाश्चात्यानां प्रमादप्रदर्शनम् ... १६२
ऐतरेयब्राह्मणादीनां १६८
हाउगकुह्नादीनाम् ... ... १७० पृ
रामेन्द्रसुन्दरत्रिवेदिन: ... ... ऐ
अथ भाषातत्त्वविद्याया लाघवप्रदर्शनम् ... १७२
१२। अथ भौगोलिकप्रकरणम् १७४

द्यावापृथिवी अन्तरीक्षं किं ? ऐ
यज्ञ: किं ? द्यौ: किं ? १७८
देवताब्राह्मणयो रभिन्नत्वम् १८१
अथ पुष्करशब्द: १८२
अथ व्योमशब्द: १८३
अथ आकाशशब्द: १८५
पितृलोक: १८८
शङ्करभाष्यदूषणम् १९०
भू: पृथिवी भारतवर्षम् १९२
द्यावापृथिवी १९५
पाणिने: प्रमादप्रदर्शनम् १९६
द्यावापृथिव्यो: प्राचीनतमत्वम् १९९
अथ भुवर्लोक: अन्तरीक्षम् २००
अथ भारतवर्षात् वरुणयुताना (Teuton) दीनाम्
अन्तरीक्षे गमनम् २०५
अथ पार्श्वाना मिराणे गमनं २०९
शका अनार्य्या न २१५
तुरुष्कपारस्यादय: अन्तरीक्षम् २१७
अथ दिव् (Sibiria) २१८
अथ दिव उत्पत्ति: २२०
पुन रघमर्षणव्याख्या ... ... ऐ
नरचन्द्रसूर्य्यौ २२७
त्रिदिवानां विशेषविवरणम् २२७
त्रिस्रोद्भाव: २२८
अन्तरीक्षादीनां त्रित्वम् २२९
पञ्चामृतानि ... ... ऐ
सप्तभुवनानि ... ... ऐ
चतुर्दश भुवनानि २३०
ईउरोपकशियातथ्यम् २३१
सधस्थ २३२

अशुद्धिशोधनम् ।

अशुद्ध	शुद्ध	पृ पं
वध्यतां	वध्यतां	४। ७
लुब्ध	लुब्ध	
दुर्व्वलानां	दुर्व्वलानां	६। ७
उद्घाटयितं	उद्‌घाटयितुं	७। २
सर्व्वथैव	सर्व्वथैव ।	८। शेष
सायोनी	सयोनी	११। ४
मातुर्गभे	मातुर्गर्भे	१२। २
सयोर्नी	सयोनी	१३। ४
दिव+सूप्	दिव्+सु	१४। १८
लज्जिता	लज्जिता:	१५। ८
तत: सुप्	तत: सु	१६। २१
सर्व्वं हुत:	सर्व्वहुत:	१८। १
द्वारेणवेदा:	द्वारेण वेदा:	२०। १०
वक्तु	वक्तुं	२१। ८
मतीय	मतीव	२२। ४
वैश्यानरं	वैश्वानरं	२२। १०
हविषां	हवि:	२२। १५
उपास्य	उपास्य:	२२। १७
ब्रहस्पति	बृहस्पति	२६।२-४
प्राय्यै:	प्राथ्यै:	२८। १६
उपिजो	उपिज:	३२। शेष
ऋषि	ऋषि	३३। २२
सुविस्तच	सुविस्तच	३५। ३
निस्मत्वं	निस्वत्वं	३८। २७
नतनेभि:	नतनेभि:	४३। १४

वस्तुतस्तु:	वस्तुतस्तु	१४। १४
पुनर्युक्ति	पुनर्युक्ति	४७। ६
साधना	साधूना	५३। ८
वह्नो	वह्नो	६३। ६
द्यो+सुप्	द्यो+सु	६३। पादटो
हसात् सुप्लोप:	हसात् सोर्लोप:	ऐ
दिव्+सुप	दिव्+सु	६६। १-२
अरणी	अरणी	६६। २१
अहोरात्रौ	अहोरात्रौ	६८। ८
आतन्वयाते	आतन्वाते	७१। ८
स्तभि	स्तृभि	७१। २८
सरा	सार	७६। २६
त्रयौ	त्रयो	८२। १७
भरद्वाजास्तु	भरद्वाजास्तु	८३। १४
स्वयम्भुवा:	स्वयम्भुवा	८३। टि
श्रयते	श्रूयते	८५। २८
माण्डक	माण्डूक	८८। ३
जातक	जातकम्	१०३। ४
प्रास्यदन्त	प्रास्यन्दन्त	११४। १५
घेतन	घृतेन	११७। २७
सव	सर्वं	१२०। १
प्रेति:	प्रेति	१२५। ५
मलम्	मूलम्	१२८। २८
कविराजाख्यां टीकामपि	कविराजाख्या टीकाऽपि	१३६। १०
स्नूना	सूनुना	ऐ१ २
व्याखरणं	व्याकरणं	ऐ; १४
रत्नमाला तथा	रत्नमाला	ऐ। १५
प्रणिनिन्थिरे	प्रणिन्यिरे	ऐ। २३
अवदीयो	अस्मदीयो	१३७। १८
रोमकसिन्दान्तो	रोमकसिद्धान्त:	ऐ। १८

केपामपि	केषाञ्चिदपि	१४०। २६
चक्र	चक्र	१४४। ५
भामेति	भासेति	१८६। ४
वैतेन	वै तेन	ऐ
०रिहाराय	परिहाराय	१५३। १९
स्व किं	स्व: किं	१६०। १६
साम्राख्ये न	सामान्ये न	१६१। १६
चतुर्विंशति	चतुर्विंशति	१७३। ५
कर्णे मेंघाम्बुनां	कर्णे मेंघाम्बुनां	१७४। ७
रिला	इला	१७९। ८
यशों भूत्	यशोऽभूत्	१८४। २३
तद्दारा	तद्द्वारा	१८६। २०
भातन्वशाते	भातन्वाते	१९९। ९
दीरेव	द्यौरेव	२००। ११
स्थालन	स्खलन	ऐ। २१
निर्द्वंद्या	निर्द्वंद्यो	
धलिशून्य	धूलिशून्या:	२०३। २८
अभिनिष्ट	अमनिष्ट	२०८। २३
बलात्	बलात्	२२१। १४
यद्या	यदा	२२२। १२

राय श्री पार्व्वती शङ्कर चतुर्वेद, रीवा

ऋग्वेदसंहिता ।

ब्राह्मणग्रन्थ-तद्व्याख्यया वेदाचार्य्ययास्ककृतनिर्वचनैः

शङ्करोवटसायणमहीधर

दयानन्दसरस्वतीकृतभाष्यैः समलङ्कृता

तथा

श्रीउमेशचन्द्र विद्यारत्नकृतया

प्रकृतार्थवाहिनीतिनामटीकया च

उपलक्षिता

ढाकान्तर्गत तेओतेति प्रसिद्ध

नारायणपुर वास्तव्य

वदान्यवर राय श्रीयुक्त पार्वतीशङ्करचतुर्धुरीणमहाशयस्य

व्ययेन मुद्रिता संखेयम् ।

तेओतानगराधिवासिभिषजां योऽग्रेसरः सद्गुणे,
यः सद्धर्मरतः सदैव च तथा सत्यानुरागी भृशम् ।
पार्व्वत्याश्चरणारविन्द मधुप श्रीपार्व्वतीशङ्कर
रायस्यैव कृपागुणेन प्रथमा संख्येयमामुद्रिता ॥

कलिकाता-राजधान्यां

६७, शिमलाष्ट्रीटस्थितात् सारस्वतगेहात्

श्रीआशुतोषदासद्वाराप्रकाशिता ।

प्रत्येकखण्डस्य मूल्यमेकरौप्यकम् ।

Printed by Manmatha Nath Ghose at the
Ghosh-Machine-Press
38, Sibnarayan Dass Lane,
CALCUTTA.

ऋग्वेदसंहिता।

[प्रकृतार्थवाहिनी टीका]

उपोद्घात-प्रकरणम्।

नत्वा परब्रह्मपदारविन्दं
श्यामाधवं धौतमलं मुनीन्द्रम्।
चैतन्यचन्द्रं चरितावदातं
व्याख्यायते मन्त्र ऋचां मयाद्य ॥ १ ॥

व्याख्याता बहुभिः पुरा बुधगणैर्वेदादयो यद्यपि,
वन्द्यास्ते जगतां तथापि च पुनर्व्याख्यातुकामा वयम्।
क्वासौ शङ्करसायणोवटमहीमिधादिविद्वद्गणः,
क्व क्षुद्रा ननु मादृशास्तनुधियो कुत्रापि लुब्धं मनः ॥ २ ॥

ततो व्याख्या कार्य्या कथमपि मया साम्प्रतमहो,
मुधा मोघाशेन प्रथममधिकृतैव सहसा।
न किं दृष्टे मुक्तामणिमरकतैः सार्द्धमवरो
वराटोऽपि व्यस्तो वसति वत कक्षासु सततम् ॥ ३ ॥

वेदानां न च पाठना प्रतिहतः स्वाध्याय एवाधुना,
ये केचित् यदि वा पठन्ति न च ते तात्पर्य्यबोधोत्सुकाः।
अर्थानामवबोधनाय यदि वा चेष्टन्त एवापरे,
संस्कारान्धतया त एव च परां यान्ति प्रतीपां दशाम् ॥ ४ ॥

पाश्चात्या बहवः पठन्ति विपुला बुद्धिश्च तेषामहो,
ईर्षा चापि महीयसी फलविधौ लिप्सा च तीव्रा तथा।

किन्त्वेते ननु यास्कबुद्धिविकला: स्वैरादपि प्रायशो
बोद्धुं नालमहो श्रुतिस्मृतिकथां तस्मादियं मे स्पृहा ॥ ५ ॥

यति व्याख्या लोके भवति खलु तासां हि महती,
गुणैर्वा द्रव्यैर्वा विशदवचना सायणकृता ।
ततो नान्य: पन्था: सरणिरिव सेयं त्वनुसृता,
मणौ वज्रैर्भिन्ने गतिरिह हि सूत्रस्य भवतु ॥ ६ ॥

सविनयमितिवादी बध्यतां मा जनोऽयं
भवति हि गुणलुब्ध: पक्षपाते विहीन: ।
वदति यदि कनीयान् सूक्त मादेय मेतत्
तृणमिव परिहार्य्यं युक्तिहीनञ्च धातु: ॥ ७ ॥

सद्यो वा बहुवासरात् किमथवा चात्रैव तत्रैव वा,
एवं केऽपि बुधा भ्रवश्यमुदयं प्राप्स्यन्ति सन्त: क्षितौ ।
ये सज्ज्ञा न च युक्तिवादबधिरा नान्धा न बन्ध्या नये,
मन्यन्ते बहु वा मनागपि न ये भाष्यादिकं मूलत: ! ॥ ८ ॥

भौगोलिकज्ञानविहीनताया:
तथैव भाषाविषयेऽल्पबोधात् ।
पौराणिकानामपि चानुगत्यात्
प्रमादमापा ननु भाष्यकारा: ॥ ९ ॥

निर्म्मीयते मे प्रकृतार्थवाही,
टीका तदेषा सुधियां मुदाये ।
विचार्य्य सम्यक् च गुरुत्वमस्य
भवन्तु सन्त: क्षमयावदाता: ॥ १० ॥

किं ब्रूमोऽस्मिन् जगति कृतधिया मत्त: क्षुद्रबोधा: ।
चन्द्रालोके वदत किमु रुचिं ज्योतिरिङ्गो हि धत्ते ।
पीत्वा वाचा ममलममृतकं स्वादु साधु त्वमीषां,
क: स्यात् तृप्तो वचसि मधु विना तित्तिडीं क: स्वदेत ॥ ११ ॥

आसीद्द विमानो ननु कामगामी
त्रिचक्रयाणादिकमेव तद्दत् ।

वाष्पीयपोतः शकटं तथैव
अनेकघाती पवि रायसस्त्र ॥ १२ ॥

तेषाञ्च केचिन्ननु यामवाह्याः
केचिच्च हस्तैरपि हन्त धार्य्याः ।
वार्त्तावहो वैद्युतिकश्च सुष्टु
वेदेभ्य एतत् सकलं लभेरन् ॥ १३ ॥

तथास्ते वै देवासुरनरगणानां स्फुटकथा
तथा धर्म्माधर्म्मस्य च विवृतिरास्ते प्रथमतः ।
अतो ह्येते कल्पद्रुम इवैव प्रतिदिनं
समाराध्या भक्त्या नवनवफलाकाङ्क्षिभिरहो ॥ १४ ॥

धन्या भारतवासिनः क्षितितले येषां हि वेदा धनं
येष्वास्ते विवृतं महन्ननु पुरातत्त्वादिकं दुर्लभम् ।
नानारत्न-निधानमेष उदधि र्दुर्गाह एवाधुना
अस्पष्टाविलतां गतं मुहुरहो आलोड़नात् स्वैरिणाम् ॥ १५ ॥

अविज्ञेया मन्त्रा न पुनरिह कोशा हि विशदाः
समीचीना व्याख्या न पुनरपि टीकाप्रभृतयः ।
महान्तो नो येषां प्रकृतपथभासाः क्व नु वयं,
इदानीं भोः शम्भो भवतु पदयुग्मं तव तरी ॥ १६ ॥

सकलभुवनमध्ये ह्येष वेदो महार्घो
न खलु किमपि यस्मात् प्रत्नमास्ते धरित्र्याम् ।
भरतविषयवासी गर्वितो यत् प्रभावात्
प्रणमति नतमूर्द्धोमिश्रचन्द्रस्तमेव ॥ १७ ॥

श्रीकालियानगरनागरचक्रवर्त्ती
तत्त्वार्थविद् विपुलतन्त्रपुराणवेत्ता ।
आसीदशेषगुणसागरसत्यसिन्धु-
रीशानचन्द्र इति वैद्यकुलावतंसः ॥ १८ ॥

तदङ्गजेषु प्रथितः कनीयान्
उमेशचन्द्रो ननु दासशर्म्मा ।
नागेन्दुनेत्रेन्दुमिते शुभेऽस्मिन्
निर्म्माति शाले प्रकृतार्थवाहीम् ॥ १८ ॥

सत्स्वपि बहुषु भाष्यव्याख्यानेषु ब्राह्मणोवटशङ्करसायणप्रभृतीना माचार्य्य-गोष्ठीनां महात्मनां दयानन्दसरस्वतीप्रभृतीनामपि कथमियमीहा पुनर्व्याख्याप्रणयने क्षुद्रशेमुषीणा मस्मादृशां ज्ञानदुर्व्वलानां बोधविधुराणां वालानां सप्ततिपरवृद्धानां ? क्व वेदमहामहीरुहस्य अभ्रङ्कषशेखरस्य उत्तानतेयं प्रांशोरपि अनधिगम्या, क्व च वयं निसर्गपङ्गवो वामना अहो ! को महाध्वानेषु निष्फलेषु देवदुन्दुभेर्वराको डमरु' वादयित्वा कुम्भकर्णस्येव प्रसुप्तजगतो जागर्त्तिसम्पादने विफलं चेष्टते वा ? सत्यपि एवं तु बलवती बुभुत्सा महती परोपचिकीर्षा च मां स्थविरं नितरां चपलयति मुखरयति च । यद्यहं महेतिहासवेदमहार्णवात् ऐतिह्य-रूपं महारत्नजातं समुद्धृत्य करालमकरकुम्भीरदंष्ट्राविक्षतदेहोपि वेदपीयूष-पिपासूनां सहृदयानां स्वदेशवासिनां विभिन्नदेशविदेशवासिनाञ्च कियन्तमपि परितोषं जनयितु' किमपि अलमभविष्य', तर्हि मया किं न कृतमभविष्यत् ? अथवा साधुभिरिदमुक्त'—

"यत्ने कृते यदि न सिध्यति कोऽत्र दोषः"

पूर्वं तावत् नितरां दरिद्रा वयं । मुद्रणकार्य्यञ्च पुनर्बहुधनसाध्यं, धनवतां तु नीरन्ध्रकर्णकुहरे प्रविशति नास्माकं अरण्ये रोदनध्वनिरयमुच्चैः । अथ हृदयवतामपि सामाजिकानां करुणाकणलाभे वञ्चिता वयं सुराविधर्म्माणः स्वतन्त्राः, ये सिंहादपि शार्दूलादपि वा न विभ्यति, के वदत तेषु सदया भवेयुः साहसिकेषु मादृशेषु । अथवा यदि

"सत्यमेव जयते नानृतम"

तर्हि अद्य वा सद्यो वा अस्मिन् युगे वा युगान्तरे वा प्रसादसुन्दरमति-रेकोऽपि मे कश्चित् सज्जनः श्रमं सफलीकरिष्यति इति आशास्महे ।

"महार्णवस्य आटलाण्टिकस्य पारो नास्ति नास्त्येव"

इति स्थिरीकृत्य गृहे तूष्णीं स्थितानां चेत् एकस्यापि हृदयलौहकपाट मुद्घाटयितुं समर्थोऽभविष्यं तर्हि जीवनं मे धन्यं सफलञ्च खल्व भविष्यदिति ।

किं पादाहृति रेतेषां विपचाणां करिष्यति ।
वाणी साचात् प्रसन्ना चेत् सर्वसन्तापहारिणी ॥

द्वापञ्चाशद् वर्षाणि व्याप्य गभीरगवेषणया नक्तन्दिवं मया तु एतदेव बुद्धं यत् अस्मिन् सकलदेशविदेशमुकुटमणौ भारतवर्षे जगतां ज्ञानविज्ञान सभ्यताभव्यतानिदानभूते जगदध्यापकशिचादीचागुरुब्राह्मणभूयिष्ठे, अन्यत्र वा इरियूपीयादिमहाजनपदे नवज्ञानालोकसमुज्ज्वले पुरातनै रर्वाचीनै र्वा मनीषिभि र्वरेण्यै र्वेदानां या या व्याख्याः कृताः—तास्ता स्तु न खलु सम्यक् समीचीना दोषपरिशून्या वा। न ता नूनं विवादविषयतां सर्व्वांशेन अतिक्रान्तवत्य इति प्रतीयते मारव्यात्। यतः पूर्व्वं तावत् बहुदिनादारभ्य अस्मिन् भरतविषये वेदादीनां पठनपाठनादिकं विलुप्तमासीत्। यदुक्तं महर्षिणा वायुना—

संचोभो जायतेऽत्यर्थं कलिमासाद्य वै युगम् ।
नाधीयन्ते तदा वेदा न यजन्ते द्विजातयः ॥ ३८—५८ अ
शूद्राश्च ब्राह्मणाचाराः शूद्राचाराश्च ब्राह्मणाः ॥

न केवलं कलियुगे, परन्तु त्रेतायुगस्य शेषांशादेव वेदस्य अध्ययनाध्यापने विलुप्तप्राये अभवतां, तेनैव बहुषु वेदमन्त्रेषु नाना भ्रान्तिप्रमादाः प्रविष्टाः। तद्भ्रान्तिवशादेव द्यौदिवौ रेकत्वं जातं गगनलच्च बभूव, ते पारलौकिके इति च प्रमादः लब्धावसरः, आदिस्वर्गद्यौः पिता पितृलोकश्च क्रमेण प्रेतलोकत्वमाप। यदा तु भारतवर्षीयाणां विस्मृति र्न सञ्जाता—तदा कश्चिदृषिरेवं वक्ति—

द्यौर्नः पिता जनिता नाभिरत्र
बन्धुर्नो, माता पृथिवी महीयम्।
उत्तानयोश्चम्वो र्योनि रन्तः
यत्र पिता दुहितुर्गर्भमाधात् ॥ अथर्व वेदः
नः इत्यत्र मे ऋचि पाठः इति। २२—१६४सू—१म।

तत्र यास्कनिर्व्वचनम्—द्यौर्मे पिता माता वा पालयिता वा जनयिता—

नाभि रत्र बन्धुर्मे। माता पृथिवी महतीयं बन्धुः सम्बन्धनात्, नाभिः सन्नहनात् नाभ्या सन्नद्धा गर्भा जायन्ते इत्याहुः। एतस्मादेव ज्ञातीन् सनाभय इत्याचक्षते। सम्बन्धव इति च ज्ञातिः संज्ञानात्। उत्तानयोश्चम्वोर्योनिरन्तः— उत्तान उत्ततान ऊर्द्ध्वतानो वा। तत्र पिता दुहितुर्गर्भं दधाति, पर्जन्यः पृथिव्याः।

सायणभाष्यम्—दीर्घतमा ब्रवीति, मे मम द्यौः द्युलोकः पिता पालकः न केवलं पालकत्वमात्रं अपि च जनिता जनयिता उत्पादयिता तत्र उपपत्ति-माह—नाभिरत्र नाभिभूतो भौमो रसः अत्र तिष्ठति इति शेषः। इतश्च अन्नं जायते, अन्नात् रेतः, रेतसो मनुष्य इत्येवं पारम्पर्य्येण जननसम्बन्धिनो हेतो रसस्य अत्र सद्भावात्। अनेनैव अभिप्रायेण जनिता इत्युच्यते। अतएव बन्धुः बन्धिका। तथेयं मही महती पृथिवी मे माता, मातृस्थानीया, स्रोऽरूतौषध्यादिनिर्मात्री इत्यर्थः। किञ्च उत्तानयोः ऊर्द्ध्वतानयोः चम्वोः सर्व्वस्य अन्नोर्भोगसाधनयोर्द्यावापृथिव्यो रन्तर्मध्ये योनिः सर्वभूतनिर्म्माणाश्रय मन्तरीक्षं वर्त्तते इति शेषः। अत्र अस्मिन् अन्तरिक्षे पिता द्युलोकः अधिष्ठातधिष्ठानयो-रभेदेन।

आदित्यो द्यौरुच्यते।

स स्वरश्मिभिः अथवा इन्द्रः पर्जन्यो वा दुहितुर्दूरे निहितायाः भूम्याः गर्भं सर्व्वोत्पादनसमर्थं वृष्ट्युदकलक्षणम् आधात् सर्व्वतः करोति।

दयानन्दभाष्यम्—द्यौः प्रकाशमानः सूर्य्यः विद्युदिव मे मम पिता जनिता नाभिः बन्धनम् अत्र अस्मिन् जन्मनि बन्धुः भ्रातृवत्प्राणः मे मम माता मान्य-प्रदा जननी पृथिवी भूमिरिव मही महती इयं उत्तानयोः उपरिस्थयोः ऊर्द्ध्वं स्थापितयोः पृथिवीसूर्य्ययोः चम्वोः सेनयो रिव योनिः गृहम् अन्तः मध्ये अत्र अस्मिन् पिता सूर्य्यः दुहितुः उषसः गर्भं किरणाख्यं वीर्य्यम् आ अधात् समन्तात् दधाति।

দত্তজানুবাদঃ—(পণ্ডিতেন শ্রীমতা আলোকনাথন্যায়ভূষণেন অনূদিতঃ) স্বর্গ আমার পালক ও জনক (পৃথিবীর) নাভি আমার বন্ধু এবং এই বিস্তীর্ণা পৃথিবী আমার মাতা। উত্তানপাত্রদ্বয়ের মধ্যে যোনি আছে। তথায় পিতা দুহিতার গর্ভ উত্পাদন করেন।

"न ब्रूयात् सत्यमप्रियम्" इति महाजनवाक्यं सर्व्वथैव शिरोधार्य्यं, परन्तु

सत्यनिर्णयनविधौ मौनमपि न खलु कदापि सर्व्वदा प्रशस्यते साधारणानां स्वार्थ-संरक्षणार्थमेव। एतेषां निरुक्तिभाष्यानुवादानां अक्षरार्थपरिग्रहे न कश्चिदेव समर्थः स्यात्। यः स्वयं न बुध्यते, स कथं अन्यान् बोधयितुं समर्थो भवेत्—

"स्वयमसिद्धः कथं परान् साधयति"

केवलं वृथा वाग्जालडम्बरेण एते निरुक्तभाष्यानुवादाः स्फीतीभूताः। एतेषां माभिर्व्याख्याभिः न कोऽपि मन्त्रस्य प्रकृतार्थबोधे समर्थोऽभूत्। यास्कस्तु यत् किमपि व्याख्यातवान् तस्य पदार्थग्रहो न भवति, एवं सायण दयानन्दयोर्भाष्ये अनुवादस्य दत्तानां न मानवबुद्धिबोधगम्या इति।

दीर्घतमा एतस्य सूक्तस्य समाहर्त्ता, न तु प्रणेता। अतएव स वक्ता इति न। द्यौ द्युलोकः इति च प्रमादः, परन्तु द्यौ रादिस्वर्ग इलावृतवर्षं (मङ्गलिया)। "पिता—पालकः" इति च न, परन्तु "पितृलोकः"। नाभिः सन्नहनम् इति च न, परन्तु उत्पत्तिः, उत्पत्तिस्थानं वा। दुहिता—कन्यास्वरूपा अन्तरीक्ष भूमिः, यतः पितुः द्योर्मातुर्भारतवर्षस्य च मनुष्यदेवाः अन्तरीक्षं गत्वा उपनिविविशुः।

द्यौः—जड़सूर्य्यः इति च महान् प्रमादः,प्रमाणाभावात्, वेदविरोधाच्च।

"द्यौरादित्योभवति"

इत्यस्याः श्रुतेरव मेव अर्थः यत् द्यौः आदिस्वर्गः, अदितिनन्दनसूर्य्यस्य इति। सूर्य्यस्तस्याः शास्ता आसीत् यमसोमादिवत्। नाभिः—बन्धनम् इति च न ("सानो नाभिः—४।१०।१०म) किमित्यत्रापि सायण एव न एवं व्याख्यातवान्—"आवयोर्नाभि रुत्पत्तिस्थान मिति ? उत्तानयोः—उन्नतयोः—

पृथिवीसूर्य्ययोः

इत्यपि दयानन्दव्याख्यानं समीचीनं न, परन्तु द्यावापृथिव्योः—स्वर्गभारत-वर्षयोः इत्येवार्थः साधीयान्, योनिः गृहम्—इति च न, परन्तु उत्पत्तिस्थानं निदानमिति यावत्, "पिता सूर्य्यः" इत्यपि दयानन्दस्य विदुषः अमार्जनीय प्रमादः।

द्यौः पिता पृथिवी माता

इति मन्त्रवर्णात्। दुहितुः उषसः इति च न, प्रमाणाभावात् प्रसङ्गविरोधाच्च। गर्भं किरणाख्यम् इत्यपि च अमूलकप्रतिशब्दः।

प्रकृतार्थवाहिनी—कश्चित् भारतवासी ऋषिः पूर्व निवासं पितृलोकं द्यां स्मृत्वा एवं वक्ति—द्यौः आदिस्वर्गः इलावृतवर्षं नः अस्माकं भारतवासिनां पिता—पितृलोकः पितृभूमिः पूर्ववासस्थानं—उक्तञ्च शिवशङ्करेण—

पितरं सर्वस्य जनयितृत्वात् पितृत्वं। प्रश्नोपनिषद्भाष्यं। १२ पृः

यदा तु ब्रह्मण उपनिवेशभूमेर्दिवोपि "स्वर्ग" इति नाम्ना प्रख्यातिरभूत् तदा जगतां सर्वासां नरनारीणामादिपितृनिलयत्वात्

आदिस्वर्गस्य द्यौः

"पिता" इति संज्ञा बभूव। सा एव द्यौः जनिता (जनिता मन्त्रे) जनयिता जनयित्री जन्मभूमिः—उक्तञ्च ऋचि सामवेदेषु च—

भद्रा जनित्री अजीजनत्

नाभिरत्र, अत्रैव द्यवि आदिस्वर्गे (नतु उत्तरकेन्द्रे, उत्तरकुरुषु दिवि च वा) नः अस्माकं पूर्व्वपितामहानां वैवस्वतमन्वत्रिभृगुप्रभृतीनां नाभिरुत्पत्तिरभूत्। बन्धु नः अस्माकं ज्ञातिश्च देवगणः तत्रैव द्यवि विद्यते। तथाहि मन्त्रवर्णः—

अस्ति हि वः सजात्यं

रिशादसो देवासो अस्त्याप्यम्। १०—२७—८म।

इयं अस्मदध्युषिता मही महती—पृथिवी पृथोः पृथुल-जनपदो भारतवर्षं नः अस्माकं—भारतप्रसूतानाम् ऋषीणां माता मातृभूमिः उत्तानयोः अतुग्रवतयोः चम्वोः सेनयोः सेनापतिस्वरूपयोः द्यावापृथिव्योः स्वर्ग-भारतवर्षयोरन्तर्मध्ये पिता द्यौः योनिः सर्वेषा मुत्पत्तिस्थानं पिता सा द्यौः दुहितुः कन्यास्वरूपायाः अन्तरीक्षभूमेः (दिवो द्युलोकस्य च) गर्भं सन्तानम् औपनिवेशिकान् इति यावत् आधात् धारयामास दधार द्यावापृथिव्योरेव देवमनुष्याः अन्तरीक्षं दिवञ्च गता इति भावः। उक्तञ्च ऋषिभिः—

द्यावापृथिवी मातरा। ३—२५ सू—१० म

द्यावापृथिवी पिता माता। २।४३।५

देवपुत्रे रोदसी—प्रत्ने मातरा। ७—१७—६म

एते द्यावापृथिव्यौ प्रत्ने मातरा पुरातने मातृभूमौ। एताभ्यामेव सर्वे देवमनुष्या द्युलोके अन्तरीक्षे च गताः। उक्तं च तत्—

ते मायिनो ममिरे सुप्रचेतसो
जामी सायोनी मिथुना समोकसा।
नव्यं नव्यं तन्तुम् आतन्वते दिवि
समुद्रे अन्तः कवयः सुदीतयः॥ ४।१५९।१म

तत्र सायणभाष्यम्—ते अत्र प्रसिद्धे द्यावापृथिव्यौ मायिनो मायाः प्रज्ञाः स्वविषयप्रज्ञावन्तः प्रज्ञोपलक्षितकर्म्मवन्तो वा सुप्रचेतसः सुष्ठु प्रकर्षेण चेतितुं शक्ताः रश्मयः ममिरे मिमते प्रमाणेन परिच्छिन्दन्ति, कीदृश्यौ ते? जामी—परस्परं भगिनी, एतत् कुतः? इति चेत् उच्यते—सयोनी समानोत्पत्तिस्थाने मिथुना प्राण्युत्पत्तये मिथुनभूते परस्परमवियुक्ते इत्यर्थः। समोकसा समानस्थाने द्युपृथिव्योः एकस्मिन्नेव अवकाशरूपे अवस्थानात् समीचीनस्थाने वा। किं च कवयः मेधाविनः स्वव्यापारविषयज्ञानवन्तः सुदीतयः सुष्ठु द्योतना रश्मयो-दिवि द्योतमाने समुद्रे अन्तरिक्षे अन्तर्मध्ये नव्यं नव्यं तन्तुं तननीयं विस्तारणीयं रश्मीन् आतन्वते समन्तात् विस्तारयन्ति।

दयानन्दभाष्यम्—ते मायिनः प्रशंसिता मायाः प्रज्ञा विद्यन्ते येषां ते ममिरे निर्म्मिमते सुप्रचेतसः शोभनं प्रगतं चेतो विज्ञानं येषां ते, जामी सुखभोक्तारौ, सयोनी समाना योनिः विद्या निमित्तं वा ययोस्तौ मिथुना द्वौ समोकसा समीचीनमोको निवसनं ययोस्तौ नव्यं नव्यं नवीनं नवीनं तन्तुं विस्तृतं वस्तु, विज्ञानं वा आतन्वते दिवि विद्युति सूर्य्ये वा समुद्रे अन्तरिक्षे सागरे वा अन्तर्मध्ये कवयः विद्वांसः सुदीतयः शोभना दीतिर्विद्या दीप्तिर्येषां ते अत्र छान्दसो वर्णलोपोवेति प्रलोपः।

दत्तजानुवाद—द्यावापृथिवी सहोदरा भगिनी, एकस्थानस्थिता मिथुन, प्रज्ञाविशिष्ट चै तन्यकारी। रश्मिगण ताहादिगके परिच्छेद करितेछे। स्वव्यापारनिरत सुदीप्त रश्मिगण द्योतमान अन्तरीक्षमध्ये नूतन नूतन तन्तु विस्तार करितेछे।

अहो एते अपि भाष्यानुवादा वृथा वाग्‌जालडम्बरा इति।

जामी परस्परं भगिनी—

इति न। जामी ज्ञाती। परन्तु भगिनी न प्रायेण ज्ञातिर्भवति। वस्तुतस्तु ज्ञाती—सनाभी सगोत्रे वा। (Kin).

दिवि द्योतमाने,

इति च न। परन्तु दिवि द्युलोके सत्यतपोमहर्लोकेषु।

तन्तुं रश्मीन्

इति च न। परन्तु—वंशम्। एषां मध्ये दयानन्दभाष्यं तु नितरां प्रमाद समाम्नातं। "ते" इति पदं पुंसि न, परन्तु ते "द्यावापृथिव्यौ। प्र द्यावा यज्ञैः पृथिवी ऋतावृधा—१-१५८-१म, ते हि द्यावापृथिवी विश्वशम्भुवा। १-१६०-१म। इत्यत्र मन्त्रद्वयानुवृत्तिः स्यात्।

जामी—सुखभोक्तारौ, सयोनी—समानविद्यौ, तन्तुं वस्तु विज्ञानं वा, दिवि विद्युति सूर्य्ये वा, समुद्रे सागरे वा, एतत् सर्व्वं वेदविरुद्धं, विप्रलपित मेव। "दिवि देवाः" अतएव दिव् किमपि स्थानमिति। विद्युति, सूर्य्ये, सागरे वा न देवाः स्थातुं शक्नुवन्ति नरत्वात्।

प्रकृतार्थवाहिनी—नास्य मन्त्रस्य प्रारम्भभागः सुखबोधः। "ममिरे", एतत् क्रियापदस्य व्युत्पत्तिं प्रकृतार्थं वा सायणदयानन्दौ न कथितवन्तौ। तौ तु सतत मेव "मे मम, ते तव" इत्थं व्यासकूटानां सरलार्थं व्यक्ती-कुर्वाते। भवतु तावत् वयं यथाशक्ति यथामति किमपि व्याख्यास्यामः।

मायिनः प्रज्ञावन्तः सुप्रचेतसः शोभनहृदयाः सुदीतयः प्रतिभाशालिनः कवयः अभिज्ञाः पण्डिता इति यावत् ममिरे इति परिमितवन्तः स्थिरीचक्रुः यत् ते पूर्व्वोक्ते द्यावापृथिव्यौ आदिस्वर्गभारतवर्षे प्रत्ने मातरौ पुरातनमातृभूमी जामी परस्परं ज्ञातिभावापन्ने द्योलोकादेव सर्व्वे देवमनुष्या भारतवर्षं माजग्मुः अत्रापि भारतवर्षे देवमनुष्याणां बहूनां जन्म अभवत्, अतएव देवपुत्रे ते द्यावापृथिव्यौ सयोनी समानयोनी। उक्तञ्च—

प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या ।
मातुर्गर्भे भरामहे ॥ ८-७२-८म

द्यौ:—देवमनुष्याणां स्वर्गभारतवासिनां सर्व्वेषां योनिरुत्पत्तिस्थानं तस्मात् ते द्यावापृथिव्यौ सयोर्नी । स्वर्गभारतवासिनामेकस्थानोत्पन्नत्वन्तु प्रतिपादितं तेनैव विदुषा सायणेन—

"सर्व्वमेकस्मात् जातं" । ८-५४-३म ।

ते च द्यावापृथिव्यौ मिथुना मिथुने मिथुनं युग्मं सततं परस्परं मिलिते सख्यभावापन्ने तथैव समोकसा समोकसौ ओक: स्थानं, समानस्थाने उभयोर्भूमिपरिमाणं तुल्यम् । एवम्भूते ते प्रत्ने मातरौ द्यावापृथिव्यौ दिवि द्युलोके महर्लोकतपोलोकब्रह्मलोकेषु तथा समुद्रे अन्तरीक्षे तुरुष्कपारस्यापोगस्थानेषु च (तदा आरवदेशो न स्यात्) नव्यं नव्यं नवं नवं तन्तुं वंशम् औपनिवेशिकप्रजा आतन्वते आतन्वाते प्रेषयत: स्वर्गभारतवासिनो जना: ताभ्यां स्वर्गभारतवर्षाभ्यां द्युलोके भुवर्लोके च गत्वा उपनिविविशुरिति । तथाहि—

सना पुराण मधि एमि आरात्
मह: पितुर्जनितु र्जामि तन्न: ।
देवासो यत्र पनितार एवै:
उरौ पथि व्युते तस्थु रन्त: ॥ ८—५४—३म

तत्र सायण:—हे द्यौ: ! महो महत्या: पितु: सर्वस्य पालयित्र्या: जनितुर्जनयित्र्या: तव सना सनातनं पुराणं पूर्वक्रमागतं न: अस्माकं यदेतत् जामित्वं सर्वमेकस्मात् जातम्

इति द्यौर्भगिनी भवति । तादृशं भगिनीत्वं तत् आरात् अधुना अध्येमि स्मरामि दिव: पितृत्वे जनयितृत्वे च मन्त्रवर्ण:—

"द्यौर्मे पिता जनिता नाभिरत्र" इति ।

यत्र यस्यां दिवि अन्तर्मध्ये उरौ विस्तीर्णे व्युते विविक्ते पथि नभसि पनितार: त्वां स्तुवन्तो देवासो देवा: एवैर्गमनसाधनै: स्वै: स्वै र्वाहनै: सहिता: सन्त: तस्थु: । तत्र स्थिता देवा मदीयं स्तोत्रं शृण्वन्तु इति भाव: ।

दयानन्दभाष्यम्—सना सनातनं पुराणं पुरातनम् अधि एमि सर्वत: स्मरामि

आरात् दूरात् समीपात् वा महः महतः पूजनीयस्य पितुः पालकस्य जनितुः जनकस्य जामि जातं तत् नः अस्मान् अस्माकं वा देवासः विद्वांसः यत्र पनितारः व्यवहर्त्तारः स्तावकाः एवैः प्रापकैः उरौ महति पथि मार्गे व्युते विगतावरण प्रसिद्धे तस्थुः तिष्ठन्ति अन्तर्मध्ये। तस्यैव भावार्थः—हे मनुष्या यत्र सर्वं जगत् तिष्ठति येन प्रोक्तेन मार्गेण गच्छन्ति तत् सर्वस्य पालकं जनितृ सर्वेभ्यो महत् अनादिभूतं ब्रह्म उपासनीयं यदि तत् जानीयात् तर्हि समीपस्थं न जानीयात् चेत् अति दूरस्थं भवति।

दत्तजानुवाद—आमि एक्षणे महत् पितार सेइ सनातन पुरातन ज्ञातित्व चिन्ता करि। ताँहार विस्तीर्ण निर्जन पथे स्तुति करि, देवगण स्वीय स्वीय वाहनेर सहित अवस्थान करेन।

दयानन्दव्याख्या अतीव मिथ्याकल्पनाबहुला, अतः सा न समालोच्या। कथं सायणः द्यां सम्बुध्य व्याख्या मारब्धवान् तन्न परिज्ञायते। वस्तुतस्तु कश्चित् भारतीय ऋषिः पूर्व्वनिवासं पितृलोकं द्यां स्मृत्वा मनसि एवमवदत्।

सर्व्वमेकस्मात् जातम्

अति प्रकृतः संवादोऽयं। परन्तु तर्हि कथं सा एका मातृभूमिः द्यौः भगिनी भवेत् ननु पिता माता वा ?

द्यौः पिता पृथिवी माता

परं कथं सायणः दिवो द्युलोकस्य पितृत्वं जनयितृत्वं च निरदिशत् तन्न बोध्यं। न किं द्यौरेव पिता जनिता च, न पुनर्दिव्? (दिव्+सुप्=दिव् न तु द्यौरिति "दिव औत्", सूत्रमेतत् दोषसमाम्नात मिति) द्यौ र्दिव् एते त्वभिन्ने इति च न।

"एव"शब्दः वाहनार्थपरो न तु आयुधार्थपरः ? किं सायणेनैव स्थानान्तरे "एव" आयुधं इत्युक्तमिति ? प्रसङ्गसाहचर्य्यादपि एव आयुधं इत्येव सङ्गच्छते। यतः यज्ञविध्वंसकारिदैत्यदानवभयादेव देवाः सशस्त्रा एव ईजिरे।

"व्युते" इति पदं व्येञ् तन्तुसन्ताने इति व्ये धातोः कर्म्मणि क्तः यजादित्वात् संप्रसारणम्, अथवा—

पदमदः विविक्तं।

इति पदस्य कपोलचलावस्थं। पथि नभसि (गगने) इत्थमेव वा कथं व्याख्यातं। तन्न जाने, वस्तुतस्तु पथि देवयानपथे इति।

प्रकृतार्थवाहिनी—कश्चित् भारतीय ऋषिः वक्ति—अहम् आरात् सुदूरस्थितात् भारतवर्षात् मह्नः महतः अति पूजनीयस्य पितुः पितृभूमेः जनितुः जनयितुः जन्मभूमेः तत् सना सनातनं नित्यस्थिरं पुराणं पुरातनं जामि जामित्वं ज्ञातित्वम् अध्येमि स्मरामि। यद्यपि साम्प्रतं वयं स्वर्गात् सुदूरे भारतवर्षे समागताः तथापि द्यौ रस्माकं पितृलोकः पूर्वनिवासः देवा अस्माकं ज्ञातयः, इति न वयं व्यस्मराम। यत्र द्यवि पितृभूमौ पूर्व्वनिवासस्थाने उरौ विस्तीर्णे व्युते विविक्ते निर्जने पथि देवयानपथे अन्तर्मध्ये देवासो देवा दैत्यदानवभयात् एवैः स्वैः स्वैरायुधैरुपलक्षिता सन्तः पनितारः स्तोतारः तस्थुः स्थितवन्तः। तथाहि—

तद्बन्धुः सूरिर्दिवि ते धियन्धाः
नाभानेदिष्ठो रपति प्रवेनन्।
सा नो नाभिः परमास्य वा घा
अहं तत् पश्चा कतिथश्चिदास॥ १८॥

तत्र सायणभाष्यम्—तद्बन्धुः सैव पृथिवी बन्धिका उत्पत्त्यधिष्ठानत्वेन यस्य असौ तद्बन्धुः तन्मातृक इत्यर्थः। सूरिः स्तुतेः प्रेरकः दिवि वर्त्तमानस्य ते तव स्वभूत इति शेषः। त्वदपत्यभूत इति यावत्। षष्ठीसामर्थ्यात् सम्बन्ध सामान्यं प्रतीयते तच्च आदित्यस्य पुत्रो मनुः मनोः पुत्रो नाभानेदिष्ठः इत्येवं सूर्य्यापत्यत्वेपि पर्य्यवसति। सूर्य्यनाभानेदिष्ठयोः सम्बन्धः चरमपादे उत्तरमन्त्रे च वक्ष्यते। स च धियन्धाः कर्म्मणां धारको नाभानेदिष्ठः वेनन् अङ्गिरोदत्तं गोसहस्रं कामयमानः प्ररपति प्रलपति स्तौति इत्यर्थः। वा अपि च इत्यर्थः। सा द्यौः नः अस्माकं परमा उत्कृष्टा नाभिः बन्धिका या अस्य आदित्यस्य अधिष्ठानभूता अस्ति। घेति पूरणः। अहं तत् तस्य आदित्यस्य पश्चा पश्चादनन्तरं कतिथः कतिपयानां पूरणः आस अभवम् अनेन मम आदित्येन जन्य जनकभावः सम्बन्धः सन्निकृष्ट इत्युक्तं भवति।

दत्तजानुवाद—हे स्वर्गस्थ सूर्य्य ! आमि नाभानेदिष्ठ तोमार बन्धु, अर्थात् आमि तोमार स्तव करितेछि। आमार कामना ये आमी आत्मीय गाभी लाभ करि। सेइ द्युलोक आमादिगेर श्रेष्ठ उत्पत्तिस्थान। एवं सूर्य्येरओ अधिष्ठानभूत। आमि सेइ सूर्य्य हइते कय पुरुष वा अन्तर ?

अस्मिन् मन्त्रे सूर्य्यनाभानेदिष्ठसंवादो वर्त्तते। वैवस्वतमनुः स्वर्गात् भारतवर्षमाजगाम अत्रै व अयोध्यायां कृतनिवासः अवर्त्तत। ब्रह्मसूर्य्यभगपूषेन्द्रादयः पुनः विष्णुना सह द्यां गतवन्तः। अथ स्वर्गस्यदायभागमाश्रित्य सूर्य्यनाभानेदिष्ठयोर्मध्ये एतत् कथोपकथनं सञ्जातं। वृद्धपितामहं सूर्य्यं सम्बुध्य नाभानेदिष्ठः एतत् उक्तवान्। उक्तञ्च ऐतरेय ब्राह्मणे तन्नाभानेदिष्ठविवरणं—नाभानेदिष्ठं वै मानवं ब्रह्मचर्य्यं चरन्तं भ्रातरो निरभजन्। सः अब्रवीत् एत्य किं मह्यं अभाक्त इति। ५८२ पृ। २य ख।

तत्र सायणभाष्यम्—मनोः पुत्रो नाभानेदिष्ठोनाम बालको गुरुगृहे ब्रह्मचर्य्यं वसति उपनीतः सन् वेदमध्येतुं तत्र तिष्ठति। तदानीं तस्य ज्येष्ठभ्रातरो मनोः पितुर्धनं स्वार्थं विभजन्तः तं बालकं निरभजन् भागरहितं अकुर्वन्। बालोऽयं ब्रह्मचारी वेदमेव अभ्यस्यतु, किं तस्य धनेन इति मत्वा भागं न दत्तवन्तः। तदानीं स नाभानेदिष्ठ एत्य वेदाभ्यासं कृत्वा समागत्य भ्रातॄन् इदम् अब्रवीत् हे भ्रातरः मह्यं किम् अभाक्त किं नाम वस्तु भागत्वे न यूयं पृथक्त्वेन कृतवन्त इति।

इक्ष्वाकादयो नाभानेदिष्ठं न किमपि ददुः, ततः स सूर्य्यं वृद्धपितामहमुद्दिश्य एवं निवेदितवान्। मूले "दिवि" इति पदं भ्रान्त्या प्रयुक्तं, द्यौरेव पितृभूमिरादिनिवासो देवमनुष्याणां नतु दिव्।

प्रकृतार्थवाहिनी—हे दिवि द्यवि स्थित इति शेषः सूरिः सूरे सूर्य्यदेव ! वृद्धपितामह ! मत्पितामहविवस्वतो भ्रातः ! तद्बन्धुः तस्य भवतः बन्धुः आत्मीयः पौत्र इति यावत् एष नाभानेदिष्ठः ते तव धियन्धाः धियं बुद्धिं धारयति इति धियन्धाः धा धातोः क्विप् ततः सुप्) त्वद्बुद्धिधारी त्वत्सदाचारादिपालनकारी। अतएव अहं पाङ्क्तेयत्वात् प्रकृतदायाधिकारी इति भावः। एवम्भूतः अयं ते पौत्रः वेनन् इच्छन् (वेनति इच्छति इति निघण्टुः) स्वयं प्रवृत्तः सन् प्ररपति प्रलपति—निवेदयति। सा परमा द्यौः नः अस्माकं तव मम च नाभिः उत्पत्तिस्थानं (नतु बन्धिका) अस्य अयं (विभक्तिकारकव्यत्ययः) अहं नाभानेदिष्ठः तत् तस्य तव पश्चा पश्चात् अनन्तरं कतिथचित् कतिपयपुरुषव्यवहित आस अभवं अहं तव नेदिष्ठोदायाद एव इत्यर्थः।

तथाहि—

इयं मे नाभिरिह मे सधस्थम्

इमे मे देवा अयमस्मि सर्वः। १८—६१—१० म।

प्रकृतार्थवाहिनी—इयं सा द्यौः मे मम नाभिः उत्पत्तिस्थानम्, इह अस्यां दिवि मे मम सधस्थं सहावस्थानभूमिः गोष्ठीति यावत् (Club)। इमे स्वर्गस्थाः सूर्य्यादयः देवाः मे मम दायादाः। अयमहं नाभानेदिष्ठः सर्वः सकल एव अस्मि भवामि। अहं देवलोकवासी देवः, तथा अहमपि भारतवासी भारतसन्तानः।

अनेन किमायातम्? अनेन इदमेव सिद्धं यत् देवा वैवस्वतमन्वादयः भारतवर्षेषु आगता अपि स्वर्गस्तेषां पितृभूमिरिति न व्यस्मरन्। अथ कालेन गच्छता पठनपाठनानां वेदानामभावात् तथा यातायातसम्बन्धाभावाच्च सर्वं विस्मृति महोदधौ निमग्नम्। पितृलोकस्तु स भौमः,पारलौकिकप्रेतलोकत्वं गतः स्वर्गश्च पारलौकिकः अभवत्, वयमपि देवत्वविहीना मनुष्यत्वं प्राप्ताः।

तर्हि किं वेदा मनुष्यप्रणीता अनित्याश्च पौरुषेयाश्च इति? अथ किम्? एवमेव। तर्हि कथं मन्वादयः वेदम् अपौरुषेयं नित्यञ्च अवदन्? मन्वादयस्तु भक्तिवशादेव तथा उक्तवन्तः, अन्ये तु इदानीन्तनाः सायणादयः समाजभयात् हृत्तिलोपभयाच्च वेदाना मपौरुषेयत्वं नित्यत्वञ्च प्रचख्युरिति। वस्तुतस्तु वेदा अपौरुषेया नित्याः प्रमादरहिताः, सर्वे वेदा भारतीयाः, स्वर्गाः पारलौकिका, देवा उपास्या इत्येवमादिभ्यः प्रमादेभ्य एव, तथा भौगोलिकज्ञानाभावात् भाषाविद्याया अल्पतया च यास्कोवटमहीधरहलायुधसायणमहीधरभट्टभास्कराणां तथा सम्प्रदाय-प्रेमलाभेच्छुदयानन्दादेरपि भाष्याणि स्खलनबहुलानि अभवन्। अतएव वयं वेदानाम् ऐतिह्यं विवृत्य स्वमतसमर्थनं करिष्याम इति।

अथ वेदोत्पत्तिः।

अहो भाटलाण्टिकस्यापि पारो नासीत् नित्याना मपौरुषेयाणामपि सनातनानां वेदानाम् उत्पत्तिर्नास्त्येव, एवं न। ये खलु श्रुतिनामैव श्रुतिगोचरं कृतवन्तो न पुनर्वेदान् अधीतवन्तः, त एव एवं वक्तुं समर्था यत् "वेदा नित्या अपौरुषेयाश्च" वा। सत्य मुक्तं श्रीमता शबरस्वामिना—"धर्म्माय हि वेदवाक्यानि विचारयितुम् अनधीतवेदो न शक्नुयात्।" पू-मी भूमिका

तर्हि के के वेदमन्त्राणां रचयितार उत? पूर्व्वं तावत् आदिस्वर्गवासिनो देवा देवपत्रय वेदमन्त्रान् रचयामासुः, तेषां समाहारेण—सामवेदः सञ्जातः

ततस्तु भारतागता देवा अस्मिन् भारतवर्षे एव यान् यान् मन्त्रान् प्रणिन्यु स्ते षामेव समवायेन ऋग्वेदस्य अथर्ववेदस्य च देहप्रतिष्ठा अभवत्। ते तु मन्त्राः अब्राह्मण-ब्राह्मणपारशवस्त्रीशूद्रादिभिरेव प्रणीताः, नतु ऋषिभि भगवत्प्रत्या-दिष्टैः कैश्चित् त्रिकालज्ञै र्दिकालज्ञै रतीन्द्रियार्थ दर्शिभिर्भगवता वा स्वयमिति, वेदेषु नानासंशयभ्रान्तिप्रमादादीनां वर्त्त मानत्वात्।

अथ—द्योभारतवर्षात् ये ये देवमनुष्या अन्तरीक्षं मनुष्यलोकं गता स्तएव यानि गद्यमयानि यजूंषि व्यरचयन् तेषामेव समवायेन यजुर्व्वेदः सञ्जात इति।

सत्यत्रेताद्वापरेषु युगेषु---स्वतन्त्रै र्ऋषिभि भिन्नभिन्नसमये पौर्वापर्य्येण वेदमन्त्राः प्रणीताः, अत स्तेषां कस्यापि भाषा दुर्बोधवैदिकसंस्कृत--बहुला, कस्यापि भाषा वैदिकलौकिकसंस्कृतबहुला कस्यापि भाषा केवलं लौकिक संस्कृतसनाथा इति। पूर्व्वं तावत् वर्णाश्रमव्यवस्था नासीत्। तत्तु चातुर्वर्ण्यं त्रेताया मेव प्रवर्त्तितम् अतएव सत्यत्रेतायुगयोर्वेदमन्त्रेषु चातुर्वर्ण्यसंवादो नितरां नास्त्येव। अतः जगता मादिमग्रन्थेषु—सामवेदेषु वर्णाश्रमप्रसङ्गो न दृश्यते। ब्रह्मेश्वरपरमेश्वरा अपि शब्दा स्तत्र सामवेदे न नयनगोचरा भवन्ति, तस्य—प्राचीनतमत्वात्। तदा तु जगति---जड़नरादीनामेव उपा-सना प्रवर्त्तिता आसीत्। तत् कथं वेदेषु एव एवं वेदोत्पत्तिसंवादः संलक्ष्यते? यदस्ति ऋग् वेदेषु—

तस्मात् यज्ञात् सर्व्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मात् अजायत॥ ८—९० सू-१०म

तत्र सायणभाष्यम्—सर्व्वहुत स्तस्मात् पूर्व्वोक्तात् यज्ञात् ऋचः सामानि च जज्ञिरे उत्पन्नाः तस्मात् यज्ञात् छन्दांसि गायत्र्यादीनि जज्ञिरे तस्मात् यज्ञात् यजुरपि अजायत।

तत्र सायणभाष्यान्तरम्—"सहस्रशीर्षा पुरुषः" इत्युक्तात् परमेश्वरात् यज्ञात् यजनीयात् पूजनीयात् सर्वहुतः सर्वैर्हूयमानात्। इति सायणोपद्घात प्रकरणम्।

अथ दयानन्द-भाष्यम्—तस्मात् यज्ञात् सच्चिदानन्दादि-लक्षणात् पूर्णात् पुरुषात् सर्वहुतात् सर्वपूज्यात् सर्वोपास्यात् सर्वशक्तिमतः ब्रह्मण ऋचः—ऋग् वेदः, यजुः—यजुर्वेदः, सामानि—सामवेदः, छन्दांसि—अथर्ववेदः, ऊ.भि.रे। चत्वारो वेदाः तेनैव प्रकाशिता इति वेद्यम्। "सर्वहुतः" इति

वेदानामपि विशेषणं भवितुमर्हति। वेदाः सर्वहुतः। यतः सर्वं मनुष्यैर्हीतु मादातुं ग्रहीतुं योग्याः सन्ति अतः। जज्ञिरे अजायत इति क्रिया द्वयं वेदानामनेकविद्यावत्त्वद्योतनार्थं। तथा तस्मादिति पदद्वयम् ईश्वरादेव वेदा जाताः इत्यवधारणार्थं। वेदानां गायत्र्यादिच्छन्दोऽन्वितत्वात् पुनश्छन्दांसीति पदं चतुर्थस्य अथर्ववेदस्य उत्पत्तिं ज्ञापयतीति अवधेयं। यज्ञो वै विष्णुः। ऋग्वेदभाष्यभूमिका।

उवटभाष्यम्—तस्मादेव यज्ञात् सर्वहुतः प्रज्वालितात् यथा ऋचः सामानि यजूंषि च देवा उत्पादयन्ति छन्दांसि च। ७ ३१ अ—यजुः।

महीधर—भाष्यम्—सर्वहुतः तस्मात् यज्ञात् ऋचः सामानि च जज्ञिरे, उत्पन्नानि, छन्दांसि गायत्र्यादीनि जज्ञिरे, तस्मात् यजुरपि अजायत। ऋग् यजुः सामभिश्छन्दोभिश्च विना यज्ञा न सिध्यन्ति।

परन्तु नैतत् व्याख्यानकदम्बकं साम्प्रतं वेद-विरुद्धत्वात्। वेदा अपि याज्ञसेनीवत् यज्ञकुण्डात् उत्पन्नाः छन्दांसि च तस्मादेव जातानि इति न सङ्गच्छते. तथाहि केचिदपि एवं व्याख्यातुकामाः—

तस्मात् सर्व्वहुतः सर्व्वपूजितात् यज्ञात् यज्ञपुरुषात् विष्णोर्भगवत एतानि वेदादीनि सर्व्वाणि उत्पन्नानि। एतदपि असाधीय इति।

प्रकृतार्थवाहिनी—सर्व्वहुतः तस्मात् यज्ञात् सर्व्वहुति तस्मै यज्ञाय सर्व्वेषां यजमानानां यज्ञार्थं यज्ञे स्तोत्रपाठार्थम् ऋच ऋक्समूहः ऋग्वेद इति यावत् तथा सामानि सामात्मकः सामवेदः जज्ञिरे उत्पन्नाः तस्मात् यज्ञात् तस्मै यज्ञाय छन्दांसि गायत्र्यादीनि जज्ञिरे उत्पन्नानि घटितानि, तस्मात् यज्ञात् तस्मै यज्ञाय यजुः यजुर्वेदोपि अजायत यजुर्व्वेदमन्त्राः प्रणीताः इति। उक्तञ्च

उक्थं नवीयो जनयस्व यज्ञैः। १५-१८-सू-६म

तत्र सायणः—यज्ञैर्यज्ञेषु नवीयो नवतरम् उक्थं स्तोत्रं जनयस्व। तथाहि

यज्ञेन वाचः पदवीय मायम्। ३—७१-१० म। वाचः वेदमन्त्रा यज्ञेन यज्ञार्थं पदवीयं पदमागच्छन् अतएव यज्ञार्थमेव ऋषिभि र्मन्त्राः प्रणीता नतु यज्ञात् अग्निकुण्डात् वा वेदा याज्ञसेनीवत् विनिःसृता इति। छन्दांसि गायत्र्यादीनि, न तु अथर्ववेदः। तस्य त्रय्या अवरजत्वात्। त्रयं ब्रह्म सनातनमिति भगवन्मनुवचनात्, अथर्ववेदस्तु पश्चात् उत्पन्न इति ज्ञेयम्। तथाहि—

यो ब्रह्माणं विदधाति पूर्व्वं
यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं
मुमुक्षु र्वै शरण मह प्रपद्ये॥ १८-६अ॥ श्वेताश्वतर

तत्र शङ्करभाष्यम्—यो ब्रह्माणं हिरण्यगर्भं विदधाति सृष्टवान् पूर्व्वं सर्गादौ। यो वै वेदांश्च प्रहिणोति तस्मै।

उक्तञ्च एवं किमपि श्वेताश्वतरोप- निषदि शङ्करेण। परन्तु एतदपि न समीचीनं युक्तिविवेकविरुद्धत्वात्। वर्णमयशब्दात्मका वेदाः कथं परमेश्वरात् समागताः सुराः? किं परमेश्वरः वेदमन्त्रान् रचयित्वा ताड़ोपत्रे लिखित्वा स्वपदातिकैः प्रेषितवान् उत ऐश्वरिक पोष्टाफिसद्वारेणवेदाः प्रेरिताः?

पूर्व्वं तावत् एष मूलमन्त्र एव प्रामादिकः। यतः स्वयं ब्रह्म ब्रह्माणं यं कमपि सृष्ट्वा तस्मै वेदान् प्राहिणोत् प्रेरितवान् इति न सङ्गच्छते युक्तिविरुद्धत्वात्। कथं ब्रह्म वेदान् प्रहिणोति? अपि प्रणीता लिखिताश्च वेदा ब्रह्मसकाशे आसन् तान् स प्रेषयामास? केन प्रकारेण? केनोपायेन, केन द्वारेण वा उत? तत्र खलु त्रयो ब्रह्माण एव आसन्। एकस्तु आत्मभूर्य एव स्वयं स्रष्टा परमेश्वर; स एवात्र वेदप्रेरणकर्त्ता, द्वितीय स्तु हिरण्यगर्भो विराट् यं भगवान् मनुः "लोकपितामह" इत्युक्तवान्। ब्रह्माणं हिरण्यगर्भमिति यत् शिष्य शङ्करेण व्याख्यातं तदपि असमीचीनमिति,"हिरण्यगर्भं जनयामास पूर्व्वम्"इत्युक्तत्वात् तस्य आदिमानवत्वं विशदीकृतमेव स एव आदिमानवो विराट। स तु वर्णज्ञानविहीनो निरक्षरः कश्चिदुलङ्गोवर्व्वर आसीत्। स किं करिष्यति जैमिन्यादीनामपि अबोध्यैर्वेदैः? अतएव तदपि व्याख्यानं शङ्करस्य अनादेयं युक्तिविरुद्धत्वात्। अथ य स्तृतीयो ब्रह्मा सुरज्येष्ठः परमेष्ठी, स खलु वेदज्ञ एव आसीत् नितरां। यथा—

तत्रावसत् चोर्द्धतले देवदेव श्चतुर्म्मुखः। ब्रह्मा वेदविदां श्रेष्ठो वरिष्ठ
स्त्रिदिवौकसाम्॥ वायु

परं स स्वयं, तस्य वरुणादयो भ्रातरश्च माता अदितिरपि, सर्व्वे देवाश्च वेदमन्त्रप्रणेतार आसन्। अत स्तत्समीपेऽपि वेदप्रेरणवार्त्ता वेदविरुद्धा एव भवति। अथ भगवता तेषां मनसि वेदज्ञानं प्रेरित मिति चेत् कश्चित् मन्यते तदपि न। यतः प्रायेण सर्व्ववेदमन्त्राः प्रामादिका हिंसाद्येषबहुलाः

त्रैगुण्यविषयाश्च, पक्षान्तरे न ते आध्यात्मिकज्ञानमया; अतः तज्ज्ञानं वेदगतं न भागवत मिति। तर्हि कथं श्रीमता पराशरेण उक्तम्—

न कश्चित् वेद-कर्त्ता च वेदस्मर्त्ता चतुर्म्मुखः। १८—१म

इदमपि च तस्य वेदभक्तिप्रदर्शनमेव, नतु परमार्थत इदं सत्यगर्भ मिति। चतुर्म्मुखोपाधिकसुरज्येष्ठब्रह्मणः पूर्व्ववर्त्तिनो बहवो देवा वेदमन्त्रप्रणेतारः, आसन् स च स्वयमपि मन्त्रप्रणेता आसीत्। उक्तञ्च

ब्रह्मा देवानां पदवीः कवीनां। ऋक्

ब्रह्मा देवानां मध्ये कवीनां पदवीः श्रेष्ठकविर्बभूव। वस्तुतस्तु यः खलु वेदेषु कृतश्रमः स न कथमपि एवं वक्तु शक्तः स्यात् यत् वेदाः स्वयम्भुवा भगवता प्रणीता तत्प्रत्यादिष्टैर्वा ऋषिभिरिति।

वेदा देवमनुष्यैः प्रणीता इत्यत्र किं प्रमाणं? अत्र वेदा एव स्वयं प्रमाणं भवति। यदुक्तम् ऋग्वेदेषु—

देवगणो मन्त्रप्रणेता——सूक्तवाकं प्रथममादिदग्निम्

आदित् हवि रजनयन्त देवाः।

स एषां यज्ञो अभवत् तनूपाः

तं द्यौर्व्वेद तं पृथिवी तमापः॥ ८-८८सू-१०म।

तत्र सायण-भाष्यम्—सूक्तवाक मिति—प्रथमं पूर्व्वं सूक्तवाक मिदं द्यावा पृथिवीत्यादि वाक्यं मनसा निरूपयन्ति, आदित् अनन्तरम् एव अग्निं मथनेन उत्पादयन्ति। आदित् अनन्तर मेव देवाः हविरजनयन्त जनयन्ति। स वैश्वानरः अग्निः एषां देवानां यज्ञो यष्टव्यः अभवत् भवति। स तनूपाः शरीराणां रक्षिता च भवति। तमग्निं द्यौ द्युलोकः वेद जानाति तमग्निं पृथिवी भूमिरपि च जानाति तमग्नि मापः अन्तरिक्षञ्च जानाति।

दत्तजानुवाद—देवतारा प्रथमे सूक्त सृष्टि करिलेन, परे अग्नि, परे होमेर द्रव्य सृष्टि करिलेन। सेइ अग्नि इहाँदिगेर शरीररक्षाकारी यज्ञस्वरूप हइलेन। आकाश, पृथिवी ओ जलेर सहित सेइ अग्निर परिचय आछे।

न खलु एतद् भाष्यम् अनुवादो वा समीचीनौ। "आदित्"—अनन्तरं—किमत्र प्रमाणं? "अजनयन्त" क्रियापदस्य प्रतिशब्दः कथं "जनयन्ति", अभवत्

कथं वा अग्निशब्दस्य प्रतिशब्दार्थं "वैश्वानर" इति शब्दः प्रयुक्तोऽभूत्? किं वैश्वानरशब्दः नराग्निपर एव न? "तनूपाः" इति विशेषणं वा कथं पृथक् कृतं? अग्निः तनूपा बभूव, तेनैव किं तस्य उपासना प्रवर्त्तिता न? द्यौ द्युं लोकः कथं? सा किमादि स्वर्ग एव न? अनुवादस्य च शेषार्द्ध मतीय प्रमाददुष्टमिति।

प्रकृतार्थ वाहिनी— देवा विश्वे साध्यादयः आदिस्वर्गवासिनः देवा अमराः प्रथमं पूर्व्वम् आदित् (कपोल चलमेतत् अस्मादेव वङ्गभाषायां "आदिते" इति समागतं) आदितः सर्व्वादौ सूक्तवाकं सूक्तवाक्यं वेदमन्त्रसमूहं (येषां समाहारेण सामवेदः सञ्जातः) अजनयन्त जनयामासुः प्रणिन्युः तएव देवाः सर्व्वादौ अग्निं वह्निं (न तु वैश्यानरं) अरणिसंघर्षणेन अजनयन्त उदपादयन्। उक्तञ्च

> दिवस्परि प्रथमं जज्ञे अग्निः। १-४५-१०म
> त्वामग्ने पुष्करादधि अथर्वा निरमन्थत।
> मूर्द्ध्नो विश्वस्य वाघतः। १३-१६सू-६म

तएव देवाः सर्व्वादौ हविषां दध्नां मन्थनेन गव्यं घृतञ्च अजनयन्त। तनूपाः हिमात् देहरक्षाकारी स वह्निः एषां विश्वसाध्यादिदेवानां यज्ञः यजनीयः उपास्य अभवत् बभूव। तदाप्रभृत्येव स्वर्गे अग्ने रुपासना प्रवृत्ता। उक्तञ्च

> यज्ञेन यज्ञम् अयजन्त देवाः
> तानि धर्म्माणि प्रथमानि आसन्।
> ते ह नाकं महिमानः सचन्त
> यत्र पूर्व्वे साध्याः सन्ति देवाः॥
>
> १६-९० सू-१०म। ५०-१६४ सू-१म।

तम् एवम्भूतं नवोत्पादितं देहरक्षाकारिणम् उपास्यञ्च वह्निं द्यौः आदिस्वर्गः लक्षणया आदिस्वर्गवासी देवगणः वेद जानाति, तमग्निं पृथिवी भारतवर्षं भारतवासिगणः जानाति तमग्निं आपः अन्तरीक्षम् अन्तरीक्षवासिगणो वेद जानाति। तथा हि—

इनोत पृच्छ जनिमा कवीनां
मनोधृत: सुकृतस्तक्षत द्याम् ।
इमा उ ते प्रण्यो वर्द्धमाना: ।
मनोवाता अध नु धर्म्मणि ग्मन् ॥ २-३८ सू ३म

तत्र सायणभाष्यम्—उत इति आमन्त्रणे हे इन्द्र ! कवीनां सुकृतकर्म्मणां देवभूयं गतानां जनिम जन्म केन कर्म्मणा दिवं गता: कुतो वा तेषामुत्पत्ति रिति एतमर्थमेव ईश्वरान् गुरून् पृच्छ ते कवयो मनोधृत: संयतमनस्का: अतएव सुकृत:, शोभनकर्म्माण: सन्त: द्यां दिवं तक्षत अकुर्वन् अध अथेदानीं धर्म्मणि अस्मिन् यज्ञे ते त्वदर्थं प्रण्य: प्रणीयमाना मनोवाता मनोवेगा: वर्द्धमाना स्त्वां वर्द्धयन्त्य इमा अस्माभि: क्रियमाणा: स्तुतयो नु क्षिप्रं ग्मन् त्वां गच्छन्तु उ सर्वत्र प्रसिद्धार्थ: ।

दयानन्दसरस्वतीभाष्यम्—इना इनान् प्रभून् समर्थान् उत अपि पृच्छ जनिमा जन्मानि कवीनां मेधाविनां मनोधृत: मनोविज्ञानं धृतं यै: ते, सुकृतो ये शोभनं कर्म्म कुर्वन्ति ते तक्षत सूक्ष्मान् कुरुत द्यां विद्युतम् इमा वर्त्तमाना: उ ते तव प्रण्य: प्रकृष्टा नीतिर्य्यासां ता: वर्द्धमाना: वृद्धिशीला: मनोवाता मन इव वातो वेगो यासां ता:, अध अथ नु सद्य: धर्म्मणि ग्मन् प्राप्नुयु: ।

दत्तजानुवाद—हे इन्द्र कविगणेर जन्मविषये गुरुगणके जिज्ञासा कर । याँहारा मन:संयम ओ पुण्यकर्म्मद्वारा स्वर्ग निर्म्माण करियाछिलेन । एइक्षणे एइ यज्ञे तोमार जन्य प्रणीत स्तुतिसमूह वर्द्धमान हइया मनेर न्याय वेगे गमन करे ।

अहो वृथा वाग्जालडम्बराणि एतानि व्याख्यानानि, अतीव कष्ट-कल्पना-नि:सृतानि । पूर्वं तावत् बास्कलेन यत् "इना" पदपाठ: परिकल्पित: तन्न समीचीनमभूत् । वेदेषु पुंलिङ्गे "अश्विना" इत्यादय: प्रयोगा: सन्ति, ते तु पुंस्येव द्विवचने प्रयुक्ता: । न खलु कुत्रापि "अश्विना" प्रभृतीनि पदानि पुंसि बहुवचने प्रयुक्तानि दृश्यन्ते, चेत् तथाविधानि आकारान्तानि पदानि क्लीवलिङ्गबोधकानि प्रयुक्तानि स्यु: तर्हि तानि प्रथमाया द्वितीयाया वा बहुवचनेषु प्रयुक्तानि इति बोध्यं । यथा परिमिता परिमितानि, धना धनानि । अतएव

इना इनान्

इति न, तथा पदपाठश्च इना अपि न स्यात् परन्तु—

इन (इनः सूर्य्ये प्रभौ राज्ञि)

एव भवेत् बभूव च। तथा कवीना मिति पदस्य कवितानां बोधकं भवेत्।

द्यां दिवं अकुर्वन्

व्याख्येयस्य अतीव भ्रष्टा। किं कश्चित केचित् वा स्वर्गं निर्म्मातुं गता भवेयुः। दयानन्दस्त—

द्यां विद्युतम् इति च

व्याचख्यौ। दयानन्दानां व्याख्यापि एषा नितरामसमीचीना एव। द्यौ विद्युत् किमत्र प्रमाणं निगमो वा। अथ अस्य मन्त्रस्य या आध्यात्मिकी व्याख्या कृता सापि अधमाऽधमा इति। वस्तु-तस्तु वेदा नित्याः, स्वर्गश्च पारलौकिक एव अतएव ते वेदा कथं स्वर्गे प्रणीता भवेयुः एतद्भ्रान्त्या एव इत्थं प्रलापोक्तमितिः।

प्रकृतार्थवाहिनी—उत हे इन प्रभो त्वं कवीनां कवितानां जनिमा (कपोलचलमेतत् जानाशब्दवत्—"देवानां नु वयं जाना") जन्म जन्मविवरणं केन प्रकारेण कवितानां वेदमन्त्राणां जन्म बभूव, तत् पृच्छ जिज्ञासस्व अभिज्ञान् इति शेषः। अहं मन्ये इति शेषः—कवयः द्यां द्यवि आदिस्वर्गे मनोश्रुतः मनोश्रुताः मनसः उद्भाविता मनोवाता मनोवेगस्वरूपा यथा मनःसु भावाः सञ्जाताः तथैव व्यरचयन्, अतएव सुकृतः सुकृताः शोभनकृताः इमाः स्तुतीः स्तुतिमन्त्रान् तक्षत अतक्षन् प्रणिन्युः। अथ प्रणयः (कपोलचलमेतत्) प्रणीयमानाः ते ताः स्तुतयः वर्द्धमानाः शनैः शनैः हृदि गताः बहुलीभूताः सत्यः धर्म्मणि धर्म्मकार्य्ये यज्ञादौ ग्मन् (कपोल चलमेतत्) अगमन् विनियुक्ता बभूवुः। तथाहि—

मनो वै समुद्रः मनसो वै समुद्रात् वाचा अभ्रया देवाः त्रयीं विद्यां निरखनन्। ५।२।५।२-शतपथं। अतएव वेदमन्त्राः कवीनां मनस एव निःसृता इति। तथाहि—

सरस्वान् धीभिर्वरुणो धृतव्रतः,
पूषा विष्णुर्महिमा वायुरश्विना ।
ब्रह्मकृतो अमृता विश्ववेदसः,
शर्म्म नो यंसन् त्रिवरूथम् अंहसः ॥ ५-६६-१०म

तत्र सायणभाष्यम्—धीभिः प्रज्ञाभिर्युक्तः सरस्वान् एतन्नामा धृतव्रतो धृत कर्म्मा वरुणश्च पूषा महिमा महत्त्वेन युक्तो विष्णुश्च वायुः अश्विना अश्विनौ ब्रह्मकृतः कर्म्मकृतः स्तोतृणामन्नदातारो वा विश्ववेदसः सर्वधना व्याप्तज्ञाना वा अंहसः पापरूपाणां शत्रूणां हन्तारः अमृता एते देवाः नः अस्मभ्यं त्रिवरूथं त्रिष्कभं त्रिकक्षं शर्म्म गृहं यंसन् प्रजच्छन्तु ।

दत्तजानुवाद—जलाधिपति ओ विविध बुद्धियुक्त वरुण, व्रतरक्षाकारी पूषा, महीयान् विष्णु, वायु, अश्विद्वय, यज्ञसृष्टिकारी सर्व्वज्ञ अमरगण इहाँरा आमादिगके पाप हइते त्राण करिया तिन प्रकोष्ठयुक्त गृह दान करुन ।

प्रामादिक मेतत् भाष्यानुवादं, स्वर्गः पारलौकिकः देवाः पारलौकिका वेदा नित्या इत्यादिना अन्धीभूतौ एतौ मन्त्रस्य प्रकृतार्थबोधसमर्थौ न अभवतां । "ब्रह्मकृतः"—"कर्म्मकृतः" इति तु अतीव प्रमादः ।

प्रकृतार्थवाहिनी—सरस्वान् एतन्नामा कश्चित् मध्यस्थानवासिदेवः (मध्य स्थानन्तु त्रिपाक एव । द्युलोकभारतवर्षयोर्मध्ये अवस्थानत्वात्) । धृतव्रतः नियमपरायणः वरुणः पूषा महिमा महिम्ना उपलक्षितः महीयान् विष्णुः, वायुः त्वष्टुर्जामाता अश्विना अश्विनौ देवभिषजौ, विश्ववेदसः बहुविषयाभिज्ञा एते अमृता अमृतलोकवासिनो देवाः धीभिर्बुद्धिभिः स्वस्वबुद्धिबलेन नतु केनचित् प्रत्यादिष्टा इत्यर्थः ब्रह्मकृतः वेदमन्त्रकारिणः मन्त्रप्रणेतारः आसन् इति शेषः । ते नः अस्मभ्यम् अंहसः पापकारिणः शत्रुकुलात् त्रिवरूथं त्रितलं (त्रिधातु—त्रिकक्षं) शर्म्म गृहं यंसन् प्रयच्छन्तु । तथाहि—

ब्रह्म कृणोति वरुणः । १५-१०५-१म

अदितिनन्दनो वरुणः ब्रह्म वेदमन्त्रं कृणोति करोति । तथाहि—

दिवो धर्त्ता भुवनस्य प्रजापतिः कविः
अजीजनत् सविता उक्थ्यम् । २-५२-४म ।

दिवो द्यु लोकस्य धर्त्ता धारणकर्त्ता भुवनस्य प्रजापतिः कविः सविता अदितिनन्दनविशेषः उक्थ्यं साममन्त्रम् अजीजनत् व्यरचयत्। तथाहि—

बृहस्पते विश्वे षां जनिता ब्रह्मणामसि। २-२३ सू-२म

हे बृहस्पते देवगुरो इन्द्र वा त्वं विश्वे षां बहूनां ब्रह्मणां वेदमन्त्राणां जनिता जनयिता असि भवसि। तथाहि—

ऋषे मन्त्रकृतां स्तोमैः कश्यप। २-११४-८म

अहं ब्रह्म कृणवं मह्यं वर्द्धनं। १-४८ सू-१०म

अह मिन्द्रः मह्यं वर्द्धनं मम यशोविषयकं ब्रह्म कृणवं करोमि। तथाहि—

ब्रह्मणस्पतिं गृणीषे इन्द्रं
यो ब्रह्मणो देवकृतस्य राजा। ३-८७ सू-७म

य इन्द्रः ब्रह्मणस्पतिः ब्रह्मणां वेदमन्त्राणां पतिः यश्च देवकृतस्य देवैः प्रणीतस्य ब्रह्मणो वेदमन्त्रस्य राजा अधिपतिः, अहं तमिन्द्रं गृणीषे स्तुवे स्तौमि। तथाहि—

कविभिः कविः सन् (तुराषाट्)। ३-२२ सू-६म।

तुराषाट् इन्द्रः स्वयमेव कविः सन् कविभिः सह। तथाहि—

सूर्य्यः कविः। ७-४४ सू-५म।

सावर्णिमनोः पिता, सामवेदमन्त्रसमाहर्त्ता सूर्य्योऽपि कविरासीत्।

अग्नये ब्रह्म ऋभव स्ततक्षुः। ७-८० सू-१०म।

ऋभवः ऋभुसंज्ञका देवाः अग्नये अग्निस्तुत्यर्थं ब्रह्म वेदमन्त्रं ततक्षुः व्यरचयन्। तथाहि—

भूरि चक्र मरुतः पित्र्याणि उक्थानि। २३-५६-७म

मरुतः इन्द्रसैनिका देवत्वं गताः पृश्निमातरः भूरि भूरीणि बहूनि पित्र्याणि पितृलोकयोविषयकाणि उक्थानि साममन्त्रान् चक्र चक्रुः विरचितवन्तः। तथाहि—

उत स्वराजे अदितिः स्तोम मिन्द्राय जीजनत्।
पुरु प्रशस्तम् ऊतये ऋतस्य यत्॥ १४-१२ सू-८म।

तत्र सायणभाष्यम्—उतापि च अदिति: अदीना देवमाता स्वराजे इन्द्राय पुरु प्रशस्तं बहुल सुतष्टं स्तोमं स्तोत्रं जीजनत् अजीजनत् अजनयत्। तथाहि—

सप्तचत्वारिंशद्दृचं प्रथमं सूक्तं सवितृसुतायाः
सूर्य्याया आर्षं—८५।१०म प्रारम्भः
सूर्य्या आरोहत् प्रयती पतिम् । १२-८५-१०म
यदयात् सूर्य्या पतिम् ।७—ऐ

एतेन सवितृकन्या सूर्य्यापि मन्त्रप्रणेत्री आसीदिति दर्शितं । तथाहि

अहं सुवे पितर मस्य मूर्द्धन्, मम योनि रप्स्व अन्तः समुद्रे ।
ततो वितिष्ठे भुवनानु विश्वा, उतामूं द्यां वर्ष्मणोपस्पृशामि ॥
७-१२५ सू-१०म

तत्र सायणभाष्यम्—"द्यौः पिता" इति श्रुतेः । पिता द्यौः पितरं दिवम् अहं सुवे प्रसुवे जनयामि "आत्मन आकाशः सम्भूतः" इति श्रुतेः । कुत्रेति ? तदाह अस्य परमात्मनः मूर्द्धन् मूर्द्धनि उपरि कारणभूते तस्मिन् हि वियदादिकार्य्यजातं सर्व्वं वर्त्तते तन्तुषु पटइव । मम च योनिः कारणं समुद्रे । समुद्द्रवन्ति अस्मात् भूतजातानि इति समुद्रः परमात्मा, तस्मिन् । अप्सु व्यापनशीलासु धीवृत्तिषु अन्तर्मध्ये यत् ब्रह्मचैतन्यं तत् मम कारण मित्यर्थः । यतः ईदृग्भूता अहमस्मि ततो हेतोर्विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि अनु प्रविश्य वितिष्ठे विविधं व्याप्य तिष्ठामि । उतापिच अमूं द्यां विप्रकृष्टदेशे अवस्थितं स्वर्गलोकम् उपलक्षण मेतत् एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा कारणभूतेन मायात्मकेन मदीयेन देहेन उपस्पृशामि । यद्वा अस्य भूलोकस्य मूर्द्धन् मूर्द्धनि उपरि अहं पितरम् आकाशं सुवे समुद्रे जलधौ अप्सु उदकेषु अन्तर्मध्ये मम योनिः कारणभूतोऽम्भृणाख्य ऋषिर्वर्तते । यद्वा समुद्रे अन्तरिक्षे अप्सु अम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्मचैतन्यं वर्त्तते ततोऽहं कारणात्मिका सती सर्व्वाणि भुवनानि व्याप्नोमि । अन्यत् समानं ।

दत्तजानुवाद—आमि पिता आकाशके प्रसव करियाछि। सेइ आकाश एइ जगतेर मस्तकस्वरूप। समुद्रे जलेर मध्ये आमार स्थान। सेइ स्थान हइते सकल भुवने विस्तारित हइ। आपनार उन्नत देहद्वारा एइ द्युलोकके आमि स्पर्श करि।

अहो वृथा वाग्जालबहुलेयं सायणभिष्यव्याख्या त्रिर्यद्वाद्वारेणापि न एतस्य मन्त्रस्य प्रकृतार्थं व्यक्तीकर्तुं समर्थोऽभूत्। इयं वाक् अम्भृणाख्यर्षेर्दुहिता इत्यपि न। परन्तु एषा वाग्देवी सरस्वती सुरज्येष्ठ ब्रह्मण एव परमा विदुषी कन्या। अस्यां पिता ब्रह्मा उपगतो बभूव तेन ब्रह्मा स आदिस्वर्गं पितृलोकं द्यां विहाय सत्यलोकं गतः, सरस्वती अपि अन्तरीक्षं (पारस्यादिकं) आगत्य स्थिता। अथ कालेन गच्छता त्वां विष्णुः जुलतात उदवहत्। तस्या बहवो मन्त्रास्तेषु अयमेकः।

प्रकृतार्थवाहिनी—अहं वाग्देवी अस्य जगतो मूर्द्धन् मूर्द्धनि मस्तकस्वरूपे पितरं (व्यत्ययः) पितरि पितृलोके द्यवि सुवे प्रसूता अभवं। मम योनिः स एव पिता द्यौः मम योनिः उत्पत्तिस्थानं। तत स्तदनन्तरम् अहं अप्सु अन्तः अन्तरीक्षस्य मध्ये समुद्रे (समुद्रो वरुणालयः। अयमेव वरुणः uranas.) वरुणालये पारस्यदेशे इति यावत् वितिष्ठे अवस्थिता भवामि। सत्यपि एवम् अहं निर्व्वासितापि अनु पश्चात् वर्ष्मणा उन्नत्या प्रतिभया इति यावत् विश्वा भुवना सर्वाणि भुवनानि सर्वदेशमहादेशान् अमूं द्यां मम पितृभूमिञ्च उपस्पृशामि सर्व्वदेशवासिभिः सह मे सम्बन्धो वर्त्तते। अहं सर्व्वत्र प्रख्याता च अभवमिति। तथाहि—

जुहूऋषिः——सप्तचं दशमं सूक्तं जुहूर्नाम

ब्रह्मवादिनी ऋषिः। १०८ सू-१०म

इयं जुहूः सुरगुरुबृहस्पते र्जाया सा चन्द्रेण अपहृता पुनः प्रत्यर्पिता च।

तेन जाया मनु अविन्दत् बृहस्पतिः सोमेन नीतां जुहूम्। ५-१०८-१०म।

यमी ऋषिः——विवस्वतः पुत्री यमी ऋषिः। वैवस्वतो यम ऋषिः।

१०सू-१०म प्रारम्भः।

पञ्चर्चं तृतीयं सूक्तम् आनुष्टुभं । विवस्वतो दुहिता यमी ऋषिः ।
१५४सू-१०म प्रारम्भः । सायणः ।

शची ऋषिः——षडृच मष्टमं सूक्तम् आनुष्टुभं पुलोमतनया शची स्वात्मान मनेन अस्तौत् । अतः सैव ऋषिः ।

मम पुत्राः शत्रुहनो अथोमे दुहिता विराट् । ३
येन इन्द्रो हविषा कृत्वी अभवत् । ४-३-१५८-१०म ।

तत्र सायणः—येन हविषा इन्द्रो मम भर्त्ता कृत्वी कर्म्मणां कर्त्ता अभवत् । तथाहि वायुपुराणं—

सप्त ते सप्तभिश्चैव गुणैः सप्तर्षयः स्मृताः । ८३
दीर्घायुषो मन्त्रकृत ईश्वरा दिव्यचक्षुषः ॥ ८४-६१अ
ऋचो यजूंषि सामानि मन्त्राश्चाथर्वणानि च ।
सप्तर्षिभिस्तु ते प्रोक्ताः स्मार्त्तं धर्म्मं मनुर्जगौ ॥ ४६-५७अ
क एते सप्तर्षयः ? स्वायम्भुवमनोर्दशपुत्राणां मध्ये मरीच्यादयः सप्त ऋषयः ।
मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः । महाभारतं

मरीचेः पुत्रः कश्यपः. कश्यपस्य पत्न्यामदित्यां द्वादश पुत्रा बभूवुः यदुक्तं प्राज्ञैः—

धाता मित्रोऽर्य्यमा चेन्द्रो वरुणः सूर्य्यएव च ।
भगो विवस्वान् पूषा च, सविता दशमः स्मृतः ।
एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते ॥

धाता, भगः, अर्य्यमा, वरुण, त्वष्टा, विवस्वान्, सविता, सूर्य्य, पूषा, मित्रः, इन्द्रः विष्णुः ।

अतएव सुरज्येष्ठब्रह्मणो धातुः पितामहा अमी मरीच्यङ्गिरः-प्रभृतयोऽपि मन्त्रप्रणेतार आसन् ।

परन्तु न एतेऽपि सप्तर्षयः प्राचीनमन्त्रप्रणेतारः, विश्वदेवाः धर्म्मात् विश्वाया-मुत्पन्ना दश देवा अपि मन्त्रकृतो बभूवुः । उक्तञ्च—

वसुसत्यौ क्रतुदक्षौ कामकालौ धृतिः कुरुः ।
पुरूरवा माद्रवश्च विश्वे देवाः प्रकीर्त्तिताः ॥

तएव प्राचीनमन्त्रकृतः, तेषां ते मन्त्रास्तु "विश्वदेव-निवित्"
इति संज्ञया परिचिता अभूवन्। तेषां प्रत्नत्वे किमप्याह ऐतरेयब्राह्मणः—

गर्भा वै एते उक्थानां यन्निविदः।
पेशा वै एते उक्थानां यन्निविदः। ३१०-११९

उक्थानि तु साममन्त्रा एव। अतएव विश्वदेवनिविदस्तु जगतामादि ग्रन्थात् सामवेदादपि प्राचीना एव इति ज्ञेयम्। तथाहि ऋग्वेदः—

स पूर्वया निविदा। २-८६-१म।
वेदा ऋषिप्रणीताः।

अथ स्वर्गात् भारतागता देवाख्यब्राह्मणा अपि बहून् वेदमन्त्रान् व्यरचयन्। तत्र प्रमाणं—

मिमीहि श्लोक मास्ये। १४-३८-१म

भो ऋत्विक् त्वम् आस्ये सुखेन श्लोकं वेदमन्त्रं मिमीहि विरचय। (निर्म्मितं कुरु इति सायणः)। तथाहि—

अयं देवाय जन्मने स्तोमा
विप्रेभि रासया अकारि। १-२० सू-१म

अयं स्तोमः स्तुतिमन्त्रः देवाय जन्मने ऋभूणां मनुष्याणां गुणबलेन देवत्व प्राप्तिविषये विप्रेभिः विप्रैः मेधाविभिः कविभिः आसया सुखेन अकारि कृतः। तथाहि—

एष वः स्तोमोमरुतो हृदा तष्टः मनसा। २।१७१।१म

नव्यसी हृद आजायमानम् अस्मत् सुकीर्त्तिः मानुषासो जीजनन्त। ३-६०-१म।

तत्र सायणभाष्यम्—नव्यसी नव्यतरा सुकीर्त्तिः सुष्ठु कीर्त्तयित्री अस्मत् अस्माकं स्तुतिः हृदः हृदि अवस्थितात् प्राणात् (वस्तुतस्तु हृदयात्) जायमानम् उत्पद्यमानम्। तथाहि—

इदं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम। २-३५-२म।

तत्र सायणभाष्यम्—अस्मै अपांनपात्-संज्ञकाय देवाय हृदो हृदयात् सुतष्टं सुष्ठु निर्म्मितम् इमं मन्त्रं सुष्ठु आभिमुख्येन वोचेम ब्रवाम। तथाहि

इमं स्तोम मर्हते जातवेदसे
रथमिव सं महेम मनीषया भद्रा। १-८४सू-१म

अत्र सायणभाष्यम्—अर्हते पूज्याय जातवेदसे जातप्रज्ञाय अग्नये मनीषया बुद्ध्या इमम् एतत् सूक्तरूपं स्तोमं रथमिव संमहेम सम्यक् पूजितं कुर्म्मः। तथाहि—

ब्रह्माणि ससृजे वशिष्ठः। ४-१८-७म
गोतमो नव्य मतक्षत् ब्रह्म। १३-६२-१म
अकारि ते इन्द्र गोतमेभिर्ब्रह्माणि। ८-६३-१म
अर्बुदः काद्रवेयः सर्पऋषिः,
मन्त्रकृत्। ऐतरेयब्राह्मणं।
ब्रह्म कृण्वन्तो गोतमासः। ४-८८ सू-१म
ब्रह्म कुशिकास एरिरे। १५-२८-३म
इन्द्राय ब्रह्म जनयन्त विप्राः। १२-३१-७म
ब्राह्मणासः सोमिनो वाचमक्रत। ८-१०३-७म
उक्थं नवीयो जनयस्व। १५-१८ सू-६म
अश्विना कण्वासो वां ब्रह्म कृण्वन्ति। २-४७ सू-१म
भुवत् वीर्य्याय नोधाः। १४।६१-१म
इयं गोर्मान्दार्य्यस्य। १५।१६६।१म
मान्यस्य कारोः। ५।१७७।१म
एष वां स्तोमः अश्विनो अकारि मानेभिः। ५-१८४-१म।
मन्त्रकृतो बृहदुक्थादवाचि। ६।५४ ।सू६म।
ब्रह्म स्तोमं गृत्समदासः अक्रन्। ८-३८ सू-२म।
स्तोमैर्वर्द्धन्ति अत्रयः। ४।२२।५म
इमे हि ते ब्रह्मकृत आसते। २-३२-७म
इयं ब्रह्म इन्द्राय वज्रिणे अकारि। ८-८७-७म
इमं स्तोमं पुरुभुजा कृतं। १७-८-८म
नेन्द्रोअस्ति इति नेम उत्वाह १-८८ सू-८म
स्तोमं ते इन्द्र विमदा अजीजन्। ६-२३-१०म
इमा ब्रह्म बृहद्दिवः विवक्ति। ८।१२०।१०म

अतएव भारतीया ऋषयो मन्त्रप्रणेतार आसन् इति प्रमाणात् प्रतीयते। न केवलं ऋषय एव मन्त्रकृतः परन्तु राजानोपि बहून् मन्त्रान् व्यरचयन्। उक्तञ्च—

राजा शिविऋर्षि——तृचमष्टाविंशं सूक्तं

काशीराजः प्रतर्दन ऐन्द्रम् आद्य मानुष्टुभं,

वसुमनाः शिष्टे त्रिष्टु भौ उशीनरपुत्रः शिविर्नाम।

राजा प्रथमाया ऋषिः। काशीनामधिपतिः प्रतर्दनोनाम, द्वितीयायाः रोहिदश्वपुत्रः वसुमनानाम तृतीयायाः।

सुदासराजऋषिः—ययुर्दासा च हत्वा वृतमार्य्याणि च। सुदास

मिन्द्रावरुणा अवसा अवतं। १-८३-७म

दशराजानो समितः अयज्यवः,

सुदास मित्रावरुणा न युयुधुः। ७-८३-७म

महाराजः पृथुः—पञ्चर्चं विंशं सूक्तं वेनपुत्रस्य पृथोरार्षं।

इमा ब्रह्म इन्द्र तुभ्यं शंसि। ४

श्रुधि हवं इन्द्र पृथ्याः वैन्यस्य। ५-१४८ सू-१०म।

न केवलं ऋषयोराजानश्च मन्त्रप्रणेतारः। परन्तु पारशवो कक्षीवत्कवषौ शूद्रौ च मन्त्रप्रणेतारौ आस्ताम्।

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते।

कक्षीवन्तं य औशिजः। ५-७६ पृ। साम वेदः १-१८ सू-१म

तत्र सायणः—हे ब्रह्मणस्पते। एतन्नामक देव सोमानं अभिषवस्य कर्त्तारं माम् अनुष्ठातारं स्वरणं देवेषु प्रकाशनवन्तं कृणुहि कुरु। तत्र दृष्टान्तः—कक्षीवन्तम् एतन्नामकमृषिं इवशब्दः अत्र अध्याहर्त्तव्यः। कक्षीवान् यथा-देवेषु प्रसिद्धः तद्वत् इत्यर्थः। यः कक्षीवान् ऋषिः औशिजः, उशिजः पुत्रः। कक्षीवतोऽनुष्ठातृषु मुनिषु प्रसिद्धिः तैत्तिरीये राम्नायते।

प्रकृतार्थवाहिनी—हे ब्रह्मणस्पते वेदमन्त्राणा मधिपते इन्द्र! त्वं सोमानं सोमरसस्य अभिषवकर्त्तारं यज्ञानुष्ठातारं मां कक्षीवन्तं स्वरणं देवलोके परिचितं कृणुहि कुरु। यः कक्षीवानहं उशिजो पुत्रो दास्याः। उक्तञ्च

नीलकण्ठेन—अब्राह्मणान्विति दीर्घतमसः पुत्रेषु शूद्रायां जातेषु काक्षीवदादिषु ब्राह्मण्यादर्शनादिति भावः। १७-४७अ-अनुशासनपर्व टीका। पक्षान्तरे तस्यामुत्पन्नः कक्षीवान् नाम ऋषिः। १२-५१-१म सायणभाष्यम्।

ब्राह्मणशूद्राप्रभवाः पारशवा जन्मतः शूद्रा एव परन्तु मनुवचनात् (१०अ-६४) तथा बौधायनवचनाच्च प्रतीयते कक्षीवदादयः श्रेयसा ब्राह्मण्यं गताः संकीर्णचेतसो नीलकण्ठस्य वचनन्तु वेदमन्वादिविरुद्धमेव। उक्तञ्च

अयं कक्षीवतो महो मतिं विप्रस्य वर्द्धयत्। १०-२५ सू-१०म

तत्र सायणभाष्यम्—अयं सोमः कक्षीवतः एतदाख्यस्य ऋषेः महो महतो विप्रस्य मतिं प्रज्ञां वर्द्धयत् अवर्द्धयत्। तथाहि—

कक्षीवते शतहिमाय। ८-७४-८म

तत्र सायणः—शतहिमाय बहुगमनाय कक्षीवते स्तोत्रकारिणे एतन्नामकाय ऋषये। तथाहि—

स कक्षीवन्तं रेजयत्। १६-६१-१०म

स सोमः कक्षीवन्तमृषिं पर्व्वतमध्ये रेजयत् अकम्पयत्। तथाहि—

कक्षीवन्तं यदि पुनः। १।१४३।१०म

तत्र सायणभाष्यम्—कक्षीवन्तं दीर्घतमसः पुत्रं उशिक् प्रसूतमृषिं मन्दबुद्धिं सन्तं युवां पुनर्नवं पुनरभिनवप्रज्ञं कृणुथः अकृणुतं अकुरुतम्। (पश्य—७।११६सू-१म—सायणभाष्यं) तथाहि—

तत् वां शंस्यं पज्रियेण कक्षीवता। ६-११७-१म।

तत्र सायणः—(सूक्तमारभ्य)। इति पञ्चविंशत्यृचं द्वितीयं सूक्तम् औशिजस्य कक्षीवतमार्षम्। तथाहि—

अहं मनुरभवं, सूर्य्यश्च अहं कक्षीवान् ऋषिरस्मि विप्रः। १-२६-४म

तत्र सायणभाष्यम्—इदमादिमन्त्रत्रये अयं वामदेवः उत्पन्नतत्त्वज्ञानः सन् सार्वात्म्यं प्रदर्शयन् आह—अहं वामदेवः मनुरभवम् अहमेव सूर्य्यश्च विप्रो मेधावी कक्षीवान् दीर्घतमसः पुत्रः एतत्संज्ञक ऋषिरपि अहमेव अस्मि। तथाहि—

अस्य सोमेभिः औशिजः ऋजिश्वा

तत्र सायण:—औशिजः उशिजः पुत्र ऋजिश्वा। अतएव पारशवौ द्वौ भ्रातरौ कक्षीवद्दृजिश्वानौ मन्त्रप्रणेतारौ आस्तामिति। तथाहि—

अध श्रुतं कवषं वृद्धमप्स्वनु द्रुह्यं निवृणक् वज्रबाहुः। १२-१८-७म

अयं कवष इन्द्रेण जलमध्ये प्रक्षिप्तोऽभूत्। एष ऋषिर्न वा तत्र ज्ञायते। परन्तु कवषनामा कश्चित् पारशव इलूषपुत्रोऽपि ऋषिरासीत्। प्रावेपा इति चतुर्दशर्चं पञ्चमं सूक्तम् ऐलूषस्य कवषस्य आर्षम्। ३४सू।१०म प्रारब्धः।

नीलकण्ठवत् अन्येऽपि केचन ऋषयः सङ्कीर्णचेतस आसन्। दृश्यते ऐतरेये—

ऋषयो वै सरस्वत्यां सत्र मासत,
ते कवष मैलूषं सोमात् अनयन्।
दास्याः पुत्रः कितवः अब्राह्मणः
कथं नोमध्ये अदीक्षिष्ट इति तं
बहिर्धन्वोदवहन्। २१६ पृ

तत्र सायणभाष्यम्—भृग्वङ्गिरःप्रभृतय ऋषयः, कदाचित् सरस्वत्याम्, एतन्नामकनदीतीरे सत्रमासत। तदानीं तेषां मध्ये कश्चित् इलूषाख्य-पुरुषस्य पुत्रः कवषनामकः अवस्थितः अभूत् ते च ऋषयः तं कवषं सोमयागात् निःसारितवन्तः। अहो एतस्मादेव कालात् ब्राह्मणानाम् अधःपतनं समारब्धम्। परन्तु पूर्वं तावत् मुख्यगौण ब्राह्मणक्षत्रिय पारशवादयः सर्व एव मन्त्रकृतो महर्षय आसन्। उक्तञ्च महर्षिवायुना—

भृगुर्मरीचिरत्रिश्च अङ्गिराः पुलहः क्रतुः।
मनुर्दक्षो वशिष्ठश्च पुलस्त्यश्चेति ते दश॥
ब्रह्मणो मानसा ह्येते उद्भूताः स्वयमीश्वराः॥ ८८
प्रवर्त्तन्ते ऋषेर्यस्मात् महान् तस्मात् महर्षयः।
ईश्वराणां सुतास्त्वेते ऋषयस्तान् निबोधत॥ ८९
काव्यो बृहस्पतिश्चैव कश्यप औशनास्तथा।
उतथ्योवामदेवश्च अपोज्यश्चौशिजस्तथा॥ ९०
कर्दमो विश्रवाः शक्तिर्वालखिल्यस्तथा धराः।
इत्येते ऋषयः प्रोक्ता ज्ञानत ऋषितां गताः॥ ९१
ऋषिपुत्रान् ऋषिकांश्च गर्भोत्पन्नान् निबोधत।

वत्सरो नध्रुवश्चैव भारद्वाजस्तथैव च ॥ ८२
बृहदुक्थः शरद्वांश्च अगस्त्य औशिजस्तथा।
ऋषिर्दीर्घतमाश्चैव बृहदुक्थः शरद्वतः ॥ ८३
वाजश्रवाः सुवित्तश्च सुवाक् वेषपरायणः।
दधीचः शङ्खमांश्चैव राजा वैश्रवणस्तथा।
इत्येते ऋषिकाः प्रोक्ताः ते सत्यात् ऋषितां गताः ॥ ८४
ईश्वरा ऋषिकाश्चैव ये चान्ये च तथा स्मृताः।
एते मन्त्रकृतः सर्वे कृत्स्नतस्तान् निबोधत ॥ ८५
भृगुः काव्यः प्रचेतास्तु दधीचो ह्यात्मवानपि।
और्वोऽथ जमदग्निश्च विदः सारस्वतस्तथा ॥ ८६
आर्ष्टिषेणो ह्यरूपश्च वीतहव्यः सुमेधसः।
वैन्यः पृथुर्दिवोदासः प्रश्वारोऽग्टत्समान् नभः।
एकोनविंशदित्येते ऋषयो मन्त्रवादिनः ॥ ८७
अङ्गिरा वेधसश्चैव भारद्वाजोऽथ वाष्कलिः।
तथामृतस्तथा गार्ग्यः शैनी संकृति रेवच ॥ ८८
पुरुकुत्सोऽथ मान्धाता अम्बरीषस्तथैवच।
आहार्य्योथाजमीढ़श्च ऋषभो बलिरेव च ॥ ८९
पृषदश्वो विरूपश्च कण्वश्चैवाथ मुद्गलः।
युवनाश्वः पौरुकुत्सस्त्रसदस्युः सदस्युमान् ॥ १००
उतथ्यश्च भरद्वाजस्तथा वाजश्रवा अपि
आयाप्यश्च सुवित्तिश्च वामदेवस्तथैव च ॥ १०१
औशजो बृहदुक्थश्च ऋषिर्दीर्घतमास्तथा।
कक्षीवांश्च त्रयस्त्रिंशत् स्मृता अङ्गिरसो वराः।
एते मन्त्रकृतः सर्वे काश्यपांस्तु निबोधत ॥ १०२
काश्यपश्चैव वत्सारो विभ्रमोरैभ्य एव च।
असितो देवलश्चैव षड़ेते ब्रह्मवादिनः ॥ १०३
अत्रिरर्चिसनश्चैव श्यामावान् चाथ निष्टुरः।
वल्गूतको मुनिर्धीमान् तथा पूर्वातिथिश्च यः।

इत्येते चात्रय: प्रोक्ता मन्त्रकारा महर्षय: ॥ १०४
वसिष्ठश्चैव शक्तिश्च तथैव च पराशर:।
चतुर्थ इन्द्रप्रमति: पञ्चमस्तु भरद्वसु: ॥ १०५
षष्ठस्तु मैत्रावरुण: कुण्डिन: सप्तमस्तथा
सुद्युम्नश्चाष्टमश्चैव नवमोथ बृहस्पति:।
दशमस्तु भरद्वाजो मन्त्रब्राह्मणकारका: ॥ १०६
एते चैव हि कर्त्तारो विधर्म्मध्वंसकारिण:।
लक्षणं ब्रह्मणश्चैतत् विहितं सर्वशाखिनाम् ॥ १०७।५८म

न केवलं स्वर्गभारतवर्षीया एते पुमांसो (वर्णस्रष्टे: प्राक् जाता ऋषय: पुमांस:) ब्राह्मण पारशवादयश्च मन्त्रज्ञत: परन्तु विदुषीभारतीया जगल्ललामभूता महिला अपि वेदमन्त्रज्ञत आसन्।

१। शाश्वती ऋषि:—शाश्वती नारी अभिचक्ष्य आह सुभद्रं मर्य्य भोजनं बिभर्षि। ३४-१सू-८म

तत्र सायणभाष्यम्—शाश्वतीनाम अङ्गिरस: सुता नारी, तस्य आसङ्गस्य भार्य्या
२। प्रायोगि ऋषि:– स्त्रीहि ब्रह्मा बभूविथ। १८-३४-८म
तत्र सायणभाष्यम्—हे प्रायोगे! त्वं स्त्री सती ब्रह्मा (ऋत्विक्) बभूविथ।
३। अपालाऋषि:—सप्तचमेकादशसूक्तं अत्रे: पुत्री अपालाख्या. त्वग् दोषपरिहाराय अनेन सूक्तेन इन्द्रं स्तुतवती—अत: सैव ऋषि:।
अत्रिसुता—अपाला ब्रह्मवादिनी इति सायण:। ९१ सूक्त-८म

खेरथस्य खेऽनस: खेयुगस्य शतक्रतो।
अपालामिन्द्र त्रि: पूत्वी अकृणो: सूर्य्यत्वचम् ॥ ७।८०।८ म

४। रात्रीऋषि:—रात्री व्यख्यत् आयती पुरुत्रा १-१२७-१० म
तत्र सायणभाष्यम्—भरद्वाजस्य सुता रात्र्याख्या अस्य सूक्तस्य ऋषिका। तथाहि—

५। घोषा पारशवी—घोषायै पितृषदे दुरोणे। ७-११७ सू-१म
तत्र सायणभाष्यम्—घोषा नाम ब्रह्मवादिनी, कक्षीवतो दुहिता, तथाहि—
युवां ह घोषा परि अश्विना यती,

राज्ञ ऊचे दुहिता पृच्छे वाम् । ५-४०-सू-१०म

तत्र सायणः—राज्ञो दीर्घस्य (न खलु नृपस्य) कक्षीवतो दुहिता पुत्री घोषा घोषाख्या अहमूचे ।

रथं यातमिति चतुर्दशर्वं एकादशं सूक्तं काक्षीवत्या घोषाया आर्षम् आगतमाश्विनम् ।

अतएव वेदमन्त्रा देवमनुष्यनरनारीपारम्पर्यपारगवीकृता इति सिद्धमेव प्रमाणात् । न वेदा भगवत्प्रणीता स्तत्प्रत्यादिष्टैर्ऋषिभिश्च वेदानां भ्रान्ति-प्रमादादिदुष्टत्वादिति ।

एवं पथ्या स्वस्तिः पथ्या रेवती (एते अपोगस्थाननिवासिन्यौ) श्रुतकीर्त्ति विश्ववारा अन्याश्च बह्व्यः) ब्रह्मवादिन्य ऋषिकन्यका आसन् बाहुल्यभयात् न तासां कथा विवृता इति ।

वेदा नित्या न वा

अनित्यदेवमनुष्यकृता वेदा अनित्या एव, तथापि कुसंस्कारान्धानां भ्रम-निरसनार्थं किमपि निवेद्यते ।

वेदाः नित्या उत अनित्याः वा ? "कारणगुणाः कार्यगुणमारभन्ते" । वेदाः वर्णशब्दमयाः, चेत् वर्णाः शब्दा वा नित्याः स्युः तर्हि, वर्णात्मकाः शब्दात्मकाश्च वेदा अपि नित्याः भवेयुः ? परन्तु वर्णानां शब्दानां वा नित्यत्वं न प्रमाणात् युक्त्या वा सिध्यति इति ।

सत्यमेतत् दार्शनिकाः शब्दानां नित्यत्वसिद्धार्थं किमपि उक्तवन्तः । परन्तु न सहजज्ञानात् तत् सर्वं विसंवादशून्यमिति प्रतीयते युक्तिविरुद्धत्वात् ।

वर्णाः शब्दानां ध्वनिप्रकटनार्थं साङ्केतिकं चिह्नमेव । ते तु इन्द्रचन्द्रशिवै रुद्भाविता एव इति श्रुतिवचनात् प्रमीयते । उक्तञ्च छान्दोग्ये—

सर्वे स्वरा इन्द्रस्य आत्मानः,
सर्वे ऊष्माणः प्रजापतेरात्मानः,
सर्वे स्पर्शा मृत्योरात्मानः । १३२ पृ छोटाश संस्करणं

किमनेन आयातं ? सर्वे अकारादयः चतुर्दश स्वरा देवराजेन इन्द्रेण उद्भाविताः । प्रजापतिना चन्द्रेण च—

ग घ स ह

एतत् उष्मवर्णचतुष्टय मुद्भावितम्। नन्तुमना भगवता शिवेन च—

सर्ववर्णाः ककारादयः यरलवाश्च

उद्भाविताः। अतस्तेषामुत्पन्नानां वर्णानां न नित्यत्वं स्वीकृतं भवति एव। कथं प्रजापतिशब्देनात्र चन्द्रो गृहीतः, मृत्युशब्देन वा कथं शिवः, परन्तु न यमो गृहीतः? चन्द्रस्य चान्द्रव्याकरणमासीत्, अतः अत्र चन्द्रएव स्वीकृतः। शिवस्यापि माहेशव्याकरणस्य विद्यमानत्वात्—उक्तञ्च—

यान्युज्जहार माहेशात् व्यासो व्याकरणार्णवात्।
तानि किं पदरत्नानि सन्ति पाणिनिगोष्पदे॥

पक्षान्तरे यमस्य व्याकरणं नासीत् इत्येव प्रसिद्धिः। उक्तञ्च शिक्षायन्थेषु

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते स्थिताः

अतएव अत्र जगति त्रेतायुगस्य इन्द्रचन्द्रशिवा एव आदिमा अक्षरोत्पादका इति श्रेयम्।

अस्तु तावदेतत्, परन्तु शब्दा एव नित्या भवन्तु? तदपि न। यतः शब्दा अपि ध्वन्यात्मकाः। ध्वनिरपि व्यक्तश्च अव्यक्तश्च उत्पन्नत्वात् न नित्या एव। कथं? यतो यदा वायौ अभिघातसाधनस्य हस्तलगुडादेः वाग्यन्त्रस्य वा अभिघातो भवेत् तदेव अव्यक्तध्वनेर्व्यक्तध्वनेश्च उत्पत्तिर्भवति। चेदेवं तर्हि कथं तादृश-ध्वन्यात्मकाः शब्दाअपि नित्या भवेयुः, मन्त्रवर्णादपि शब्दानां नित्यता निराकृता एव स्यात्—

न मृत्युरासीत् अमृतं न तर्हि
न रात्र्या अह्न आसीत् प्रकेतः।
आनीदवातं स्वधया तदेकं
तस्मात् हान्यत् न परः किञ्चनास॥ २-१२९—१०म

सृष्टेः प्राक् केवलं तत् एकं ब्रह्म आसीत्, स तु परमेश्वरः अवातं वायोरपि अभावात् आनीत् प्राणात् स्वधया अन्नेन च विना (स्वधया स्वशक्त्या वा)। प्राणधारणं कुर्यात् चेदेवं यदा सृष्टेः प्राक् वायोरपि अभावः आसीत् तर्हि तदा अभिघातसाधनवस्त्वादीनामपि अभावात् शब्दानामपि अभाव एव आसीत्।

अतएव सृष्टेरनन्तर मेव ये शब्दा उत्पन्ना उत्पन्नत्वात् तेषां नित्यत्वमपि निराकृतं तावत्। अतएव शब्दमयवेदमन्त्रादयोपि अनित्या इति श्लोकार्थं भवेत्।

शब्दाः अग्न्यादयः पदार्थाश्च सूक्ष्मरूपेण भगवति लीना आसन्, ततः सृष्टे-रनन्तरं प्रसुप्तानां तेषां जागर्त्तिरभूत्, अतएव न कथम् शब्दाः पदार्थाश्च नित्या स्युः? मैवं। यतः श्रुतिरेवं निर्द्दिशति—

असत् वै इदमग्र आसीत्
ततो वै सत् अजायत,
तत् आत्मानं स्वयमकुरुत। ७८ पृ—तैत्तिरीयोपनिषत्।

पूर्व्वमिदं सर्व्वं मसत् आसीत्, ततः असतः सत् ब्रह्म अजायत। केन प्रकारेण? तत् ब्रह्म स्वयम्भु स्वयमेव आत्मानमसृजत्। तथाहि—

असन्नेव भवति। असत् ब्रह्म इति वेद चेत्।
अस्ति ब्रह्म इति चेत् वेद। ऐ ६८ पृ
सूक्ष्ममिति सूक्ष्मविदः स्थूल इति च तद्विदः,
मूर्त्त इति मूर्त्तविदो अमूर्त्त इति च तद्विदः। १०७ पृ
सृष्टिरिति सृष्टिविदः लय इति च तद्‌विदः। १०८
माण्डूक्योपनिषत्

एतावता किमायातं? यत् श्रुतिरपि इति वक्तुं निर्द्दिशितुं वा न शक्ताऽभूत् अतएव सर्वाणि वस्तूणि शब्दादयश्च सृष्टेः प्राक् ब्रह्मणि सूक्ष्मभावेन लीना आसन् एतत् न युक्तं, श्रुते रपि तत् अगम्यत्वात्।

अथवा यदि तथापि अन्धाः एवं वदन्ति, शब्दा वर्णाश्च नित्याः तर्हि शब्दानां समवायेन लब्धदेहा दाशरथेः पाञ्चालिका भारतचन्द्रस्य च विद्यासुन्दरादयोपि ग्रन्था नित्यशब्दमयत्वात् नित्या भवन्तु? तर्हि कथं भगवान् मनुरेव मुक्तवान्।

त्रयं ब्रह्म सनातनम्। २३—१अ

एतत्तु तस्य भगवतो मनोः श्रुतौ भक्तिप्रदर्शन मेव, अथवा सनातनं प्रत्नमिति श्रेयं। चेत् वेदा नित्या स्तत् कथं भगवता कपिलेनापि एवमुक्तम्—

न नित्यत्वं वेदानां कार्य्यत्वश्रुतेः।

वेदमन्त्राः कार्य्याः कृतका अतएव तेषां नित्यत्वं न, उक्तञ्च मीमांसाकारेण—

वेदांश्चैके सन्निकर्षं पुरुषाख्याः। २७—१ पा—१अ

तत्र शवरस्वामी—उक्तं चोदनालक्षणः अर्थः धर्म इति। यतो न पुरुषकृतः शब्दस्य अर्थेन सम्बन्धः। तत्र पदवाक्यात्मय आक्षेपः परिहृतः। इदानीं अन्यथा आक्षेप्स्यामः

पौरुषेया चोदनाः

इति वदामः। सन्निकृष्टकालाः कृतका वेदा इदानीन्तनाः, ते च चोदनानां समूहाः तत्र पौरुषेया स्युः वेदाः? असंशयं पौरुषेयाः चोदनाः। कथं? पुनः कृतका वेदा इति केचित् मन्यन्ते। यतः पुरुषाख्याः पुरुषेण हि समाख्यायन्ते वेदाः।

काठकं, कालापकं, पैप्पलादकं मौद्गलमिति।

नहि सम्बन्धादृते समाख्यानं, न च पुरुषस्य शब्देन अस्ति सम्बन्धः। अन्यतः

कर्त्ता पुरुषः कार्य्यः शब्दः

इति। ननु प्रवचनलक्षणा समाख्या स्यात् नेति ब्रूमः। असाधारणं हि विशेषणं भवति। एक एव हि कर्त्ता बहवोपि प्रब्रूयुः। अतः अस्मर्य्यमाणोपि चोदनायाः कर्त्ता स्यात्। तस्मात् न प्रमाणं चोदनालक्षणः अर्थो धर्म इति।

अनित्यदर्शनाच्च। २८ ऐ

तत्र शवरस्वामी—जननमरणवन्तश्च वेदार्थाः श्रूयन्ते—बवरः प्रावाहणिः अकामयत, कुसुरुविन्दः औद्दालकिः अकामयत, इत्येवमादयः। उद्दालकस्य अपत्यं गम्यते औद्दालकिः। यद्येवं प्राक् औद्दालकिजन्मनः नायं ग्रन्थः भूतपूर्व्वः एवमपि अनित्यता।

एताभ्यां प्रमाणाभ्यां वेदानां न कथमपि नित्यत्वं सिद्धं भवेत्, परन्तु निरस्तमेव स्यात्।

वेदा स्ये के कतिपय ऋषयः वेदान् अनित्यान् वदन्ति,

इति यत् जैमिनिना उक्तं तत्तु तस्य आत्मन एव अभिमतं समाजभयात् "एके वदन्ति" इति वाक्यच्छलेन व्यक्तीकृतम्। परन्तु

"केइ केइ वलेन"

एतस्तु निजाभिप्रायप्रकटनमेव कुर्व्वन्ति सर्वे वाक् कौशलेन। अहो अनेनैव जैमिनिना केवलं समाजभयात् पश्चात् सूत्रितं—

उक्तन्तु शब्दपूर्व्वत्वम्। २९ ऐ

तत्र शबरस्वामी—उक्त मस्माभि: शब्दपूर्व्वत्वम् अध्येतृणां। केवलम् आक्षेप-परिहारो वक्तव्य:, सोऽभिधीयते।

नैतत् साम्प्रतं। वेदशब्दा: पूर्वमेव आसन् इत्यनेन वेदानां नित्यत्वं न सिध्यति। यत: मीमांसादर्शनोपनिषद्-रचनाया: पूर्वमेव शब्दमया वेदमन्त्रा आसन्, परन्तु न सृष्टे: प्राक् इति। चेदेवं तर्हि कुतो वेदानामुत्पन्नानां नित्यत्वं स्यात्?

आख्या प्रवचनात्। ३० ऐ

तत्र शबरस्वामी—यदुक्तं कर्त्तृलक्षणा समाख्या, काठकादेति। तदुच्यते—नैयमर्थापत्ति:। कर्त्तृभिरपि ह्येनामाचक्षीरन् प्रकर्षेण वचनं अनन्यसाधारणं कठादिभिरनुष्ठितं स्यात्। तथापि हि समाख्यातारो भवन्ति स्मर्य्यते च—

वैशम्पायन: सर्व्वशाखाध्यायी कठ:
पुनरिमां केवलां शाखा मध्यापयांबभूव इति।

स बहु शाखाध्यायिनां सन्निधौ एकशाखाध्यायी अन्यां शाखा मनधीयान: तस्यां प्रकृष्टत्वात् असाधारणमुपपद्यते विशेषणम्।

सत्यमेतत्, कठमाण्डूक्यमुण्डकादय ऋषयो वेदमन्त्राणां या व्याख्या: कृतवन्त:, ता एव

तत्तन्नाम्ना उपनिषदाख्याम्

अगमन्। एतेन किं मायातं? न एतेन उपनिषदां नित्यत्वं सिद्धं स्यात् यत: ता अनित्यै रिदानीन्तनै: कठादिभिरेव प्रणीता अतएव अनित्या:। एवं वेदा अपि अनित्या: कृतकत्वात्। यत: मूलमन्त्रा अपि वरुणेन्द्र वशिष्ठादिभि: प्रणीता इति वेदेषु एव दृश्यन्ते। अतएव ऋषि-प्रणीता स्ते प्राचीना अपि वेदमन्त्रा; कथं नित्या भवेयु:?

परन्तु श्रुतिसामान्यमात्रम्। ३१—पै

तत्र शबरभाष्यम्—यच्च प्रावाहणिरिति तत्र। प्रवाहणस्य पुरुषस्य असिद्धत्वात्। न प्रवाहणस्य अपत्यं प्रावाहणि:। प्रशब्द: प्रकर्षे सिद्ध:। वहतिश्च प्रापणे, नतु अस्य समुदाय: क्वचित् सिद्ध:। इकारस्तु यथैवापत्ये सिद्ध:, तथा क्रियाया अपि कर्त्तरि। तस्मात् य: प्रवाहयति, स प्रवाहणि:। "बबर:" इति

शब्दानुकृतिः। तेन यो नित्यः अर्थः, तमेव एतौ शब्दौ वदिष्यतः। अत उक्तं "परन्तु श्रुतिसामान्यमात्रम्" इति।

अहो नितरामेव सत्यापलाप एव समाजभयात् जैमिनेः। एकमात्रस्वाधीनचेतसः सत्यवादिनस्य शबरस्वामिनोऽपि यदेतत् मिथ्याचरणमभूत् तदपि नितरां व्यथयति तत्रत्यान् अस्मान्। दृश्यते तु छान्दोग्ये—

तदेतत् घोरआङ्गिरसः
कृष्णाय देवकीपुत्राय। २८० लोटाय

तर्हि किम् एतदेव स्वीकर्त्तव्यं जैमिनिनिर्देशात् यत् घोरनामा कृष्णनामा देवकीनाम्नी च न केऽपि आसन्, एतत्तु सर्वं श्रुतिसामान्यमात्रं ? तथाहि—

जानश्रुतिर्ह पौत्रायणः श्रद्धादेयः बहुदायी बहुवाक्यः आस। ४०१ लोटाय—

तत्र शङ्कराचार्य्यः—जानश्रुतिः जनश्रुतस्य अपत्यं, पुत्रस्य पौत्रः पौत्रायणः।

अत्र छान्दोग्यश्रुतिरेवं वदति पौत्रायणनामा कश्चित् वदान्योजन आसीत् तस्य पिता च जनश्रुति रिति।

तर्हि किमस्यापि जानश्रुतेरनित्यत्वं स्वीकार्य्यं भवेत्! तथाहि—

श्वेतकेतुर्हारुणेयः पञ्चालानां समितिमेयाय। तं ह प्रवाहणो जैवलिरुवाच।
५५२ पृ लोटाय

तर्हि किं जीवलतनयः प्रवाहणः औद्दालकिः श्वेतकेतुर्नाम च न कश्चित् आसीत् एते शब्दा निरर्थकाः कल्पिताश्च ? तथाहि

अयं वां कृष्णो अश्विना हवते। २
शृणुतं जरितुर्हवं कृष्णस्य स्तुवतः। ४-७४-८म
इमं स्तोमं पुरुभुजा कृतम्। १७।८।८म
ब्रह्म ते इन्द्र गीर्वणः क्रियन्ते। २-७९-८म
पुत्रः कण्वस्य वामृषिः गीर्भिर्वत्सो अवीवृधत्। ८-८-१५-८म

एतावता किमामातं ? कृष्णः, पुरुभुक्, इन्द्रः तथा कण्वपुत्रः वत्सो नाम केचित् नासन्। अथ यदि "श्रुतिसामान्यमात्रम्" इत्यस्य क्लिष्टसूत्रस्य बहुलार्थं करोषि, तदा कः पन्थाः ? तर्हि किं कृष्णनामा पुरुभुङ्नामा कण्वनामा वत्सनामा इन्द्रनामा च कोपि नासीदेव ? तत्र, अतएव जैमिनेरयं सिद्धान्तस्तु अयुक्त एव वेदप्रमाणात्। तथाहि—

इन्द्र यस्ते नवीयसीं गिरमजीजनत् । ५-८४-८म
स्तोमं ते इन्द्र विमदा अजीजनन् ६।-२३ सू-१०म
अयं कक्षीवतो विप्रस्य । १०-२५-१० सू
ये ते विप्र ब्रह्मकृत: । ७-५०-१०म
ब्रह्मकृतो अमृता: । ५-६६-१०म
इमां प्रताय सुष्टुतिं नवीयसीं वोचेयम् । १३-९१-१०म
अस्माकं गायत्रं नव्यांसं ४।२७-१म
नव्यसी हृद आजायमानम् ३-६०-१म
गोतमोनव्यमतचत् ब्रह्म । १३-६२-१म
ब्रह्म कृणोति वरुण: । १५-१०५-१म
इन्द्राग्नी युवभ्यां स्तोमं जनयामि नव्यं । २-१०९-१म
दीर्घतमामामतेयो जुजुर्वान् । ६-१५८-१म
य: स्तोमेभिर्वावृधे पूर्व्येभि: यो मध्यमेभिरुत
नूतनेभि: । १३-३२-३म
इन्द्र ब्रह्म क्रियमाणा जुषस्व नव्या: अकर्म सुकृता । १५।२९।५म
य: पूर्व्याभिरुत नूतनाभिर्गीर्भि: । १३-४४-६म
ये च पूर्वे ऋषयो ये च नूत्ना:,
इन्द्र ब्रह्माणि जनयन्त विप्रा: । ८-२२-७म
इदं ब्रह्म क्रियमाणं नवीय: १४-३५-७म
नवानि कृतानि ब्रह्म इमानि ६-६१-७म
अग्नि: पूर्वेभिर्ऋषिभिरीड्यो नूतनै रुत । २-१सू-१म

एतेन किमायातं ? वेदा युगे युगे येन तेनैव ऋषिणा प्रणीता:, प्राचीनैरर्वाचीनैर्वा । तर्हि वेदा नित्या इति कथमेव सङ्गच्छते उत्पन्नत्वात् नूतनत्वाच्च ? वशिष्ठादेरुत्पत्ते: प्राक् बहुमन्त्रा अन्यै: मरीच्यादिभि ऋषिभि: प्रणीता:, तेषामवरजैरपि बहुभि ऋषिभिर्मन्त्रा: प्रणीता अतएव इत्यं कृतका वेदा: नित्या इत्येव सिद्धं न भवति ।

पूर्वं तावत् सर्वे मानवा भाषाहीना एव आसन् । अद्यापि केनारिहोप-

वासिनां न कापि भाषा दृश्यते श्रूयते वा। मनुष्याणां भाषा न खलु भगवत्प्रदत्ता। उक्तञ्च तन्नहमोक्षमूलरेण—

We cannot tell as
yet what language is.
It may be a production of
nature, a work of human art,
or a devine gift.

Science of Language, Vol. 1, p. 3.

अर्थात् वयमेतत् वक्तुम् असमर्थाः यत् भाषा स्वभावप्रदत्ता, मनुष्यकृता, उत भगवत्प्रदत्ता वा। तथाहि—

Not as a production
of nature, but simply
as a work of human art. P. 29.

वस्तुतस्तु: भाषा न निसर्गादागता, परमेश्वरप्रदत्ता वा, परन्तु सा तु मनुष्यगणसृष्टा इत्येव प्रतीयते युक्त्या वेदवचनाच्च।

परन्तु कः के वा भाषाया उद्भावयितारः तत्तु मोक्षमूलरेण अन्यै र्वा पाश्चात्यैः कैरपि मनीषिभिर्नोक्तम्। तत्तु केवलं भारतीयै राचार्य्यैरेव परिज्ञातमभूत्। वेदा वदन्ति।

देवीं वाचमजनयन्त देवाः
तां विश्वरूपाः पशवो वदन्ति। ऋक्

अतएव देवाख्यभाजो ब्राह्मणा एव हिन्दुमुसलमानखृष्टानपार्सीना मपि पूर्वपुरुषा भाषाया उद्भावकाः। ततश्च कवित्वस्य उन्मेषः सर्वेषां मनसि अभवत् ततो मन्त्राः तैरेव प्रणीताः।

अतएव मनुष्यसृष्टे बहुकालादनन्तरं मनुष्यैः प्रणीता वेदमन्त्रा नित्या इति युक्तिविरुद्धत्वात् न सिद्धं भवति।

वेदाः अपौरुषेया न वा।

पुरुषः परमेश्वरः इति वैदिकाः वदन्ति, कपिलोपि एवमवददिति।

"सहस्रशीर्षा पुरुषः"। ऋग्वेदः

न च पौरुषेयत्वस्य तत्कर्त्तुः

पुरुषस्य (परमेश्वरस्य) अभावात् । कपिलः ।

पक्षान्तरे स्मार्त्तपौराणिकादयस्तु आप्ताः पुरुषशब्देन नरं मनुष्यं वा अवबोधयन् । उक्तञ्च भगवता मनुना—

तत् विसृष्टः स पुरुषो

लोके ब्रह्मेति कीर्त्यते । ११—१अ

तस्य पुरुषस्य नरस्य इदं "पौरुषेयं", तत्र भवति यत् तत् परमेश्वरकृतं तत्सम्बन्धीयं वा "अपौरुषेय"मिति । वेदाः पुरुषकृता उत ईश्वर-कृता ईश्वरप्रत्यादिष्टै ऋषिभिर्वा इत्येव अत्र निर्णेतव्यम् ।

तस्मात् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।

छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥ ८-९० १०म

तत्र सायणः—"सहस्रशीर्षापुरुषः" इत्युक्तत्वात् परमेश्वरात् यज्ञात् यजनीयात् पूजनीयात् सर्वहुतः सर्वैः हूयमानात् । यद्यपि इन्द्रादय स्तत्र तत्र हूयन्ते तथापि परमेश्वरस्यैव इन्द्रादिरूपेण अवस्थानात् अविरोधः । तथा च मन्त्रवर्णः

इन्द्रं मित्रं वरुणमग्निमाहुः

अथो दिव्यः स सुपर्णो गरुत्मान् ।

एकं सत् विप्रा बहुधा वदन्ति,

अग्निं यमं मातरिश्वान माहुः ॥ ४६-१६४-१म

उपोद्घातप्रकरणादौ श्रीमता सायणाचार्येण तु एवमेव विवृतं । परन्तु नैतत् समीचीनं युक्तिविरुद्धत्वात् वेदविरुद्धत्वाच्च । केन प्रकारेण वेदमन्त्रा समुत्पन्नाः तदस्माभिः प्रदर्शितं, तत्र किं वेदा प्रमाणं स्यात् उत सायणव्याख्यानं ? उद्धृतस्य पुरुषसूक्तान्तर्गतमन्त्रस्य किं प्रकृततात्पर्य्यं तदपि अस्माभिरवाचि । वेदा यज्ञादुत्पन्ना न, परन्तु यज्ञाय उत्पन्ना स्तदपि वयं वेदमन्त्रैरेव सप्रमाणं कृतवन्तः । मनुरपि अवदत् "दुदोह यज्ञसिद्ध्यर्थं" । हरिवंशमपि अवोचत् ।

ऋचो यजूंषि सामानि निर्म्ममे यज्ञसिद्धये ।

साध्यास्तैरयजन् देवान् इत्येव मनुश्रुतमः ॥

इन्द्रादयश्च देवाः परमेश्वरविशेषाः इत्यपि प्रामादिकं सर्व्वशास्त्रविरुद्धत्वात् विवेकविरुद्धत्वाच्च इन्द्रमित्रवरुणविवस्वत्पूषविष्णुब्रह्मादयो रुद्राश्च कश्यप-

सन्ताना: ते कथं परमेश्वरपदवाच्या भवेयु: अयमपि वेदमन्त्र: प्रामादिक:। वस्तुतस्तु "यज्ञात्" यज्ञार्थं। वेदमन्त्रा ऋषिभिर्जननमरणशीलैरेव प्रणीता न तु भगवतेति। तर्हि कथं बृहदारण्यके एवमुक्तमास्ते:—

अरे (मैत्रेयि) अस्य महतो भूतस्य निःश्वसित मेतत् यत् ऋग्वेदो यजुर्वेद: सामवेद: अथर्व्वाङ्गिरस इतिहास: पुराणं विद्या उपनिषद: श्लोका सूत्राणि अनुव्याख्यानानि व्याख्यानानि अस्य एव एतानि सर्व्वाणि निश्वसितानि। ४५१—४५५

एवमेव, परन्तु एतत् सर्व्वं केवलं भक्तिप्रकटनमेव नतु परमार्थत: याज्ञवल्क्ये न इतुयक्तं यद् वेदा अपौरुषेया इति। तर्हि किं पुराणान्यपि ब्रह्मवैवर्त्तादीनि अपौरुषेयाणि उत ? इत्थं भक्तिवशात् अन्धविश्वासवशाद्वा वायुप्रभृतिभिश्च पुराणेष्वपि उक्तं—

प्रथमं सर्व्वशास्त्राणां पुराणं ब्रह्मणा स्मृतम्।
अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिःसृता:॥ ५४—१म
अङ्गानि धर्म्मशास्त्रञ्च व्रतानि नियमा स्तथा।
पशूनां पुरुषाणाञ्च सम्भव: परिकीर्त्तित:॥ ५५—१म

परमेश्वरात् तिर्य्यङ्मनुष्यादीनां सर्व्वेषामपि वस्तूनाञ्च उत्पत्तिरभूत् इति तु आप्तजनस्वीकृतं सत्यं। परन्तु वेदास्तु तत्रापि संशयमनाटयन्—

इयं विसृष्टिर्यत आ बभूव,
यदि वा दधे यदि वा न। ७—१२८—१०म

परन्तु यानि वस्तूनि तावत् कृत्रिमाणि गृहचित्रघटपटादीनि पुस्तकानि वा तान्यपि साक्षात्सम्बन्धे भगवत्कृतानि एवं न। वेदा अपि कृतकत्वात् न भगवत्कृता इति बोध्यम्। वेदमन्त्रा ऐतिह्यगर्भा:। अतएव

पुराणं प्रत्नम्

एवं केचन वदन्तु वा, परन्तु यानि पुनर्वामनकूर्मवायुविष्णुमार्कण्डेयादिभिर्विरचितानि तान्यपि वेदेभ्य: प्रत्नानि इति न। अथ वेदा: कस्यापि ब्रह्मणो वक्त्रचतुष्टयात् प्रसूता इति युक्तिप्रमाणविवेकविरुद्धत्वात् न विश्वास्य मिति। उक्तञ्च श्रीमता पराशरेण—

न कश्चित् वेदकर्त्ता च
वेदस्मर्त्ता चतुर्मुखः ।

एवं चेत् तर्हि चतुर्मुखस्यापि ब्रह्मणो वेदकर्त्तृत्वं वेदानां प्रभवत्वञ्च तस्य निराकृत मेव स्यात् ।

वेदा हरेर्वाक्

कल्किपुराणस्य एतदपि वचनं भक्तिमूलकं न पुनर्युक्तिमूलक मेव वेद विरुद्धत्वात् । यतः सर्वे वेदमन्त्राः प्रायेण त्रैगुण्यविषयाः क्वचित् हिंसा, क्वचित्-द्वेषः, क्वचित् भ्रान्तिः क्वचित् संशयः, क्वचित् प्रमादो वा, तेन तादृशानि वेद-वाक्यानि "हरेर्वाक्" इति वक्तुं न युज्यते । वदति तैत्तिरीय ब्राह्मणम्—

प्रजापतिः सोमं राजानमसृजत तदनु त्रयोवेदा असृज्यन्त । २।३।१०।१ इत्थं प्रमाणजातमपि एवं न समर्थयति यत् परमेश्वरेण वेदाः प्रणीता इति । वस्तुतस्तु एष प्रजापतिः न स्वयं परमेश्वरः परन्तु स तु सुरज्येष्ठो ब्रह्मा एव । स हि जेष्ठः अदितिनन्दनः । स सोममत्रिनन्दनं राज्ये अभिषिच्य तदनु अग्न्या-दिभिऋषिभिर्वेदानां मन्त्रान् समाहरय्य त्रय्या देशप्रतिष्ठां चकार । उक्तञ्च—

ततः क्रमेण राज्यानि ददौ लोकपितामहः ।
नक्षत्रग्रहविप्राणां वीरुधाञ्चाप्यशेषतः । सोमं राज्येऽदधात् ब्रह्मा यज्ञानां तपसामपि ॥ १।२—२२अ—१ अंश विष्णुपुराणम्

अतएव अनेन वेदा ब्रह्मणा प्रजापतिना विरचिताः, ब्रह्मणा ईश्वरेण वा, एवं न सिद्धं भवति प्रतीयते वा । तथाहि शतपथम्—

स श्रान्त स्तपानो ब्रह्म एव
प्रथम मसृजत त्रयीमेव विद्याम् ।
त्रयोवेदा अजायन्त अग्नेऋग्वेदः
वायोर्यजुर्वेदः सूर्य्यात् सामवेदः ।

शतपथब्राह्मणमेव मवदत् एवं ऐतरेयब्राह्मणं छान्दोग्यश्रुतिरपि एवं व्यक्ती चकार । परन्तु एतासां श्रुतीनां तात्पर्य्य मीदृक् न, यत् परमेश्वरः वेदान् सृष्टवान् उत अन्यो वा । परन्तु सुरज्येष्ठब्रह्मणा आग्नदेशादेव अग्न्यादय ऋषयो वेद-मन्त्रान् समाहृत्य त्रयीं ग्रन्थाकारं प्रापयामासु र्न तु परमेश्वरः निश्वासेन वेदान्

असृजत् न वा वक्त्रादिभ्यश्च वेदा निःसृता इति। एतत् सर्व्वं वेदानामुत्पत्ति-स्थानप्रसङ्गेषु सविशेषं वक्ष्यते ।

वस्तुतस्तु वेदा नित्या अपौरुषेयाश्च इत्थं युक्तिविरुद्धं वाक्यं कदापि कस्यापि ऋषेर्मुखात् न निःसृतमिति। अथ सायणवत् कुल्लूकेनापि मनुटीकायां मुक्तम्—

सनातनं नित्यं वेदापौरुषेयत्व-

पक्षे एव मनोरभिमतम्। २३—१अ।

परन्तु मूलवचने एवं किमपि नास्त्येव यत् "वेदा अपौरुषेया" इति। गौतमादिभिरपि वेदाना मपौरुषेयत्वप्रतिपादनाय किमपि विहितमिति—

मन्त्रायुर्वेदवत् च तत्प्रामाण्यम्

आप्तप्रामाण्यात् ।

वेदमन्त्रा आप्तवाक्यानि, आप्तास्तु त्रिकालज्ञा अपरोक्षदर्शिन ऋषय एव न तु स्वयं परमेश्वरः। अतएव वेदा अपौरुषेया इति न गौतममतं। तन्मतन्तु वेदा आयुर्वेदादिवत् पौरुषेया इति। कुसुमाञ्जलिकारोऽपि श्रीमदुदयन एवं वदति—

वेदः पौरुषेयो वेदत्वात्

आयुर्वेदवत्। किञ्च वेदः

पौरुषेयो वाक्यत्वात् भारतवत् ।

वेदवाक्यानि पौरुषेयाणि

अस्मदादिवाक्यवत्। ४३पृः।

वस्तुतस्तु यदा पुरुषवरुणवशिष्ठादीनामेव वाक्यकदम्बकं वेदाः, तदाः तेषां पौरुषेयत्वे अनित्यत्वे वा का आशङ्का सन्देहोवा विवेकशीलानां ? किं बहुना स्वयं मुण्डकोपि श्रुतिकारः त्रिगुणविषयान् वेदान्

"अपरा विद्या"

इत्याचख्यौ। किं तेन उक्तं भगवता मुण्डकेन महता आस्तिकेन ?—

द्वे विद्ये वेदितव्ये

परा च अपरा च।

तत्रापरा ऋग्वेदो

यजुर्वेदः सामवेदः अथर्व्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो-ज्योतिष मिति। अथ परा यया तदक्षरमधिगम्यते। ८ पृः

अपरा अश्रेष्ठा ; परा श्रेष्ठा ।

कथं वेदादयः अपरा विद्या ? तैः त्रैगुण्यविषयपरैर्वेदैः अक्षरं ब्रह्म न अधिगम्यते, ते तु ऐतिह्यबहुला, नानागृह्यकथासनाथाः, हिंसाद्वेषभ्रान्तिकलुषिताश्च,तेषु धर्म्मतत्त्वं कदाचित् क्वचित् विवृत मस्ति,अतएव तेषामपरविद्यत्वमिति । न्यायमालाविस्तारप्रणेता सायणाग्रजो बुधाग्रणी माधवस्तु वुक्कमन्त्री वेदानामपौरुषेयत्वप्रतिपादनाय इत्युक्तवान्—

पौरुषेयं न वा वेदवाक्यं स्यात् पौरुषेयता ।
काठकादिसमाख्यानात् वाक्यत्वाच्चान्यवाक्यवत् ॥ ५३
समाख्याव्यापकत्वेन वाक्यत्वं तु पराहतम् ।
तत् कर्त्र नुपलम्भेन स्यात् ततोऽपौरुषेयता ॥ ५४

तत्र तस्यैव टीका—काठकं कौथुमं तैत्तिरीयकम् इत्यादि समाख्या तत्तद् वेदविषये लोके दृष्टा । तद्धितप्रत्ययश्च तेन प्रोक्तम् इत्यर्थे वर्त्तते, तथा सति व्यासेन प्रोक्तं वैयासकं भारतम् इत्यादाविव पौरुषेयत्वं प्रतीयते ।

किञ्च विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात् कालिदासादि वाक्यवत् इति प्राप्ते—

ब्रूमः—अध्ययनसम्प्रदायप्रवर्त्तकत्वेन समाख्या उपपद्यते । कालिदासादि ग्रन्थेषु तत्तत्सर्गावसाने कर्त्तार उपलभ्यन्ते । तथा वेदस्यापि पौरुषेयत्वे तत् कर्त्ता उपलभ्यते ? न च उपलभ्यते ।

अतो वाक्यत्वे हेतुः प्रतिकूलतर्कैः पराहतः । तस्मात् अपौरुषेयो वेदः ।२१५

एतत्पाठात् वयमतीव स्तम्भिता भवामः । पूर्वं तावत् माधवेन वेदानामपौरुषेयत्वसंसिद्धये ये द्वे वचने व्यरचयत्, ते तु नितरां कष्ट-कल्पनाप्रसूते । न च एतयोर्भाषापि विशदा, न वा तयोर्भावप्रकटनपद्धतिरपि सरला । वस्तुतस्तु

वेदा अपि भारतादिवत् पौरुषेयाः

इति भावं मनसि पोषयित्वा बलात् तद्विरुद्धमतं प्रकटयतो माधवस्य इयं स्वयमागता दुर्दशा सञ्जाता । अथ तत्क्लिष्टयुक्तिविरुद्धमतस्य समर्थनार्थं तेन या व्याख्या कृता, सापि सुतरां असारगर्भा । तां तु केवलं जड़बुद्धय एव स्वीकर्त्तुं समर्था भवन्ति ।

मनुसंहितारामायणमहाभारतादयो ग्रन्थाः पृथक् पृथक् ग्रन्थकारेण विरचिताः,अतस्तेषु तेषु ग्रन्थेषु कर्त्तूरचयितुर्वा नामनिर्देशः सम्भवत्। पश्चात्तरे भिन्न भिन्नयुगानां भिन्नभिन्नर्षीणां प्रणीतानां मन्त्राणां समाहारेण त्रय्यादयो वेदप्रतिष्ठां जग्मुः। ते वेदा न कस्यापि एकस्य ग्रन्थकारस्य वस्तुसम्पत् अतस्तेषु कथं कस्यचित् निर्दिष्टस्य रचयितु र्नामनिर्द्देशो भवेत्।

परन्तु कतिषु एव मन्त्रेषु तत्तन्मन्त्रप्रणेतुर्नाम संलक्ष्यते बहुषु एव वा न।

यथा—

इयं गोर्मान्दार्य्यस्य। १०।१६८।१म

कण्वा गृणन्ति आगहि। २।१४।१म

अश्विना कण्वासो वां ब्रह्म कृण्वन्ति। २।४७। म

अकारि ते इन्द्र गोतमेभिर्ब्रह्माणि। ८।६३।१म

ब्रह्म कृण्वन्तो गोतमासः। ४।८८।१म

बृहस्पते विश्वेषां जनिता ब्रह्मणामसि। २।२३।२म

ब्रह्म स्तोमं गृत्समदासो अक्रन् ८-३८-२म

ब्रह्माणि सस्रजे वशिष्ठः। ४।१८।७म

किमेतेषु मन्त्रेषु मन्त्रप्रणेतॄणां नामनिर्देशो न संलक्ष्यते चक्षुष्मद्भिः? तथाहि—

अयं देवाय जन्मने स्तोमो विप्रेभिरकारि आसया। १-२०-१म

किमत्रापि कर्त्तृनिर्देशो न उपलभ्यते? सत्यमेतत् एवं बहवो ग्रन्था विद्यन्ते येषां रचयितुर्नाम न ज्ञायते। भवतु तत् तेन का क्षतिः सामाजिकानामुत? एवं दृश्यते च

सङ्गीतमुक्तावल्यादिषु ग्रन्थेषु

बहूना मेव सङ्गीतकानां रचयितुर्नाम न परिज्ञायते, तेन किं स्यात्? तर्हि किं तत् सङ्गीतमुक्तावलीपुस्तकमपि अपौरुषेयम्।

पर्वतो वह्निमान् धूमात्

यदा मन्त्रो वर्त्तते,तदा तस्यापि कश्चित् प्रणेतापि आसीदेव। स च प्रणेता पुरुष एव ऋषिर्न तु असंस्कृतवित् अपारस्यवित् अहिब्रूवित् कश्चित् त्रिगुणातीतः परमेश्वर इति।

वेदो हरेर्वाक्, (कल्कि पुराणम्) ।
कोराण खोदा का कलम्
जेन्दाभस्ता अहुरमजदाका कलम्
Bible is the word of God.

एवं चेत् तर्हि कति एव परमेश्वराः सन्ति आसन् वा ? पूर्वं तावत् नवीनयुवा तरलमतिर्भगवान् यौवने सामवेदं प्रणिनाय । ततः पूर्णयौवनवेलायां तत्र प्रमादं दृष्ट्वा अनुतप्त ऋग्वेदं प्रणीतवान् । अथ काले तत्रापि प्रमादं संलक्ष्य अनुतापानलेन अर्द्धदग्धः परमेश्वरः प्रौढ़ावस्थायां यजुर्वेदं व्यरचयत् । अथ तत्रापि प्रमाद-सन्दर्शनात् अथर्ववेदं वेदानां वेदमुत्तमं विरचितवान् । तेनैव एकस्यैव परमेश्वरस्य भ्रान्तस्य वेदचतुष्टयेषु वैषम्यं दृश्यते । उक्तञ्च आप्तैः—

वेदा विभिन्नाः स्मृतयो विभिन्ना नासौ मुनिर्यस्य मतं न भिन्नम् ।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ॥

अथ अत्रापि नितरां प्रमादे सति वार्द्धक्ये वाइवेलं प्रणिनाय । अथ तत्रापि भ्रान्तिप्रमादादिकं दृष्ट्वा सञ्जातक्षोभः सलज्जो भगवान् सम्प्रतिपरः प्रमाद परिशून्यं कोराणं रचयामास ।

एवं चेत् तर्हि कथं कोराणादन्येषां भ्रान्तिजुष्टानां वेदादीना मपौरुषेयत्वं सङ्गच्छते ।

सृष्ट्यादौ एव समदर्शी दूरदर्शी च भगवान् जगतां सर्वेषां हिताय महान्तं सर्वोपकारिण मेकमेव अद्वितीयं जड़सूर्य्यं सृष्ट्वा सुदूरगगनतले विलम्बितवान् तेन एकेनैव सूर्य्येण समग्रस्य भूमण्डलस्य अन्धकारो दूरीक्रियते, उत्तापश्च प्रदीयते, हिन्दुमुसलमानखृष्टानेभ्यः । तत् कथं स एव अनन्तशक्तिः समदर्शी च परमेश्वरः एकमेव धर्मपुस्तकं प्रणीय सूर्य्येण सह न प्रलम्बितमकरिष्यत् यतः तत् पुस्तकं पठित्वा सर्वं एव जना स्वं स्वं कर्त्तव्यं निर्णेतुम् अशक्ष्यन् ।

भाषावर्णानामुद्भावनाना मनन्तर मेव वेदमन्त्राः आदिसर्गे देवैः प्रणीताः इत्येव वयं मन्यामहे । परन्तु कथं भगवान् सृष्टिसमकालमेव वेदान् न सृष्टवान् ? कथं केचिन्निरक्षरा आदिमवर्वरा वेदपाठसुलभज्ञानलाभे वञ्चिताः अभवन् ? केन हेतुना वा अज्ञानान्धकाराद्वतेषु आमेरिकाफ्रिकाइरियूरोपीयादिषु जनपदेषु दयालुः समदर्शी भगवान् न अवततार, न वा कथं तेषां हितार्थं

मेकमपि धर्म्मग्रन्थं तेभ्यः प्रदत्तवान् ? "ते तु उलूका इव ज्ञानालोकविहीना भवन्तु" इत्थमेव किं भगवतः अभिप्राय आसीत्।

"न शूद्राय मतिं दद्यात्"
अधीयीरन् त्रयो वर्णाः।

किं भारतीयब्राह्मणाइव भगवानपि सङ्कीर्णचेता आसीत् ? तत् कथं वेदेषु एव एवं दृश्यते औदार्य्यप्रकटनम्—

यामिमां कल्याणीं वाच मावदानि जनेभ्यो ब्रह्मक्षत्रियाभ्यां शूद्राय चार्य्याय चारणाय च। यजुः

एवं चेत् तर्हि किमेष परमेश्वरः समदर्शी कस्मिन्नपि शूद्रवत् काठिन्यं प्रयुक्तवान् इति सम्भवति ? वस्तुतस्तु वेदप्रमाणात् युक्त्या च वा इदमेव प्रतीयते यत् वेदाः पौरुषेयाः खलु—न वेदमन्त्रा भगवत्प्रणीताः तत्प्रत्यादिष्टैर्वा केश्चित् अतीन्द्रियार्थदर्शिभिः प्रणीता इति। अथ वेदेषु हिंसाद्वेषप्रमादसंशयादे र्विद्यमानतया च वेदा भगवत्प्रणीता इति न प्रतीयते।

अथ वेदेषु हिंसा—

योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः। यजुः—६८ पृ-

इन्द्र ब्रह्म-द्विषो जहि। जामिमजामिं प्रमृणीहि शत्रून् ५-४-४म

विजानीहि आर्य्यान् ये च दस्यवः। वर्हिष्मते रन्धय शासदव्रतान्। ८।५१-१म

प्रतिदह यातुधानान्। संदह यातुधान्यः। १४५ पृ—१म ख अथर्व।

ब्रह्मद्विषे क्रव्ये हन्तवे। ६७२ऐ—गन्धर्व स्याप्सरापते भिनद्मि मुष्क मपि। ७०८-पृ—ऐ

यथा नड़ं कशिपुने स्त्रियो भिन्दन्ति अश्मना। एवा भिनद्मि ते शेपो अमुष्या अधि मुष्कयोः २८१ पृ—२य ख अथर्व।

अनु दह सह मूरान् कयादो मा ते हेत्या मुचत दैव्यायाः। ४६ पृ-सामवेद। वेदचतुष्टयात् एतानि यानि अल्पसंख्यकानि प्रमाणानि उद्धृतानि किं तैः प्रमीयते वेदाः भगवद्वाक्यभूयिष्ठा उत साधारणनिष्करुणजनकठोरवाक्यबहुलाः ? कि—मेतानि भगवद्भाषितानि उत अधो विन्यस्तानि एतानि—वाक्यानि ?

क्षमासारा हि साधवः । वि: पु:
क्रुध्यन्तं न प्रति क्रुध्येत् आक्रुष्टः कुशलं वदेत् । मनु
नारुन्तुदः स्यात् आर्त्तोपि, न परद्रोहकर्मधीः । ऐ
समः स्यात् हिंसानुग्रहयोः । गौतमः
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् । मनु
उदारचरितानान्तु वसुधैव कुटुम्बकम् ।
समत्व माराधन मच्युतस्य ।

अतएव हिंसाद्वेषकलुषितानि पूर्वोद्धृतवेदवाक्यानि न कदापि भगवद्वाक्यानि न वा तानि पुनस्तेन प्रत्यादिष्टानामपि केषाञ्चित् साधना मिति ।

अथ वेदेषु संशयाः—को अस्य वेद प्रथमस्य अह्नः । ६।१०।६०म
जिज्ञासा च—को विराजो मिथुनत्वं प्रवेद ६६५ सू- १ख अथर्व
को ददर्श प्रथमं जायमानम् अस्थन्वन्तं यदनस्था बिभर्ति ।
भूम्या असुरसृक् आत्मा क्वस्वित् को विद्वांस मुपगात् प्रष्टुमेतत् ॥

को अद्धा वेद क इह प्रवोचत्.
कुत आयाता कुत इयं विसृष्टिः ।
अर्वाक् देवा अस्य विसर्जनेन
अथा को वेद यत आबभूव ॥ ६-१२९-१०म

किं स्वित् आसीत् अधिष्ठानम्
आरम्भणं कतमत् स्वित् कथासीत् ।
यतो भूमिं जनयन् विश्वकर्मा,
वि द्या मौर्णोत् महिना विश्वचक्षाः ॥ २
किं स्वित् वनं क उ स वृक्ष आस,
यतो द्यावापृथिवी निष्टतक्षुः । ४—८१—१०म
को अस्य वेद भुवनस्य नाभिं
को द्यावापृथिवी अन्तरिक्षम् ।
कः सूर्य्यस्य वेद महतो जनित्रं
को वेद चन्द्रमसं यतो जाः ॥ ५९क—२३ अ यजुः ।

पृच्छामि यत्र भुवनस्य नाभिः। ६१—ऐ
कास्वित् आसीत् पूर्वचित्तिः। ११—२३ अ। ऐ
अमी ये ऋच्चा निहितास उच्चा
नक्तं ददृश्रे कुहचित् दिवेयुः। १०—२४—१म

किमेते प्रश्ना भगवतः सर्वज्ञस्य स्वयं स्रष्टुरुत तत्प्रत्यादिष्टानां त्रिकालज्ञानां त्रिकालज्ञानामृषीणां वा? न किमेते अज्ञजनप्रश्ना जिज्ञासा वा संशयात्मिका? किं भगवान् सृष्टिकर्त्ताऽपि स्वयमेव कथमिदं जगत् सृष्टं तन्न जानाति? अथ यदि केषाञ्चित् अनभिज्ञजनाना मेतानि वाक्यानि स्युः—तर्हि एतद्भूयिष्ठा वेदा न खलु भगवत्प्रणीतास्तत्प्रत्यादिष्टैरतीन्द्रियार्थदर्शिभिर्ऋषिभिर्वा इति। कतमत् स्थानं, भुवनस्य नाभिः आदिजन्मभूमिः, का वा भूमि र्जगतामादिनिकेतनं पूर्वनिवासभूमिश्च, कुतः सूर्य्यचन्द्रयो रुत्पत्तिरभूत् केन प्रकारेण आत्मा जातः क एवं पृच्छति तेषु विषयेषु अज्ञादन्यः? तथाहि—

इदं जनासो विदथ महत् ब्रह्म वदिष्यति।

न तत् पृथिव्यां नोदिवि येन प्राणन्ति वीरुधः॥ १६६सू१म खण्ड अथर्व किमस्य मन्त्रस्य वक्ता स्वयं परमेश्वरः तत्प्रत्यादिष्टाः केचित् सर्वज्ञा ऋषयो वा यो वेदप्रणेता सर्वज्ञः परमेश्वरश्च, न आत्मनोऽधिष्ठानस्यापि अवस्थितिं न वेत्ति ये च ऋषय ईश्वरः कुत्र तिष्ठति तन्न विदन्ति। तथाहि—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
यो अस्य अध्यक्षः परमे व्योमन् सो अङ्गवेद यदि वा न वेद॥

कश्च एतस्य मन्त्रस्य निर्माता यः खलु केन इदं सर्वं विश्वब्रह्माण्डादिकं सृष्टं तत् न जानाति। न केवलं तत्, स तु रचयिता स्रष्टुरपि अस्तित्वे सन्दिहान एव आसीत्। अतस्तेन इत्युक्तं—यदि वा कश्चित् दधे सृष्टवान्, अथवा यदि वा न सृष्टवान्।

स ईश्वरः स्रष्टा कस्मात् समायातः किं कारणं ब्रह्मणस्तस्य

इति संशयं नाटयित्वा स मन्त्रप्रणेता मनसि व्यचिन्तयत् अथवा अस्य जगतो न कश्चित् स्रष्टा विद्यते, इदं सर्वं स्वयमेव प्रकृत्याः सम्भूत मिति।

क्षितिः सकर्त्तृका कार्य्यत्वात्

नैतत् मतं समूलकं समीचीनं विसंवादशून्यं वा। उक्तञ्च श्वेताश्वतरेण—

स्वभाव मित्येके कालमित्येके

एके ऋषयो वदन्ति प्रकृति रेव जगत्कारणम्। अथ अन्ये च वदन्ति कालो जगतो निदानं न तु ब्रह्म। अतएव यदि एतत् सर्वं मपौरुषेयं भगवद्वाक्यं स्यात्, तर्हि किं परमेश्वरस्य अनन्तप्रज्ञा रेव एषा मनसि अनवस्था जाता, उत तत्प्रत्यादिष्टानां केषाञ्चित् अतीन्द्रियार्थदर्शिनां त्रिकाल-ज्ञानां सर्वज्ञानामेव ऋषीणां ? तर्हि किं भगवान् स्वयमेव आत्मनः अस्तित्वे सन्दिहान आसीत्, उत वा ऋषय एव निरीश्वरा आसन्।

अथ वेदे विरोधः— इन्द्रः सूर्य्य मरोचयत्। ६—२ सू—८म

एतेन एतदेव व्यज्यते यत् कश्चित् इन्द्रनामा आसीत्। कोऽसौ ? स तु ईश्वरो वा अथ अदितिनन्दनविशेषो वा देवराजः। सायणेनापि व्याख्यातम्—

अयमेव इन्द्रः सूर्य्य मरोचयत् अदीपयत् तस्य असुरस्य वधेन प्रकाशितवान् दत्तजस्तु एव मनूदितवान्।

इन्द्र सूर्य्यके दीप्त करियाछेन।

अत एव एष इन्द्रः अभावपदार्थो न। तथाहि—

यदा सूर्य्य ममुं दिवि अधारयः। ३०-१६-८म

आ सूर्य्यं रोहयो दिवि। ७-७८-८म

त्वं सूर्य्य मरोचयो विश्वकर्म्मा

विश्वदेवो महान् असि। २-८७-८म

इन्द्रो दीर्घाय चक्षसे आ सूर्य्यं रोहयत् दिवि।

वि गोभि रद्रि मैरयत्। २-७सू-१म

अथ यदेवं मन्यसे विश्वकर्म्मा अयमिन्द्रः परमेश्वरः, स जड़ सूर्य्यं दिवि गगने संस्थापयामास, तर्हि एष इन्द्रः परमेश्वरः न तु अभावपदार्थः, अथ यदि मन्यसे अयमिन्द्रो बहुकर्म्मा देवश्रेष्ठो देवराजः अदितिनन्दनविशेषः स सूर्य्यं स्वभ्रातरं पणयो गा अपहृत्य कियद्दूरं गताः, तद्दर्शनाय आदिस्वर्गस्थितस्य कस्यचित् पर्वतस्य उपरितमारोहयामास। अथवा यद्वा भवतु एतयोरेकस्यापि इन्द्रस्य अस्तित्वं न वितथमेव। तथाहि—

इन्द्रो ब्रह्मा इन्द्र ऋषिः। १।१६।८म

इन्द्रो मुनीनां सखा। १४।१७।८म

इन्द्रस्य युज्यः सखा। १८।२२।१म

वशिष्ठस्य स्तुवत इन्द्रो अश्रोत्

इन्द्रवरुणा यदृषिभ्यो मनीषां वाचोमतिं श्रुतमदत्त मग्रे।

ते देवा इन्द्र मब्रुवन् इमां नो वाचं व्याकुरु इति।

भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः। मुण्डक

एतैरपि श्रौतप्रमाणै रामायणमहाभारतपुराणवचनैश्च इन्द्रस्य अस्तित्व मबाधसत्य मिति ज्ञायते। पश्चान्तरे एष विरोधश्च: ऋग्वेदेषु लब्धावसरः अभवत्—

प्र सु स्तोमं भरत वाजयन्तः
इन्द्राय सत्यं यदि सत्य मस्ति।
नेन्द्रो अस्तीति नेम उत्व आह,
क ईं ददर्श कमभिष्टवाम॥ ३-८९-८म

अनेन मन्त्रप्रणेता महर्षि नेमः इन्द्रस्य अस्तित्वे सन्देहं नाटयति। को जनः ईम् इमम् इन्द्रं ददर्श, प्रत्यक्षं दृष्टवान्? न कोपि। अयमिन्द्र आकाश-कुसुमविशेषः, कथं तस्य अभावपदार्थस्य स्तुतिः क्रियते? पश्चान्तरे ऋग्वे-दस्य अस्यैव अन्यः कश्चित् ऋषिर्वक्ति—

यं स्मा पृच्छन्ति कुह सेति घोरम्
उतेमाहुर्नैषो अस्तीत्येनम्।
सो अर्य्यः पुष्टीर्विज इवा मिनाति
श्रदस्मै धत्त स जनास इन्द्रः॥ ५।१२।२म

तत्र सायणः—स इन्द्रः कुत्र वर्त्तते, न क्वचिदसौ तिष्ठति इति मन्यमाना जनाः एनमिन्द्र माहुः "एष इन्द्रोनास्तीति, मन्त्रेनेन्द्रो अस्तीति नेम उत्व आहेति तस्मात् श्रदस्मै धत्त, इन्द्रः अस्ति इति विश्वासमेव कुरुत। तथाहि ताण्ड्यश्रुतिः—

ऋषयो वै इन्द्रं प्रत्यक्षं न अपश्यन्, तं वशिष्ठः प्रत्यक्षमपश्यत्। २०१ पृ।

न केवलं वशिष्ठः, भरद्वाजादयः सर्वे ऋषयः राजा दशरथश्च अर्ज्जुनादयश्च

दर्शः, गौतमपत्नी अहल्यापि इन्द्रस्य अस्तित्वे विश्वासवती आसीत्। अतएव नेमर्षेरुक्त्या किं प्रतीयते स खलु कश्चित् अनभिज्ञतम आसीत्, न पुनरतीन्द्रियार्थदर्शी साक्षात्कारधर्म्मा त्रिकालज्ञश्चेति। अतएव वेदमन्त्राः प्राज्ञैरज्ञैश्च बहुभि ऋषिभिरेव प्रणीताः, न ते स्वयं भगवत्प्रणीताः तत्प्रत्यादिष्टैर्वा मनीषिभिरिति।

वेदे भ्रान्तिः—किं वेदेष्वपि प्रमादः ? एतत्तु सनातनधर्म्मावलम्बिनां प्राचीनानामर्वाचीनानां वा पण्डितानां न सुसहमिति। परन्तु वयं किं करवाम, अत्र किं वेदा एव प्रमाणमुत वेदे अज्ञतप्रमाणां वेदेषु अन्धभक्तानां पण्डितानां वाक्यानि अन्धविश्वासो वा प्रमाणम् ?

"मुनीनाञ्च मतिभ्रमः"

अथ चेत् मुनीनामपि मतिभ्रमः स्यात्, तर्हि तन्मुनिगण-प्रणीतेषु वेदेष्वपि कथं मतिभ्रमस्य फलं प्रमादो भ्रान्ति र्वा न वर्त्तेत ? कश्चित् ऋषिर्वक्ति—

तमुष्टवाम य इमा जजान,

विश्वा॰जातानि अवराणि अस्मात्। ६—८५—८म

तत्र सायणः—परस्परं स्तोतारः आहुः तमु तमेव इन्द्रं वयं संहत्य स्तवाम स्तोत्रं करवाम॰ य इन्द्रः इमा इमानि भूतानि जजान जनयामास।

विष्णुः इन्द्रस्य युज्यः सखा। (१८।२२सू।१म) यदि एष वेदवादः सत्यगर्भः स्यात्, विष्णुरिन्द्रावरजः, यदि एतदमरवाक्यमपि सत्यमूलकं भवेत्

विष्णुर्वै काश्यपात्मजः। वायु

एतदपि वायुपुराणवचनं चेदलीकं न स्यात्। तथाहि—

एकादशस्तथा त्वष्टा विष्णुर्द्वादश उच्यते।

जघन्यजस्तु सर्वेषा मादित्यानां गुणाधिकः। १६-६५अ-आदिपर्व

विष्णुः—इन्द्रादीनां मध्ये कनीयानपि गुणैर्ज्येष्ठ आसीत्, चेत् इदमपि महाभारतवाक्यं मिथ्या न स्यात्, तर्हि काश्यपात्मजस्य विष्णोः ज्यायान् भ्राता सखा इन्द्रो नरदेवः सर्वेषां जगतां प्राणिनां च जनयिता स्रष्टा वा इति वेदवाक्यं कथं सत्यगर्भं प्रमादशून्यं वा भवेत् ? इन्द्रविष्णुशिवब्रह्मादयो देवाः किं स्रष्टा विद्वांसो नरा न वा ? अर्वाग् देवा अस्य विसर्ज्जनेन ? (६।१२९।१०म) किमेतेन देवानां सृष्टिकर्त्तृत्वं व्यज्यते, उत स्रष्टेरवरजत्वम्।

अतएव यस्मिन् मन्त्रे नरे इन्द्रे स्रष्टृत्वं समारोपितं सोऽसौ मन्त्रः किं भ्रान्तिदुष्टो न ? तथाहि—

अमी य ऋक्षा निहितास उच्चा
नक्तं ददृश्रे कुहचित् दिवेयुः।
अदब्धानि वरुणस्य व्रतानि,
विचाकशत् चन्द्रमा नक्तमेति॥ १०—२४सू—१म

द्वौ वरुणौ आस्ताम् एकस्तु अदितिनन्दनविशेषः, अपरस्तु मानवमनुष्यस्तु विशेषः (४२।६६अ आदिपर्व्व) एतौ उभौ एव देवमनुष्यौ नरौ, मरौ च। परमस्मिन् मन्त्रे अन्येषु च मन्त्रेषु अस्मिन् वरुणे ईश्वरत्वमारोपितं, यतो न कश्चिदेव वरुणश्चन्द्रनक्षत्रादीनां नियन्ता ईश्वरादन्यः, अतो भ्रान्तिरियम्।

उदगादयमादित्यो विश्वेन सहसा सह। १३-५०-१म

तत्र सायणभाष्यम्—अयं पुरोवर्त्ती आदित्यः अदितेः पुत्रः सूर्य्यः, विश्वेन सहसा सर्वेण बलेन सह उदगात् उदयं प्राप्तवान्।

अथ यदि एष सूर्य्यः अदितिनन्दनविशेषः सावर्णिमनोः पिता सामवेद मन्त्रसमाहर्त्ता स्यात्, तर्हि नायं मन्त्रो दोषसमाम्नातः। अथ चेत् अयं सूर्य्यः दिवाकरः स्यात्,तर्हि ब्रूमः मन्त्र एष नितरां भ्रान्तिकलुषित एव। यतः दिवाकरः सूर्य्यः अदितिनन्दनो न। तर्हि आदित्य इति विशेषणमपि तस्य निरर्थकं स्यात्। भूमण्डलात् चतुर्द्दशलक्षगुणेन वृहदायतनः कोऽपि जड़पिण्डः किं कस्या अपि महिलाया गर्भात् निःसर्त्तुं शक्यते। एतदाशङ्कापरिहारार्थमेव यास्केन उक्तम्—

आदित्यः कस्मात् ? आदत्ते रसान् आदत्ते भासं ज्योतिषाम्, आदीप्तो भासा इति वा। अदितेः पुत्र इति वा अल्पप्रयोगः। ५८७पृ

अस्तु तावदेतत्। परं वयं महामतिं यास्कमिति प्रष्टुकामाः, तस्य यास्कमहाशयस्य इत्यत्र कः पन्थाः ?

जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्।
ध्वान्तारिं सर्वपापघ्नं प्रणतोऽस्मि दिवाकरम्॥

अतएव अस्मिन् दिवाकरे जड़े सूर्य्ये कथमेतत् काश्यपेय-विशेषणम् समासक्तमुत ? एष जड़सूर्य्यः कस्यापि कश्यपस्यापत्यं न, तर्हि कथं तस्य "काश्यपेय" इति विशेषणम्, आदित्य इति विशेषणं वा!

वस्तुतस्तु यदा तु सर्वे सामाजिका वेदादिशास्त्राणां पठनपाठनयोरभावात् भ्रान्तिं गताः तदैव ते भ्रान्ताः सर्वे अयमेव जड़सूर्य्यो निरपराधः—

आदित्यः, विवस्वान्, पूषा, भगः, अर्य्यमाः मित्रश्च

इति स्थिरीचक्रुः। न केवलमेतदेव, अयोध्याराजवंशोऽपि अमुष्मात् जड़सूर्य्यात् समुत्पन्नः, इति स्थिरीकृत्य कविना उक्तम्—

"क्व सूर्य्यप्रभवो वंशः"

अथ सीतापि अस्य जड़पिण्डस्य कुलवधूरिति च स्थूला भ्रान्तिः सत्यस्य सिंहासनं समारूढ़ा। वस्तुतस्तु किं कश्चित् जड़पिण्डः कस्या अपि नार्य्या गर्भमुत्पादयितुं समर्थः स्यात्? एतत् सर्वं प्रमादादेव समागतम्। परमार्थं तस्तु अयोध्याराजवंश्याः सर्वे आदित्यस्य सूर्य्यस्य भ्रातुर्विवस्वत एव वंशधरा इति। उक्तञ्च तेनैव कविना—

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।

आसीत् महीक्षितामाद्यः प्रणवश्छन्दसामिव॥ रघु

अस्तु तावदेतत्, परं कथम् अथर्ववेदोपि एवं वदति—स वरुणः सायमग्निर्भवति, स मित्रो भवति प्रातरुद्यन्, स सविता भूत्वा अन्तरिक्षेण याति, स इन्द्रो भूत्वा तपति मध्यतो दिवः। २८०पृ—३य खण्ड।

अस्त्वेवं, परन्तु एतत्तु निरङ्कुशकविजनसुलभः अतिवादः, वरुणस्य माहात्म्यद्योतनार्थमेव एते मिथ्यातिवादा अवतारिताः। एषोऽपि मन्त्रः तस्मिन्नेव भ्रान्तयुगे प्रणीतः, यदा जड़सूर्य्यः आदित्यत्वं विवस्वत्त्वं, पूषत्वं भगत्वम् अर्य्यमत्वं मित्रत्वञ्च प्राप्य "सर्वदेवमयोहरिः" अभवत्।

प्रातरुदितः सूर्य्य एव मित्रः, मध्याह्नकालीनो दिवाकरः, इन्द्रः,

एतत् सर्वं भ्रान्तिविजृम्भितमेव। गगनं दिव् द्यौर्वा एषाऽपि भ्रान्तिः, तथा जड़सूर्य्यः सविता (जगत्-प्रसवकर्त्ता) इदमपि च भ्रान्तिविजृम्भणमिति। अनया भ्रान्त्या एव प्रणोदितो यास्कः अवदत्—

सविता व्याख्यातः। तस्य कालो यदा द्यौ रपहततमस्का आकीर्णरश्मिर्भवति। २६८ पृ। २य ख।

तत्र दुर्गाचार्य्यः—सविता इति वक्तव्यं। स पुनरेष व्याख्यातः। अभिधानतः एष पुनरादित्यः। तस्य कालो यदा द्यौरपहततमस्का आकीर्णरश्मि-

र्भवति। यदा यस्मिन् काले द्यौरेव अपहततमस्का भवति, न पृथिवी, पृथिव्यां तमो भवति। दिवि अपहततमसि विच्छिन्ना अस्यां रश्मयो भवन्ति स सावित्रः कालः। तस्मिन् काले आदित्यः "सविता" उच्यते। तस्य सवितुः तत्कालोपलक्षितस्य एषा ऋक्प्राधान्यस्तुति र्भवति। तथाहि सत्यव्रत सामश्रमिरमेशचन्द्रदत्तौ—

आदित्यगणसम्बन्धे पण्डितवर सत्यव्रत सामश्रमी एइ रूप लिखियाछेन। उषोदयेर परेइ प्रातःकाल, इहाकेइ अरुणोदय काल कहे। प्रातःकालेर परइ भगोदय काल। अर्थात् अरुणोदयेर परइ यखन सूर्य्येर प्रकाश अपेक्षाकृत तीव्र हइया उठे भग सेइ कालेर सूर्य्य। ये पर्य्यन्त सूर्य्येर तेजः अत्युग्र ना हय, तावत् तादृश स्वल्पतेजा सूर्य्यके पूषा कहे। अर्थात् पूषा भगोदयेर पर-कालवर्त्ती सूर्य्य। पूषोदयेर परइ, अर्कोदय काल, इहार परइ मध्याह्न। एइ कालेर सूर्य्यके अर्क वा अर्य्यमा कहे। एइ अर्य्यमार अन्तेइ पूर्वाह्न शेष हय। मध्याह्नकालेर सूर्य्यके विष्णु कहे।

किमत्र प्रमाणम्? न कथं वैदिककोषनिघण्टौ इत्थं किमपि विद्यते? कथं वा ऋक्सामयजुर्वेदेषु कश्चिदपि निगमश्च एतस्य न दृश्यते! न कथं लौकिक कोषकाव्यादिषु वा एतेषा मनुस्मृतिरपि न लक्ष्यते। यथा भ्रान्तिवशात् प्रयोजनवशात् वा सरस्वतीदयानन्देन क्वचित् क्वचिदुक्तम्।

इन्द्रः—जीवः, इन्द्रः—परमेश्वरः, इन्द्रः—विद्युत्

पूषा—सूर्य्यः, पूषा—परमेश्वरः

किं सामश्रमिणापि विदुषा तादृक् किमपि व्याहृतम्? इन्द्रश्चेत् मध्याह्नसूर्य्यः, स्यात्, तर्हि कथम् ऋग्वेदेषु एवं निगमो दृश्यते—

विष्णुरिन्द्रस्य युज्यः सखा?

इन्द्रो मुनीनां सखा?

वस्तुतस्तु अदितेरपत्यानि ब्रह्मभगार्य्यमत्वष्टृविवस्वत्पूषादीनि एव आदित्याः, न पुनरेष दिवाकरो, निरपराधोऽयं जड़पिण्डः। यास्कस्तु एतेषामपि आदित्यानां ब्रह्मादीनामस्तित्वमपि न स्वीकृतवान्। तेन उक्तम् "आदित्याः इति स्तुतिवादाः"। तर्हि कथं वेदरामायणमहाभारतपुराणादिषु अदितिनन्दना

एव आदित्या इति प्रसङ्गो दृश्यते! वस्तुतस्तु एषापि यथेच्छचारिणो यास्कस्य भ्रान्तिरेव।

अथ वेदेषु यदयं जड़दिवाकरः "सविता" इति विशेषणेन समलङ्कृतो ऽभूत् तदपि प्रमादादेव। यतः परमेश्वरं विना न कस्यापि मङ्गतोपि जड़पिण्डस्य जगत्-सर्ज्जने विसर्जने वा शक्तिरस्ति आसीत् वा।

उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्य्यो मानुषाणाम्।

चक्षुर्मित्रस्य वरुणस्य देव श्चर्मेव यः समविव्यक् तमांसि॥ १—६३—७म

क एष सूर्य्यः? अयमेव जड़सूर्य्यः, जगतां सर्वेषां मनुष्याणां चक्षुरिव (दिवीव चक्षुराततं) स्थितः। स तु गोलत्वात् वरुणस्य मित्रस्य वा चर्म्म (ढाल) इव, दृश्यते, एतत्तु कवित्वमात्रम्। स च जड़सूर्य्यः अन्धकारान् दूरीकरोति, उत्तापञ्च ददाति। परन्तु नायं जड़ो जगत्स्रष्टा जगत्प्रसविता सविता वा। अस्मिन् जड़े निरङ्कुशस्य वैदिककवेः सवितृत्वसमारोपणं प्रमाद इति।

उद्वेति (उत्—उ—एति) प्रसविता जनानां।

महान् केतुरर्णवः सूर्य्यस्य (सूर्य्यः)। २—६३—७म

तत्र सायणः—अयं सूर्य्यस्य सूर्य्यः (विभक्तिव्यत्ययः) उद्वेति उद्गच्छति। कीदृशोऽयम्? जनानां सर्वेषां प्रसविता सर्वेषु कर्म्मसु अनुज्ञाता।

अत्र स्वाधीनचेताः मनीषी कश्चित् सायणान्तेवासी एनं जड़पिण्डं जगत्-प्रसवितारं न अवदत्। मूलमन्त्रस्तु तदेव भावं पोषयति। अत उक्तम्—

नूनं जनाः सूर्य्येण प्रसूताः। ४—६३सू—७म।

तत्रापि तेन मनीषिणा व्याख्यातं—नुनं निश्चयं जनाः सर्वे प्राणिनः सूर्य्येण प्रेरकेण देवेन—प्रसूताः अनुज्ञाताः प्रेरिताः, (परन्तु न सृष्टा इति)। चेत् प्रसवितृपदेन सूर्य्यस्य दिवाकरस्य स्रष्टृत्वं नात्र व्यञ्जितं स्यात्, तर्हि कथं गायत्र्यामित्थं पदावली दृश्यते?

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि।

धियो यो नः प्रचोदयात्। १०—६२—३म

तत्र सायणः—सवितुः परमेश्वरस्य यद्वा यः सविता सूर्य्यः, तस्य सवितुः सर्व्वस्य प्रसवितुः सूर्य्यस्य।

वदतु तावत् सायण एतत्, परन्तु यदा अस्य सूक्तस्य (६२) अन्ये मन्त्रा

उदयास्त-गमनशीलजड़सूर्य्यपरा तदा गायत्रा अपि एतत् सवितृपदं जड़सूर्य्यपरमेव। जड़सूर्य्य एव जगत्प्रसविता इति धारणा भ्रान्तिर्व्वा तदा सर्वेषा मेव आसीत्। दृश्यतेच शतपथे—

स उत्पुनाति। सवितु र्वः प्रसव उत्पुनाति अच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिरिति सविता वै देवानां प्रसविता, तत् सवितृप्रसूत एव एतत् पुनाति।६१पृ

अतएव अयं नित्यदृष्ट उदीयमानो जड़सूर्य्यः—"जगत् प्रसविता" मतमेतत् वेदस्य प्रामादिकमेव। अस्यैव जड़सूर्य्यस्य जगत्स्रष्टृत्वनिरसनाय मनीषिणा मुण्डकेन काठेन च एतदुक्तम्—

भयादस्याग्निस्तपति भयात्तपति सूर्य्यः।

एष वह्निः उपास्यो न, एष जड़सूर्य्य उपास्यो न, यत एतौ मम ईश्वरस्य भयात् तपति उदेति च। एवं वेदोऽपि जड़सूर्य्यस्य स्रष्टत्वं ज्ञापयति—

चक्षुषः पिता मनसा हि धीरः १—८२—१०म

चक्षुषः जड़सूर्य्यस्य पिता स्रष्टा परमेश्वरः। अतएव अनेन मन्त्रेण च जड़सूर्य्यस्य स्रष्टृत्वं निराकृतं भवति। तथाहि—

नैतावदेना परो अन्यदस्ति उक्षासो द्यावापृथिवी विभर्त्ति।

त्वचं पवित्रं कृणुत स्वधावान् यदीं सूर्य्यं न हरितो वहन्ति॥ ८-३१-१०म

एतेन किमायातम्? यत् यदा अस्य सूर्य्यस्यापि जड़स्य न सृष्टिर्बभूव, तस्मादपि पूर्वमेव जगत्स्रष्टा परमेश्वरो बभूव। अतएव जड़सूर्य्यः जगत्-प्रसवकर्त्ता इति विश्वासः प्रामादिक एव। तथाहि—

यदा सूर्य्य ममुं दिवि शुक्रं ज्योतिरधारयः। १०।१२सू।८म

तत्र सायणभाष्यम्—हे इन्द्र! अमुं शुक्रं निर्मलं ज्योतिः द्योतमानं सूर्य्य मादित्यं दिवि द्युलोके जगतः प्रकाशनाय यदा यस्मिन् काले अधारयः।

यदि मन्त्रोदित एष सूर्य्यो जड़ः स्यात् तर्हि अयमपि मन्त्रः प्रामादिकः। यतः नर इन्द्रः जड़सूर्य्यस्य नियन्ता न। अथ यदि सूर्य्योऽयमिन्द्रभ्राता स्यात्, तर्हि मन्त्रप्रणेता प्रमादशून्यो भवेत्, परं सायणभाष्यमिदं प्रमाददुष्टमिति स्यात्।

अथ चेत् अथर्ववेदः प्रमादशून्यो भवेत् तर्हि तन्निर्देशानुसारेण इत्थेव बोद्धव्यं यत इन्द्र एव मध्याह्नकालीनः सूर्य्यः। पश्चात्तरे ऋग-

वेदस्य कश्चिदृषिरेव वदति यत् इन्द्र एव परमेश्वरः, स एव जड़सूर्यं गगने विलम्बितवान्। तर्हि किं ऋग्वेदो भ्रान्त उत अथर्ववेदः ?

वयं तु मन्यामहे एतौ उभावेव ऋषी भ्रान्तौ। यतो न इन्द्रो मध्याह्नकालीन-सूर्य्यः, न च अदितिनन्दन इन्द्रः दशरथसहायताभिक्षुरपि जड़सूर्य्यं गगने आलम्बितुं समर्थोऽभूत्।

एवं बह्वी भ्रान्तयो वेदेषु सन्ति, बाहुल्यभयात् न तत्सर्वं प्रदर्शितम्। एवं चेत् तर्हि तादृशा भ्रान्तिदुष्टा वेदा भगवन्निश्वसितानि इति न, न च ते भगवत्प्रत्यादिष्टैः कैश्चिदपि सर्व्वज्ञैर्वा प्रणीता इति।

अथ वेदे भौगोलिकप्रमादाः—वेदेषु गगनाकाशशब्दौ न विद्येते, उपनिषत्सु एव तयोर्भूरि प्रयोगो वर्त्तते। वेदेषु दिव्*द्यौश्च, एतत् शब्दद्वयं क्वचिद्वा स्वर्गार्थे प्रयुक्तं, क्वचिद्वा गगनार्थे प्रयुक्तं बभूव, तौ प्रयोगौ प्रामादिकौ। वस्तुतस्तु द्यौरादिस्वर्गः स्वः भौममिलावृतवर्षं, दिव् तु उत्तर महासागरगर्भे सद्य उत्पन्ना, महस्तपःसत्यलोकात्मिका, तथा सा च देवनिकेतन-मिति। किमत्र प्रमाणम् ?

ये नाकस्य अधि रोचने दिवि देवास आसते। ६—१८—१म

स्तोमेन हि दिवि देवासो अग्निमजीजनन्। १०-८८सू-१०म

दिवि रुद्रासो अधि चक्रिरे सदः। २-८५-सू-१म।

शृण्वन्तु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः।

१-१३सू-१०म

इन्द्र यासि दिव्यानि रोचना पार्थिवानि रजसा। २-३२-१०म

ते नव्यं नव्यं तन्तुम् आतन्वते दिवि समुद्रे। ४-१५८-१म

सूरिर्दिवि ते धियन्धाः सानो नाभिः परमा। १८-६१-१०म

ये दिव्यासो अप्सु ये। ८-६५-१०म दिव्या दिवि जाता इति सायणः।

ये देवासो दिवि एकादश स्थ,। ११-१३८-१म

दिवि अन्यः सदनं चक्रे उच्चा ४-४०-२म

---

* द्यो + सुप् = द्यौः, दिव् + सुप् = दिव् (हलात् लोलोपः)। "दिव औत्, दिवोत्वात्" पाणिनेरेतत् सूत्रद्वयं प्रामादिकमिति। द्यौर्दिवौ भिन्नत्वात्। यदा द्यावापृथिव्यौ उत्पन्ने, तदा दिव् न स्वर्गे परिणता बभूव। वस्तुतस्तु "हलात् सुप्लोपः द्यौर्वा", एते सूत्रे प्रमादशून्ये इति।

देवा विद्वांसो जनाः ब्राह्मणापरनामानो ब्रह्मादयस्ते दिवि आसन्, रुद्रास्तस्यामेव दिवि सदः सदनं चक्रिरे। तस्यामेव दिवि एकादश प्रधाना देवा आसन् पूषा अदितिनन्दनविशेष स्तस्यां दिवि उच्चं सदनं कृतवान्, देवमनुष्या द्यावापृथिवीभ्यां दिवि द्युलोके अन्तरीक्षे समुद्रे च नवं नवं तन्तुं वंशम् उपनिवेशार्थं प्रेरयामासुः। सा दिव् (परमार्थतः द्यौः) नाभानेदिष्ठस्य सूर्य्यस्य च परमा नाभिः पवित्रम् उत्पत्तिस्थानं, एवम्भूता दिव् अन्तरीक्षञ्च भूमिरुत गगनम्? दृश्यते च कोषेषु—

त्रिदिवं, त्रिपिष्टपं

अथ यदि दिव् गगनं स्यात् तर्हि किं तस्य शून्यस्य गगनस्य त्रिप्रभृति संख्यावाचकं विशेषणं भवेत्। वस्तुतस्तु महः—तपः सत्यम्, एतल्लोकत्रयं त्रिदिवं दिव् वा इति, न तु सा शून्यम्। तस्या एव दिवो नामान्तरं द्युलोक इति न तु द्यौः। पक्षान्तरे द्यौरादि स्वर्गः स्वः। तत्र प्रमाणम्—

दिवं च पृथिवीञ्च अन्तरिक्ष मथो स्वः। ३-१८०-१०म

अस्मिन् मन्त्रे लोकचतुष्टयस्य निर्देशो दृश्यते। के के ते लोकाः?

दिव्—द्युलोकः (साइविरिया)।

पृथिवी—भूः भारतवर्षम्।

अन्तरीक्षं—भुवर्लोकः, (तुरुष्क, पारस्य, आफगानिस्थान)।

स्वः—स्वर्लोकः द्यौः, (इलावृतवर्ष—मङ्गलिया)।

भाष्यकारः सायणस्तु स्वः पदं दिवो विशेषणं कृतवान्, तन्न। वस्तुतस्तु

पृथिवी, अन्तरीक्षं, स्वः, एते एव लोका भूर्भुवः स्वः।

पक्षान्तरे दिव्, "भूर्भुवः स्व"रिति महाव्याहृतिव्यतिरिक्तं स्वतन्त्रं किमपि नूतनं स्थानमिति गम्यते। तथाहि आम्ना वदन्ति—"द्यौः पिता पृथिवी माता"। परन्तु दिव्—न पिता, माता च न। सा तु अन्तरीक्षवत् दुहितेव। दृश्यते च

पञ्चपादं पितरं

द्वादशाकृतिं दिव आहुः। १२-१६४-१म

इत्यत्र पितुः, दिवश्च पृथङ्निर्देशवशात् दिव् पिता न, इत्येव गम्यते। दिव् पिता न, परन्तु पक्षान्तरे—

द्यौः—पिता, स्वश्च—पिता

तत्र प्रमाणम्—"द्यौः पिता पृथिवी माता" । तथाहि—

आयं गौः पृश्निरक्रमीत् असदत् मातरं पुरः प्रयन् च पितरं स्वः । (पितरं स्वः प्रयन् गच्छन्) । अतएव पिता द्यौः स्वश्च परस्परमभिन्नं, पक्षान्तरे अपिता दिव् भिन्ना । अतएव "द्योदिवी द्वे", अमरादीना मेष निर्देशः प्रामादिक इति । एवम्—

दिवस्परि प्रथमं जज्ञे अग्निः ।

एषोपि प्रयोगः प्रामादिकः । कथं ? यतो यदा स्वर्गे सर्वादौ अग्नेरुत्पत्तिः स्यात्, तदा दिवः सत्तापि नासीत् । उक्तञ्च तत् ऋषिभिः—

मही द्यावापृथिवी ज्येष्ठे, १।५६।४म

पूर्वजे द्यावापृथिवी, २।५२।७म

रोदसी (द्यावापृथिव्यौ) प्रत्ने मातरा । ७।१७।६म

कथं ? सर्वादौ एतौ जनपदौ स्वर्ग-भारतवर्षौ विना नान्यः कश्चित् जनपदो ह्यासीत् । तथाहि—

कतरा पूर्वा कतरा अपरा अयोः ।१।१८५सू।१म

तत्र सायणभाष्यम्—अयोरनयोर्द्यावापृथिव्योर्मध्ये कतरा पूर्वा पूर्वोत्पन्ना, कतरा वा अपरा पश्चाद्भाविनी ? तदपि उक्तम् ऋचि ।—

पिता एषां प्रत्नः ।३।७२सू।८म

एषां भूर्भुवःस्वरादीनां लोकानां मध्ये पिता द्यौरेव प्रत्नः पुरातनः । कृष्णयजुरपि वदति— । सुवर्गो वै लोकः प्रत्नः । ३८पृ

तर्हि पृथिवी तथा द्यौरेव सर्वेभ्यो ज्येष्ठे । द्यौः किं ? द्यौः पिता, द्यौरेव पिता स्वः ? अतएव द्यावापृथिवी—पिता द्यौः (स्वः) तथा पृथिवी, भारतवर्षं एतौ एव जनपदौ, न तु अपिता दिव् तथा पृथिवी च, एतयोः दिव्-पृथिव्योः समवायेन द्यावापृथिव्यौ (द्यावापृथिवी) पदं निष्पन्नम् अभूत् । परन्तुः द्यौः पृथिव्याश्च समवायेन द्यावापृथिव्यौ इति पदं निष्पन्न मिति । तर्हि कथं पाणिनिर्भगवान् एतत् सूत्रं विरचितवान् । "दिव औत्" । "दिवोद्यावा" इति ?

एव खलु तस्य भगवतः प्रमाद एव । यतो दिव् च पृथिवी च ते मिलित्वा "दिवस्पृथिव्यौ" इति पदं बभूव । स्वयं पाणिनिना एव—

दिवश्च पृथिव्याम् ।६।३।३०

इत्यनेनैव सूत्रेण तत् प्रतिपादितम्। अतएव दिव्+सुप्=द्यौः, इति न, परन्तु दिव्+सुप्=दिव्, इत्येव पदं भवेत्। तथा द्यावापृथिव्योः ज्येष्ठत्वात् दिवश्च अवरजत्वात् दिवोद्यावा।६।३।२८ इति सूत्रंच न साधीयो ऽभूत्, परन्तु "द्योर्द्यावा" इति सूत्रमेव साधु भवेत्। द्यावापृथिव्यौ स्वर्भारतवर्षे, नतु दिव् च भारतवर्षञ्च इति। पूर्वं तावत् भगवता परमेश्वरेण द्यावापृथिव्यौ स्वर्भारतवर्षौ सृष्टौ, तदनु भुवर्लोकः (अन्तरीक्षं) सृष्टः। उक्तञ्च तत् ऋचि—

ततः समुद्रो अर्णवः। १-१९०-१०म

ततस्तदनन्तरम् अर्णवः अर्णवात् अधि पश्चिमसमुद्रमध्ये अन्तरीक्षं (समुद्रः—अन्तरीक्षम् इति निघण्टुसायणौ) अजायत। तेन भुवनसंख्या स्तिस्र एव अभवन्

भूर्भुवः स्वः

तदा तु एतत् लोकत्रयं विना लोकान्तरं नासीदेव। तेनैव जड़सूर्य्यः एतेषां त्रयाणां लोकानामेव प्रसविता, इत्येव धारणासीत्, अतो गायत्र्यां पठ्यते—

भूर्भुवः स्वः तत्सवितुर्वरेण्यम्।

न केवल मेतत्, अग्निरपि एषु एव त्रिषु लोकेषु द्योतते, ददाति एतज्ज्ञानेनैव च केनापि ऋषिणा विहृतं—

आ पप्रिवान् रोदसी अन्तरिक्षम्। ८-७१-१म

हे अग्ने त्वं रोदसी द्यावापृथिव्यौ अन्तरिक्षञ्च आपप्रिवान् स्वतेजसा आपूरितवान् (सायणः)। तथाहि—

तं द्यौर्वेद तं पृथिवी, तमापः। ८-८८-१०म

यदा अथर्वणा अरण्योः संघर्षेन अग्निरुत्पादितस्तदा तमग्निं द्यौः आदि स्वर्गः स्वः, पृथिवी भारतवर्षम्, तथा आपः अन्तरीक्षञ्च वेद जानाति, नतु दिव्, यतः तदा दिवो जन्मापि नाभूत्। उक्तञ्च—

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत पद्भ्यां भूमिः। १४।९०।१०म

एतेन किं प्रकटितं ? भगवान् पूर्वं भुवः (अन्तरीक्षं), द्यां (स्वः), तथा भूमिं पृथिवीञ्च सृष्टवान्, न तु तदा दिव मसृजत्। तदेकदा एतल्लोकत्रयं विना चतुर्थः लोकः कश्चित् तु नासीत्। उक्तञ्च तदपि शतपथेन—

स यत् इमान् लोकान् अति चतुर्थं मस्ति वा न वा । ८४पृ

तत्र सायणभाष्यम्—इदानीन्तु इमान् त्रीन् लोकान् अति अतिक्रम्य यत् चतुर्थं स्थानं तदस्ति वा न वा इति सन्दिग्ध मेव । १०२ पृ । तथाहि—

यदु च इमान् लोकान् अति चतुर्थं ततः पुन र्न । १२६ पृ ऐ

तत्र सायणः—इमान् प्रागुक्तान् त्रीन् लोकान् अतिक्रम्य यत् चतुर्थं लोकजातम्, तत् अस्ति वा न वा इति सन्दिग्धम् । १५० पृ ।

एषा तु त्रिलोकी—भूर्भुवः स्वः, तत्र सा पृथिवी भूः,—अन्तरीक्षं भुवः,स्वः—द्यौः,—न तु दिव् । पूर्वं तावत् सर्वादौ जगति केवलं द्यौरासीत्, न तु पृथिवी भूर्वा भारतवर्षम्, तदा हिमालयोऽपि सागरगर्भे आसीत् । ततः पृथिव्यां उत्पन्नायां तया सह मिलित्वा द्यावापृथिव्यौ रोदसी वा अभवताम् । ततः भुवर्लोकस्य अन्तरीक्षस्य समुद्रस्य उत्पत्तौ ते सर्वे मिलित्वा "भूर्भुवः स्वः" इति "त्रिभुवनं" बभूव । ततः ऋतापरनाम्नः सत्यलोकस्य तथा रात्रीलोकस्य च उत्पत्तिरभूत् । उक्तञ्च तद्दचि—

ऋतञ्च सत्यञ्च ततो रात्री अजायत १।१८०।१०म ।

ततः—समुद्रादर्णवादधि संवत्सरो अजायत अहोरात्राणि विदधत् विश्वस्य मिषतोवशी । २।१८०।१०म

एताभ्यां मन्त्राभ्यां किं सिद्धम् ! इत्येव सिद्धं यत् उत्तरमहासागरगर्भे ऋतापरनामा सत्यलोकः, संवत्सराख्यः कश्चित् जनपदः, तथा रात्रीजनपदः, अहर्जनपदश्च उत्पन्नाः इति । एते संवत्सरादयः केचित् जनपदा इत्यत्र किं प्रमाणम् ?

कृष्णयजुरेवं वदति—संवत्सरः खलु वै देवानामायतनम् एतस्मात् वै आयतनात् देवा असुरान् अजयन्—८८ पृ ।

भगवद्गीतायामपि च एवं विद्यते—"अग्निर्ज्योतिरहः"—"धूमोरात्रिः" (२४।२५—८ अ), तथा प्रश्नोपनिषदि—अहोरात्रो वै प्रजापतिः ।१५ पृ । ऐतरेयब्राह्मणे च—अहर्वै देवा अश्रयन्त, रात्रिं मसुराः । ४४५ पृ

ततः सत्यरात्र्यहःसंवत्सराणां जनपदानां समवायेन दिव् संघटिता इति । अत एव अस्मिन् मन्त्रे ऋषिणा व्याहृतम्—

सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।

दिवञ्च पृथिवीञ्च मन्तरिक्ष मथोस्वः। १।१८०।१०म

ततः "भूर्भुवःस्वः" इति लोकत्रयेण सह दिव् मिलित्वा लोकचतुष्टयस्य देहप्रतिष्ठा मकारयत्। तेन भगवता विष्णुपुराणकारेण उक्तम्—

भूराद्यान् चतुरो लोकान् पूर्ववत् समकल्पयत्। ४८-४ष १म अंश

तर्हि क एते चत्वारो लोकाः? भूर्भुवः स्वः तथा दिव्। का दिव्? उक्तञ्च तत् महामतिना हलायुधेन ब्राह्मणसर्वस्वे—

दिव् शब्देन तु तदूर्द्ध महर्लोकादि लोकचतुष्टयम् *। १०५ पृ

अत्र महर्लोक एव संवत्सरलोकः (दक्षिण साइबिरिया) अहोरात्रो जनपदो तपोलोकः (मध्य साइबिरिया), ऋतं—सत्यलोकः (उत्तर साइबिरिया, उत्तरकुरुवर्षम्)।

* अतएव द्यौर्दिव् अभिन्ना इति न,परन्तु नितरां भिन्ना एव। तथा दिव् न गगनं, द्यौरपि च न गगनमिति, यतो द्यौः पिता सर्वेषां जनमानवानां पशुपक्षिणाञ्च आदिपितृभूमिः (father land)। निगमाच्च द्योदिवौ भूमिर्नतु गगनमिति प्रतीयते। उक्तञ्च अथर्ववेदेषु प्रथमखण्डे—

ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी सञ्चरन्ति

ते मा जुषन्तां पयसा घृतेन, यथा क्रीत्वा धनमाहराणि ॥ ४२४पृ

तत्र सायणभाष्यम्—ते प्रसिद्धा देवयाना देवा यान्ति येषु इति देवयानाः, देवानुकूल्ययुक्ताः। यद्वा दीव्यन्ति व्यवहरन्तीति देवा वणिजः। ते यत्र यान्ति ते देवयानाः बहवः—बहुदेश सम्बन्धिनो ये पन्थानो मार्गा द्यावापृथिवी अन्तरा द्यावापृथिव्यो र्मध्ये सञ्चरन्ति वर्त्तन्ते। यथा येन प्रकारेण अहं क्रीत्वा पण्यं विक्रीय धनम् आहराणि स्वगृहं प्रापयाणि। तथाहि—

इन्द्रमहं वणिजं चोदयामि, स न ऐतु पुर एता नो-अस्तु।

नुदन्नरातिं परिपन्थिनं मृगं, स ईशानो धनदा अस्तु मह्यम् ॥ ४२१पृ

कश्चित् भारतीयो वणिक् वदति—अहं वणिक् इन्द्रं देवराजम् इन्द्रस्य समीपे

* केचित् मन्यन्ते महः, तपः, सत्यं, जनः—महरादि लोकचतुष्टयमिति। परन्तु तन्न। जन त्रिदिवान्तर्गतं न। महः, तपः, सत्यम्—त्रिदिवमिति। जनस्तु सर्वाभावीनदेशः।

वणिजं वणिग्जनं चोदयामि प्रेषयामि। स इन्द्रो नः अस्माकम् अग्रणी भवतु। स मह्यं धनप्रदाता अस्तु। केन प्रकारेण? स चेत् मार्गस्य अरातिं दस्युतस्करादिकं वृकं तथा परिपन्थिनं मृगं व्याघ्रभल्लूकादिकं तुदति दूरीकृत्य पन्थानं निरापदं करोति, तर्हि एव वयं गन्तुं समर्था भवाम इति।

अतएव प्रमीयते—प्रतीयते च यत् या एषा द्यौः भारतीयवणिग्जनगमन योग्या, सा खलु लोकविशेषो भूमिरेव, नतु गगनम्। तथा येषां देवयानानां मार्गाणाम् एकप्रान्ते पृथिवी (भारतवर्षं नतु भूमण्डलं) अन्यप्रान्ते द्यौः, या मनुष्यगम्या, तयोर्द्यावापृथिव्योः अन्तरा—मध्ये वर्त्तमाना एते देवयाना भौमा, नतु पारलौकिका इति। कतिपये देवयानाः पन्थानः? ते चत्वार इति—

चत्वारः पथयो देवयानाः,

अन्तरा द्यावापृथिवी वियन्ति। कृष्णयजुः। १८० पृ

क एते चत्वारः पन्थानः—खाइवारपाशः, वोलानपाशः, वद्रिनारायणपथः, दुर्जयलिङ्गपथः (दारजिलिङ्ग)। अस्यैव वद्रिनारायणपथस्य प्रान्तभागस्य नामधेयं हरिद्वारं स्वर्गद्वारं वा। अनेनैव पथा युधिष्ठिरः स्वर्गमगच्छत्, विष्णुरपि एतैरेव पथिभि स्त्रिवारं मन्वादिभिः सह भारतवर्षमाजगाम इति।

अतएव पादगम्या सा द्यौः न गगनं, न च सा कश्चित् पारलौकिकः अनधिगम्यो जनपदविशेषो वा शून्यसंस्थः, शून्यं वा न। न वा सा द्यौ दिव् च अभिन्ना इति। तर्हि कथं वेदेषु एतयो रेकार्थे प्रयोगा दृश्यन्ते—

दिवस्परि प्रथमं जज्ञे अग्निः। १-४५-१०म

एते तु प्रयोगाः प्रामादिकाः। यतो यदा सर्वादौ आदिस्वर्गे अग्ने ररणीसंघर्षेण उत्पत्तिर्बभूव, तदा—दिवः सत्तापि नासीत्।

तमग्निं द्यौर्वेद, पृथिवी वेद, आपश्च अन्तरीचश्च वेद इति स्मरणात्। "दिव् वेद" इति प्रमाणं नासीत्, नास्ति वा। ऋषिस्तु दिवं द्याञ्च अभिन्नां मत्वा एवं प्रामादिकं प्रयोगं प्रयुक्तवान्। कश्चित्तु भ्रान्तऋषिरेवमपि उक्तवान्—

स जायमानः परमे व्योमनि अग्निः। २-१४३-१म। ७-६-७म

एषापि उक्तिर्नितरां भ्रान्तिबहुला, यतः सत्यलोक एव स्थानोत्कर्षात् परमं स्थानं, परमं व्योम इति च शब्दाभ्यां विशेषितः अभूत्। तेषां सत्यलोकादीना-

मुत्पत्तेः प्रागेव अथर्वा नाके आदिस्वर्गे प्रथमे व्योमनि पुष्करे अग्न्युत्पादनं कृतवान्। उक्तञ्च

त्वामग्ने पुष्करादधि अथर्वा निरमन्थत।
मूर्द्ध्नो विश्वस्य वाघतः॥ १३।१६।६म

हे अग्ने वाघतो मेधावी अथर्वा सुरजेष्ठब्रह्मणो ज्येष्ठः पुत्रः विश्वस्य जगतो मूर्द्धः मूर्द्धि मस्तकस्वरूपे पुष्करे पद्मजन्मनो ब्रह्मणो जन्मभूमौ पुष्कराख्ये जनपदे यदि त्वां निरमन्थत अरणीसंघर्षेण उत्पादितवान्। तथाहि—

अग्निरमृतो भवति तं द्यौरजनयत्।

आदिस्वर्गो द्यौरेव नतु नूतनस्वर्गो दिव् तम् अमृतं अमृततुल्यम् अग्निम् अजनयत् उत्पादितवती। तथाहि—

अग्निः प्रथम इलस्पदे समिद्धः। १-१०सू-२म
अग्निः पृथिव्या नाभा इलायास्पदे जातः। ६-१सू-१०म
अग्ने इला समिध्यसे। २-२४-३म
अग्ने इलायाः पुत्रो अजनिष्टः। ३।२८।३म

अनेन किम् उपलब्धम्? अग्निः प्रथमं दिवि प्रज्वालित इति मतं निराकृतमभूत्, दिव् आदि अग्न्युत्पत्तिस्थानं न। यदि अग्निरुत्पादितः, इलावृतवर्षेपि अग्निरुत्पादितो बभुव। अतएव पुष्करं, द्यौः इलावृतवर्षमेतानि अभिन्नानि। दिव् पृथक्। वस्तुतस्तु दिव्—महस्तपःसत्यलोकसमवायविशेषः। द्यौस्तु इलावृतमेव वर्षमिति पुराणभास्कराचार्य्ययोरुक्त्या सप्रमाणीभूतम्। अथ

दिवि विष्णुर्व्यक्रंस्त जागतेन छन्दसा। ६८ पृ यजुः

प्रयोगोऽयमपि भ्रान्तिसमाम्नातः। यतो यदा देवा दैत्यदानवगणैः स्वर्गभ्रष्टाः (paradise lost) विष्णुना नेत्रा सह भारतवर्षं माजग्मुस्तदा "दिव्" द्युलोको वा (Sibiria) न उत्पन्ना इति। दिवि उत्पन्नायां देवा दिवमेव सन्निहिताम् अगमिष्यन्। वस्तुतस्तु दिव् "देवपुत्रा" न, पक्षान्तरे—

रोदसी द्यावापृथिव्यौ देवपुत्रे प्रत्ने मातरा।

द्यौरेव आदि मातृभूमिः, पृथिवी भारतवर्षं वा द्वितीया मातृभूमिः, अत एव ऋषिभिरुक्तम्—

द्यावापृथिवी मातरा द्यावापृथिवी विश्वशम्भुवा

तर्हि कथं तैत्तिरीयसंहितायामेवं विवृतं दृश्यते ?—प्राचीनवंशं करोति देवमनुष्या दिशो व्यभजन्त । प्राचीं देवाः, दक्षिणां पितरः, प्रतीचीं मनुष्याः उदीचीं रुद्रा इति । २६० पृ

अस्त्वेवं,परन्तु विवृतिरेषा नितरामर्वाचीना । स्वर्गभ्रष्टा देवाः पूर्वं तावत् भारतमागताः ततः अस्मात् केचित् वरुणवाय्वादयः अन्तरीक्षं (तुरुष्कपारस्यापोगस्थानं) गताः, केचिच्च ब्रह्मविष्णुचन्द्रसूर्य्यादयः स्वर्गे पुनरधिकृते सति (paradise regain) पुनरादिस्वर्गं गत्वा तत्र बहुकालम् ऊषुः,ततो दिवं गताः । उक्तञ्च ऋग्वेदे—द्यावापृथिवीभ्यां नव्यं नव्यं तन्तुं वंशम् आतन्वते आतन्ववाते विस्तारयतो दिवि द्युलोके, समुद्रे अन्तरीक्षे इति । तथाहि अथर्ववेदः सामवेदश्च

इत एते उदारुहन् दिवः पृष्ठान्यारुहन् ।

प्र भूर्जयो यथा पथा द्यामङ्गिरसो ययुः । ५२ पृ

प्रकृतार्थवाहिनो—यथा भूर्जयः भारतवर्षं स्वाधिकारभुक्तमभूत् तथैव अङ्गिरसः पथा सुरवर्त्मना देवयानपथेन (अपोगस्थानस्य मध्ये भूत्वा) द्यां द्योलोकमादिस्वर्गं प्रययुः गतवन्तः । ततः एते अङ्गिरसः इतो द्योः उदारुहन् उत्तरस्यां दिशि अगच्छन् । ततो दिवो द्युलोकस्य पृष्ठानि आरुहन् ।

अत्र अङ्गिरसः इति पदमुपलक्षणमात्रं, अङ्गिरोगोत्रीयाः सर्वे देवा स्तथा ब्रह्मादयश्च दिवं गता इति । अतः उदाहृतं यजुः—एवमेव भवितु मर्हति—

दिवि विष्णुर्व्यक्रंस्त जागतेन छन्दसा । ६८ पृ-यजुः

न केवलं दिव्द्यवोरेकार्थे प्रयोगं कृत्वा ऋषयो भ्रान्तिमघटयन्, परन्तु "यत्र राजा वैवस्वतो यत्रावरोधनं दिवः" । अत्रापि दिवः प्रयोगः असाधुरेव अभवत् । यतः,—यमः पितॄणां राजा, (यमाय पितृमते स्वाहा), यमस्तु पितृलोकस्यैव राजा आसीत्, न तु दिवः इति । दिव् द्योश्च गगनमित्युक्तापि ऋषयः प्रमादं गताः ।

द्यौर्न स्तृभिः । ५-२सू-२म । द्यावो न स्तृभिः । २-३४-२म

दिव्या इव स्तृभिः । ११-१६६-११म । मित्रावरुणा वृष्टिं दिव इन्वतं । २-६४-७म

वृष्टिः पिन्वते दिवः । १-६२-५म । द्यौर्वृष्टिर्भवति । यजुः ।

दिवो वर्षन्ति वृष्टयः । ३।८४।५म

द्यौः गगनं स्तृभिर्नक्षत्रैः, यथा नक्षत्रैः उपलक्षिता द्यौः गगनं शोभते

तद्वत्। अत्र यदि स्तृशब्दो नक्षत्राख्यदेवान् बोधयितुं प्रयुक्तः अभवत्, तदा कापि नो भ्रान्तिरिति। अन्यथा दोषसमाम्नाता इमे प्रयोगा इति।

हे मित्रावरुणौ युवां दिवः अन्तरिक्षात् वृष्टिम् इन्वतं प्रेरयतमिति सायणः।

मित्रश्च वरुणश्च द्वौ अदितिनन्दनौ, तौ गगनात् वृष्टिवर्षस्य न कर्त्तारौ। पूर्वं तावत् इत्येव प्रमादः, द्वितीयः प्रमादस्तु दिवो वृष्टेर्वर्षणमिति। यतो दिव् द्युलोको वा भौमो, नतु गगन—मिति

कथमित्थं प्रमादाः प्रयोगविधौ सञ्जाताः? वयं मन्यामहे—

द्यौरादित्यो भवति

अस्याः श्रुतेरर्थावबोधविषये प्रमत्ताः सन्तः ऋषयः प्रमादान्तरमपि भेजुः।

द्यौरादित्यो भवति, संवत्सरो वै प्रजापतिः,

पृथ्विरादित्यो भवति, आकाशो वै ब्रह्म

एताः काश्चित् श्रुतयः सन्ति। परन्तु अत्र सम्बन्धपरेषु छान्दसात् प्रथमायाः प्रयोगाः अभवन्, वस्तुतस्तु "द्यौरादित्यस्य भवति" इत्येवमादयः एव अन्वया भवेयुः। यतो द्यौः पितृभूमिरादिस्वर्गः कियत्कालम् आदित्यस्य अदितिनन्दनस्य सूर्य्यस्य शासनाधीना आसीत्। उक्तञ्च—

देवानां हि एतत् परमं जनित्रं यत् सूर्य्यः।

देवानां परमं जनित्रं भद्रा जनित्री जनयित्री द्यौः यत् या, सूर्य्यः सूर्य्यस्य। अतः श्रुतिरियम्—द्यौरादित्यो भवति।

परन्तु एतस्याः श्रुतेः प्रकृतार्थमबुध्यमानाः सर्वे यामेव प्रथमम् आदित्यं (दिवाकरं) अमन्यन्त, ततः तदधिष्ठानं गगनमपि द्यौरभवत्। अतएव

द्योदिवौ द्वे स्त्रियावभ्रं, अन्तरीक्षं गगनमनन्तं खम्

अमरादीनामिते प्रयोगा अपि प्रामादिका इति। वेदेषु गगनशब्दस्य आकाशशब्दस्य च प्रयोगो न दृश्यते, केवलं ख-शब्द एव गगनार्थे प्रयुक्त इति।

खे रथस्य खेनसः खे युगस्य शतक्रतो।

अपालामिन्द्र त्रिः पूत्वी अकृणोः सूर्य्यत्वचम्॥ ७-८०सू-८म

एवं व्योमान्तरीक्षनाकादयः शब्दा अपि यत्र गगनार्थे प्रयुक्तास्तत्र तत्र प्रमादा अभवन् इति बोद्धव्यम्।

वेदानामुत्पत्तिस्थानम्।

कथं वेदानामुत्पत्तिर्बभूव, तदुक्तं, साम्प्रतं वेदचतुष्टयानामुत्पत्तिस्थानं कथ्यते। तर्हि किं सर्वे वेदा न भारतीया सम्प्रत्? एवमेव। ये पुनर्वेदे अकृतश्रमा, ये च पुनरुपनिषत्स्वपि परप्रत्ययनेयबुद्धयस्त एव विश्वसन्ति यत् सर्वे वेदा भारतीयाः संस्कृतभाषापि भारतीया, देवनागरमक्षरमपि भारतीयमिति। परन्तु धारणेयं विश्वासोऽयं वा न खलु सत्यमूलक इति। यदेतत् पाणिनीयव्याकरण मस्माकं निजस्वं, तदपि अपोगस्थानमध्यगतशलातुरनगरप्रभवमिति। यदा तु क्षत्रियाः सर्वे भारतवर्षस्य नरपतय आसन्, तदैव अन्तरीक्षं (तुरुष्कपारस्यापोगस्थानानि) भारतसाम्राज्यान्तर्गतमासीत्। तेन तस्य नामान्तरं "भूः" "पृथ्वी" वा अभवत्। तदपि अन्तरीक्षं स्वर्ग-भारतवर्षयोर्देवमनुष्यैरेव अधुषितं बभूव तस्मिन्नेव अन्तरीक्षे शलातुर-नगर्यां दाक्षीपुत्रेण भगवता पाणिनिना अष्टाध्यायी निरमायि।

एवं येयं संस्कृतभाषा भारतविषयवास्तव्यान् जगति धन्यान् गण्यान् मान्यां स अकरोत् करोति च, सापि गीर्वाणवाणी आदिस्वर्गप्रभवा, नतु भारतीयेति। उक्तञ्च आर्षे:—

देवीं वाच मजनयन्त देवाः,
तां विश्वरूपाः पशवो वदन्ति। ११।८८।८म

दैवी वागेव गीर्वाणवाणी संस्कृतभाषा, अस्माकं पूर्वपुरुषा देवा एव तां यवि अजनयन्। उक्तञ्च वाग्भटेन भिषजा—

संस्कृतं स्वर्गिणां भाषा शब्दशास्त्रेषु निश्चिता। १-२ परि

शब्दशास्त्रेषु—अलङ्कारादिषु एवं विवृतं यत् संस्कृतं स्वर्गवासिनां देवानामेव उद्भाविता वाणीति। यदुक्तं काव्यचन्द्रिकाकारेणापि—

संस्कृतं देवतावाणी कथिता मुनिपुङ्गवैः।

श्रेष्ठैर्मुनिभिरेवं कथितं यत् संस्कृतभाषा देवतानां वाणी इति। तथाहि—

संस्कृतं नाम दैवी वाक् अन्वाख्याता महर्षिभिः। ३३-१म काव्यादर्शः

महर्षय एव मुक्तवन्तो यत् संस्कृतभाषा देवानामेव। तथाहि—

सर्वे स्वरा इन्द्रस्य आत्मानः, सर्वे उष्माणः प्रजापतेरात्मानः, सर्वे स्पर्शा मृत्योरात्मानः। छान्दोग्य।

सर्वे चतुर्दश स्वरा इन्द्रेण, उष्मवर्णचतुष्टयं चन्द्रेण, सर्वे व्यञ्जनवर्णा भगवता शिवेन उद्भाविता बभूवुः। तेन देवनगरे भवानि तानि अक्षराणि "देवनागराणि" इति संज्ञया समलङ्कृतानि। एवं सर्वादौ स्वर्गे इलावृतवर्षे विश्वेदेवैर्वसुमत्यक्रतुप्रभृतिभिर्ये मन्त्राः प्रणीता स्ते

विश्वदेवनिवित्

इति संज्ञया संसूचिता अभवन्। अथ साध्यदेवमरीच्यादिभिर्ब्रह्मविष्णु वरुणेन्द्रादिभिश्च ये मन्त्रा स्तत्रैव आदिस्वर्गे दिवि (इलावृतवर्षे) शनैः शनैः प्रणीता बभूवु स्तेषामेव समाहारेण सामवेदस्य देहप्रतिष्ठा बभूव इति।

स्वर्गास्तु पारलौकिका धार्म्मिकजनसुकृतलभ्याश्च, कथं तस्मात् शून्यसंस्थात् अनधिगम्यात् पारलौकिकात् स्वर्गात् देवभाषा गीर्वाणवाणी, देवनागराक्षरं सामवेदश्च मर्त्यलोकं भारतवर्ष माजगाम ?

स्वर्गाः पारलौलिका, देवाः पारलौकिका, मृताः साधवः पुण्यबलेन तं परलोकस्थं स्वर्गं लभन्ते, इति तु मुखरजनमुखरव एव। तर्हि कथं विष्णुपुराणप्रणेतार एव मवदन्—

भौमा ह्येते स्मृताः स्वर्गाः।

इन्द्रादीना मेता वासभूमयः स्वर्गाख्या भौमा एव, न तु पारलौकिका इति। भगवता वायुनापि उक्तम्—

भौमं तदपि हि स्वर्गं

तदपि ब्रह्मणः स्वर्गं ब्रह्मलोकाख्यं भौमं भूमिसंस्थं, न तु पारलौकिकमिति। तथाहि भागवतम्—

ऐहिको नरकः स्वर्ग इति मातः प्रचक्षते।

हे मातः! देवनिवासः स्वर्गः, नरकश्च ऐहिक इहलोकसम्बन्धीय इति आप्ता मुनयः प्रचक्षते वदन्ति। तर्हि किमेते, शास्त्रवादा निरर्थका, उत जनश्रुतयश्च ? न केवलं किंवदन्ती, परन्तु बहुष्वपि शास्त्रेषु एवं वर्त्तते यत् स्वर्गाः पारलौकिकाः पुण्यलभ्याश्च इति।

स्वर्गकामो यजेत

इत्यादयः श्रुतयोपि स्वर्गस्य पारलौकिकत्वं द्योतयन्ति। एवमेव, परन्तु नैषा श्रुतिर्वैदिकीति, कस्मिन् वेदे कस्यामुपनिषदि वा एतत् वर्त्तते ? एषा तु ब्राह्मणा-

दिषु दृश्यते, परन्तु ब्राह्मणा न वेदा इति। ते तु वेदस्य व्याख्यानग्रन्था एव। उक्तञ्च आर्षैः—

ब्राह्मणो वेदस्य व्याख्यानम्।

अथ यदि स्वर्गाः पारलौकिका एव भवन्ति, तर्हि कथं पौराणिकैरेवं विवृतं मेरुमूर्द्धनि एकविंशतिः स्वर्गा वर्त्तन्ते, ब्रह्मादयो देवा अपि तत्र निवसन्ति। स तु मेरुरिलावृतवर्षसंस्थो न तु अनधिगम्यः, न च पुनः शून्यसंस्थो वा। उक्तञ्च श्रीमता भास्कराचार्य्येण—

वसन्ति मेरौ सुरसिद्धसंघाः, अौप च सर्वे नरकाः सदैत्याः। १८—२१पृ

सुरगणाः सिद्धाश्च ऋषयो मेरौ वसन्ति, तथा औवें वाड़वानलगर्भसमुद्र-प्रधाने नरके च, न पापिनः परन्तु देवानामेव दायादा दैत्या दानवाश्च निवसन्ति। एते च स्वर्गनरका भौमा इति तु व्यवहारतोऽपि अनुमीयते।

सुग्रीवस्य वानरचमूः पदव्रजेन ब्रह्मलोकं गता। स तु ब्रह्मलोकश्च (उत्तर कुरव) उत्तरमहासागरवेलासंस्थ इति च किष्किन्धाकाण्ड (४३ सर्गविशेष) पाठेन लभ्यते। आदिपर्व्वणि च (१२० अ) इत्थ मेव ऐतिह्यं विद्यते यत् गन्धमादनपर्व्वतप्रवासिन ऋषयः पदव्रजेनैव ब्रह्माणं द्रष्टुं ब्रह्मलोकं गताः। अथर्ववेदे छान्दोग्योपनिषद्भाष्ये च दृश्यते दीर्घश्मश्रुधारिणो भारतीया अन्ते-वासिन उत्तरमहासागरवेलाविलासिनं ब्रह्मलोकं गता स्तस्मात् प्रत्यागताश्च। गीतायामपि पठ्यते यत् योगिनो जीविता देवयानपथेन पदव्रजेन ब्रह्मलोकं गता इति। अर्ज्जुनश्च पञ्चवत्सरान् स्वर्गे स्थित्वा इन्द्रात् अस्त्रविद्यामधिगतः। सगरश्च स्वर्गस्थभार्गवादाग्नेयास्त्रं लेभे, भरद्वाजादयश्च भिषजः स्वर्गं पूर्वनिवासं गत्वा इन्द्रात् रसायनविद्या मधिगताः। अर्जुनश्च ससैन्यः स्वर्गं गत्वा देवलोकात् राजसूयकरं जग्राह। सकुक्कुरोपि युधिष्ठिरः पदव्रजेनैव स्वर्गं गत इति। स्वर्गवास्तव्या अप्सरा अपि उर्वशी पुरूरवसा सह भारतमागत्य अस्मिन् भारतवर्षे भारतकुलवधूर्बभूव, नहुषपिता आयुश्च तस्या एव अपत्यम्। महर्षिर्वशिष्ठोपि तस्याः सन्तान इति। स्वर्गवासिन्या मेनकाया एव गर्भात् भारतललनाकुलललामभूता शकुन्तला प्रसूता। अतएव इत्थं स्वर्गधाम पार-लौकिक मुत ऐहिक मिति?

यदि स्वर्गनरकादयः पारलौकिका एव स्युस्तर्हि कथं नरकस्वर्गपिष्ट

लोकानामधिपतिर्वैवस्वतो यमो नचिकेतस मुक्तवान् भोः नचिकेतः, मानवा मृताः कुत्र गच्छन्ति, तदहं न जाने। न केवलं तत् —

देवै रत्रापि विचिकित्सितं पुरा
न तैः सुविज्ञेय मणुरेष धर्म्मः।

तर्हि ब्रह्मादयोपि देवाः स्वर्गवासिनो यस्य पारलौकिकस्वर्गस्य वार्त्तामपि न जानन्ति, तत् पारलौकिकस्वर्गनरकादिकं न किमाकाशकुसुम मिति।

वैवस्वतो यमः स्वर्गवासी नरकाधिपतिः पितृलोकपतिश्च, स पारलौकिकः, तस्य यमस्य भ्राता अयोध्याधिपतिर्वैवस्वतो मनुरैहिक इति किं युक्तिर्विवेको वा समर्थयति? यदि स्वर्गाः पारलौकिकाः स्यु स्तर्हि तस्य स्वर्गस्य सामवेदः। संस्कृत भाषा, देवनागराक्षराणि च किं पुष्पवृष्टिवत् गगनस्थात् स्वर्गात् भारतमाजग्मुः? किं भारतस्य वेदादयः संस्कृतभाषा च गगनमार्गेण भूउरोपादिकं जग्मुरिति।

वस्तुतस्तु स्वर्गाः सर्वे भौमाः, देवाश्च ते भौमस्वर्गवासिनोऽस्माकं दायाद-बान्धवा, वयमपि देवाः सर्वं आर्य्यसन्ताना:। दैत्यदानवैर्देवाः ब्राह्मणापरनामानः स्वर्गभ्रष्टा भारतमागता, तैरेव सह सामवेदः संस्कृतभाषा च भारत माजग्मतुरिति। तेनैव अस्मिन् भारतवर्षे सामवेदीयाः संस्कृतभाषिणश्च ब्राह्मणा दृश्यन्ते। अस्ति किमित्थं प्रमाणं यत् सामवेदः स्वर्गप्रभव इति। नितरामस्त्येव। कुत्र? सर्वेषु एव शास्त्रेषु—

पूर्वं तावदस्माभिः प्रदर्शितं यत् बहवो वेदमन्त्राः स्वर्गवासिभिर्देवैरिन्द्रादिभिः प्रणीता इति। तेषां समाहारेणैव सामवेदस्य देहप्रतिष्ठा बभूव। केन कदा कस्मात् वा समाहृता स्ते साममन्त्राः? तदुक्तं भगवता छान्दोग्येन—

प्रजापतिर्लोकान् अभ्यतपत्, तेषां तप्यमानानां रसान् प्राबृहत्। अग्निं पृथिव्या वायुमन्तरिक्षात् आदित्यं दिवः।

तत्र शिष्यशङ्करभाष्यम्—अत्र ब्रह्मणो मौनं विहितम्। तद्भेषे ब्रह्मत्व कर्म्मणि च। अथ अन्यस्मिंश्च होत्रादि कर्म्म रेषे। व्याहृतिहोमः प्रायश्चित्त मिति। तदर्थं व्याहृतयो विधातव्या इत्याह। प्रजापतिर्लोकान् उद्दिश्य तत्र साराजिघृक्षया ध्यानलक्षणम् तपश्चचार। तेषां तप्यमानानां लोकानां रसान् साररूपान् प्राबृहत् उद्धृतवान् जग्राह इत्यर्थः। कान्? अग्निं रसं पृथिव्याः, वायुमन्तरिक्षात्, आदित्यं दिवः।

परन्तु यदि वा मूलं किमपि बुध्यते, तथापि भाष्यस्य—पदार्थग्रहं न खलु सहसा कर्त्तुं शक्यते। कस्मात् शङ्करेण भाष्येषु ब्रह्मणो मौनं, तपस्या, व्याहृति होमः, तथा प्रायश्चित्तादिकम् च अवतारितं ? मूले किमेतेषां कोऽपि प्रसङ्गोऽपि विद्यते ? कथमेतत् सर्वं वृथा वाग्जालं निरर्थक मवतारितम् ?

क एष प्रजापतिः ? "लोकान् अभ्यतपत्"—किमस्य वाक्यस्य प्रतिपाद्यम् ! कोऽयमग्निः ? वह्निरुत ऋषिविशेषो वा ! क एष वायुः ? प्रभञ्जन उत ऋषि विशेषो वा ? कोऽयमादित्यः ? दिवाकर उत अदितिनन्दनविशेषो वा ? का इयं पृथिवी ? भूमण्डलमुत जनपदान्तरम् ? किमिदम् अन्तरीक्षम् ? गगनमुत लोकविशेषो वा ? का इयं दिव ? द्युलोक उत आदि-स्वर्गो द्यौर्वा ? परन्तु शङ्करेण न तत्किमपि विशदीकृतम्। अस्मादेव वक्तुं युज्यते मूलादपि एतत् सर्वं भारतीयं भाष्यव्याख्यानादिकं दुरवगाहमिति।

वयं मन्यामहे एष प्रजापति र्न खलु स्वयं परमेश्वरो न वा हिरण्यगर्भः स्वर्णाण्ड प्रभवः आदिमानवो निरक्षर इति। परन्तु अयं प्रजापतिः खलु सुरज्येष्ठो ब्रह्मा परमेष्ठी। स यदा आदिस्वर्गे (न तु दिवि) आसीत्, तदा मनसि अचिन्तयत्—इन्द्रादिभिर्देवनागराक्षराणि उद्भावितानि लिखनपठनप्रथापि प्रवर्त्तिता, तत् साम्प्रतं वेदमन्त्रा लिखिता ग्रन्थनिबद्धा भवन्तु। अतएव छान्दोग्येन उक्तम्।

प्रजापतिः सुरज्येष्ठो ब्रह्मा लोकान् भूर्भुवः स्व रिति लोकत्रयं (तदा अन्ये लोका दिवादयो न स्थले परिणता बभूवुः) अभ्यतपत् अनुसन्दधे, तत्र तत्र के के वेदमन्त्रसमाहरणे समर्थाः सन्ति,तत् मनसि विचचार,विचार्य्य च स्थिरीकृतवान् ततः पृथिव्या भूर्लोकात् भारतवर्षात् अग्निमेव रसं सारं वेदमन्त्रसमाहारे श्रेष्ठं, अन्तरीक्षात् वायुमेव सारं, द्योः (परन्तु न दिवः तदा दिव उत्पत्तिरपि नासीत्) आदित्यम् अदितिनन्दनं सूर्य्यमेव सारं प्राहरत् जग्राह यत एते वेदमन्त्रसमाहारे योग्या इति बुबुधे।

स एताः तिस्रो देवता अभ्यतपत् स ब्रह्मा एतान् त्रीन् देवान् अग्निवायु-सूर्य्यान् वेदमन्त्रसमाहारे न्ययुङ्क्त। तासां तप्यमानानां रसान् प्राहरत् ते देवा अग्न्यादयो रसान् सारान् त्रयीं वेदत्रितयं प्राप्तवन्तः, संगृहीतवन्तः। केन को वेदः समाहृतः ? तदुक्तम्—

अग्ने ऋचः, वायोर्यजूंषि सामानि आदित्यात्।

ऋच:—ऋग्बहुल ऋग्वेद: अग्नेः महर्षेरग्नेः सकाशात्, यजूंषि—यजुर्बहुलो यजुर्वेद: वायोर्महर्षे: सकाशात्, सामानि—सामभूयिष्ठः सामवेद: आदित्यात् अदितिनन्दनसूर्य्यसकाशात् समागत इति। २। कस्मात् स्थानात् को वेद: समाहृतः। तदुक्तम्—

भूरिति—ऋग्भ्यः, भुवरिति—यजुर्भ्यः, स्वरिति—सामभ्यः। ३।

अत्र व्यत्ययेन व्याख्यातव्यम्—ऋग्भ्य—ऋच: ऋङ्मन्त्रा—ऋग्वेद: भू: भूर्लोकेभ्यः—भूर्लोकात् भारतवर्षात्, यजुर्भ्यः—यजूंषि—यजुर्वेद: भुवः—भुवर्लोकात् अन्तरीक्षात्। सामानि—सामवेद: स्वः—स्वर्लोकात् द्योः समाहृत इति।

अतएव ऋग्वेदस्य व्याहृतिरुत्पत्तिस्थानं भूर्भारतवर्षं, यजुर्वेदस्य व्याहृतिरन्तरीक्षं भुवर्लोकः—तुरुष्कपारस्यापोगस्थानम्, सामवेदस्य व्याहृतिरुत्पत्ति-स्थानम्—स्वरादिस्वर्गो द्यौरिति।

अतएव वेदत्रयाणामुत्पत्तिस्थानं भूर्भुवः स्वरिति त्रैलोक्यं यत् महाव्याहृतय इति। अन्येभ्यो महस्तप:सत्यजनलोकेभ्योऽपि पश्चात् साधारणवेदमन्त्राः समाहृता अतस्तेऽपि लोकाः साधारणव्याहृतय इति। "व्याहृतिर्मन्त्रविशेष" इति न, परन्तु यस्मात् यस्मात् स्थलात् वेदमन्त्राः विशेषेण समाहृताः(वि—आ—हृ+क्तिच्)त एव लोका व्याहृतय इति। अथ सामवेदस्य स्वर्गप्रभवत्वं समर्थयति कृष्णयजुः—

समान्य ऋचो भवन्ति, मनुष्यलोको वै ऋचः। मनुष्यलोकादेव नयन्ति। अन्यत् अन्यत् साम भवति। देवलोको वै साम, देवलोकादेव अन्य मन्यं मनुष्यलोकं प्रत्यवरोहन्तीयन्ति। ४७७ पृ

साधारण मगेयं पद्यं ऋक्, तासां समष्टिरेव ऋग्वेद:, स तु ऋग्वेद: मनुष्यलोके—(यदा कृष्णयजुः प्रणीतं तदा भारतवर्षमपि मनुष्यलोकत्वं गतम्) अस्मिन् भारतवर्षे प्रणीतः,तस्मादेव स्थानान्तरे स्वर्गादौ नीतः। ऋग्भ्यः अन्यत् गेयं पद्यं साम भवति। स च सामवेद: देवलोके आदिस्वर्गे द्यवि प्रणीत इति, तस्मात् देवलोकादेव स सामवेदो भारतादौ समानीत इति। तथाहि—मनुसंहिता—

ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः।
सामवेदः स्मृतः पित्र्यस्तस्मात् तस्याशुचिर्ध्वनिः॥ १२४-४अ

देवेषु नरदेवेषु इन्द्रादिषु दैवत्यं देवतात्वं यत्र स देवदैवत्यः। ऋग्वेदेषु इन्द्रादयो नरदेवाः संस्तुता, उपास्यरूपेण वर्णिता, अतः ऋग्वेदो देवदैवत्य इति। यजुर्वेदो मानुषः—मानुषे मनुष्यलोके अन्तरीक्षे मात्मनुसन्तान वरुणादीनां मनुष्याणां वासस्थाने भवो मानुष इति। सामवेदः पित्र्यः पितरि पितृलोके आदिस्वर्गे भवः पित्र्यः, स्वर्ग प्रभव इति।

अतएव सामवेदस्य उत्पत्तिस्थानं स्वर्गः, इति प्रमाणात् गम्यते। अस्य मन्त्रस्य व्याख्या मेधातिथिभिः—बुलरमूलरादिभिश्च कृता, परन्तु सा व्याख्या तेषां नितरामसाधीयसी इति ज्ञेयम्।

अथ वयं मनुवचनमुद्धृत्य अध्याहृतायाः छान्दोग्यश्रुतेः समर्थनं करवाम। उक्तञ्च भगवता मनुना—

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थ ऋग्यजुःसामलक्षणम्। २३·१अ

स सुरज्येष्ठो ब्रह्मा यज्ञसिद्ध्यर्थं यज्ञे स्तुतिमन्त्रपाठार्थं यज्ञानुष्ठानाय अग्निवायुरविभ्यः महर्षिभ्यः ऋग्यजुःसामलक्षणम् ऋग्यजुःसामनाम सनातनं प्राचीनतमं, न तु नित्यं, त्रयं ब्रह्म वेदत्रितयं त्रयीमिति यावत् दुदोह भूर्भुवःस्वरिति लोकत्रयात् समाजहार।

ब्रह्मण आदेशात् महर्षिरग्निदेवो भारतवर्षात् ऋग्वेदं, महर्षिर्वायुदेवः अन्तरीक्षात् (तुरुष्कपारस्यापोगस्थानात्) यजुर्वेदं, महर्षिः सूर्यदेवः द्योरादि-स्वर्गात् सामवेदं समाहृतवान्। अतएव सुरज्येष्ठो ब्रह्मा प्रथमो व्यास इति। वक्ष्यते तत् वेदविभागप्रकरणे।

मेधातिथिप्रभृतयो मोक्षमूलरादयश्च व्याख्यातवन्तो—यदेते अग्न्यादयो वह्निप्रभञ्जनदिवाकरा इति। परन्तु तेषामेतत् व्याख्याकदम्बकं नितराम् असाधीय एव। तेषां व्याख्या यदि साधीयसी एव स्यात्, तर्हि कथमाप्ता एवमवदन्?

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्व्वम् अनुज्ञाता स्वयम्भुवा॥

वचनमेतत् ऐतरेय ब्राह्मणभाष्यभूमिकायां श्रीमता सायणेन अध्याहृतम्

(४ पृ)। किमेतत् वचनं मनुवचनस्यैव अनुवादविशेषो न? किमिदं न छान्दोग्यश्रुतिमपि नितरां समर्थयति?

युगान्ते त्रेतायां लिखनपठनाभावात् कण्ठस्था वेदमन्त्रा प्रायेण लुप्ता अभवन्। ततो ब्रह्मणः सुरज्येष्ठस्य (नतु स्वयम्भुवो, भ्रान्तिरियं) आदेशात् महर्षयः अग्निवायुसूर्य्याः सेनिह्नामान् वेदान् त्रयीं तपसा बहुसन्धानेन लेभिरे लब्धवन्तः। अतएव

Rig Veda from Fire,
Yajur Veda from Air,
Sama Veda from Sun,

ऋग्वेदो वह्नेः, यजुर्वेदः प्रभञ्जनात्,सामवेदो दिवाकरात् लब्धा, इति न।

तर्हि क एष अग्निः? अयमग्निः पूर्वं तावत् किम्पुरुषवर्षे वसूनां नेता आसीत्। ततः स स्वर्गभ्रष्टान् देवान् पथप्रदर्शनपूर्वकं (अग्ने नय सुपथा राये अस्मान्, पुरोगा अग्निर्देवानां। ११।१८८।१म, अग्ने देवैर्भिर्मानुषे जने सामवेदः) अस्मिन् भारतवर्षे समागतः, ततः अत्रैव स संस्थितः। बहवो भारतीया ब्राह्मणा एतस्य अग्नेरपत्यानीति। उक्तञ्च कृष्णयजुषि—

आग्नेया वै ब्राह्मणाः

ब्राह्मणा अग्निवंशप्रभवाः। बहवो राजन्या अपि अस्मात् अग्नेर्लब्धजन्मानः। तथाहि छान्दोग्ये भगवान् शङ्कराचार्य्यः—

द्युलोकात् अग्निभ्योवयं क्रमेण जाताः अग्निस्वरूपाः। २५२—महेशपालसंस्करणम्।

परन्तु द्युलोकात् नहि, द्योलोकात्, द्योलोकात् किं? आदिस्वर्गात्। तथाहि—

अग्निमुखा वै ब्राह्मणाः

ब्राह्मणानां मुखे अनलं न, परन्तु अग्निरेव तेषां मुखं प्रधानमिति। उक्तञ्च भगवता मनुना—

अनलप्रभवं भृगुम्। १—५म

भृगुः संहितावक्ता अनलप्रभवः, अग्निवंशप्रसूत इति। तथाहि कृष्णयजुः—

अग्नेस्त्रयो ज्यायांसो भ्रातर आसन्।

अतएव देवानां पुरोहितो ह्ययमग्नि र्वह्निर्न, परन्तु शिरःपाण्यादिलक्षणः कश्चित् पुमानिव इति अनुमातुं युज्यते।

कोऽयं तर्हि वायुरुत ? वायुरपि अयं प्रभञ्जनो न । अन्तरीक्षं गगनं मत्वा भ्रान्ता भाष्यकारा इममपि वायुदेवं प्रभञ्जन ममन्यन्त, परं तन्न । वायुरेष कस्यचित् त्वष्टुर्जामाता इति वेदेषु दृश्यते—

त्वष्टुर्जामातरं वायुम् । २६—२२—८म

अतएव वायुनामा कश्चित् देव आसीत् इति गम्यते । शुक्लयजुष्यपि तस्य नामनिर्देशो लक्ष्यते—

अग्निर्देवता वायुर्देवता इति ।

अथ ब्राह्मणेष्वपि इन्द्रेण सह वायोर्नामग्रहण मभूदिति दृश्यते । यथा—

वाग् वै पराची अव्याकृता अवदत्, ते देवा इन्द्रमब्रुवन् । इमं नो वाचं व्याकुरु इति । सोऽब्रवीत्—वरं वृणे मह्यं चैव एवं वायवे च सह गृह्याती इति ।

एवं बहुषु वेदमन्त्रेषु वायोर्नामनिर्देशोऽभवत् भगवन्मनुनापि उक्तम्—

अत्र गाथा वायुगीता कीर्त्तयन्ति पुराविदः ।
यथा वीजं न वप्तव्यं पुंसा परपरिग्रहे ॥ ४२—८ अ ।

अतएव मनोरपि प्राचीनतमस्य पूर्ववर्त्तिनः पुराविदो यस्य कवेर्वायोर्नाम ग्रहणं कृतवन्तः स खलु वायुर्ब्रह्मणः सुरज्येष्ठस्य समसामयिकः कश्चित् कविरासीत् इति प्रतीयते । अतएव वायुऋषिर्नतु प्रभञ्जन इति । कोऽयं सूर्य्यः ? "सूर्य्यः कविः" इति तु ऋग्वेदेषु दृश्यते । स तु अदितिनन्दनविशेषो ब्रह्मणः कनिष्ठभ्राता च । सप्तशती अपि एवं निर्दिशति—

सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः ।

अतएव अग्निर्देवता, तेन भूर्भारतवर्षात् ऋग्वेदः, महर्षिवायुना अन्तरीक्षात् भुवर्लोकात् यजुर्वेदः, भगवता सूर्य्येण च स्वः स्वर्लोकात् इलावृतवर्षात् मङ्गेभ्यः सामवेदः समाहृत इति । अतएव ऋग्वेदस्य उत्पत्तिस्थानं पृथिवी भूर्भारतवर्षं, यजुर्वेदस्य भुवः तुरुष्कपारस्यापोगस्थानं, सामवेदस्य उत्पत्तिस्थानं चीनादिस्वर्गो मङ्ग इति । अथ बहुकालादनन्तरं अस्मिन् भारतवर्षे अथर्व्वणा ये अवशिष्टा नूतनप्रणीताश्च मन्त्राः समाहृताः, तेषां समवायेन अथर्ववेदस्य देहप्रतिष्ठा अभवत् । अतएव अथर्ववेदस्यापि व्याहृतिरुत्पत्तिस्थानं भूर्भारतवर्षमिति ।

अथ वेदविभागः।

इति तु साधारणं परिज्ञातं सत्यं यत् एकेनैव भगवता कृष्णद्वैपायनेन वेदचतुष्टयस्य विभागः कृतः, अतस्तस्य नामधेयकम् "वेदव्यास" इति। परन्तु नायं प्रकृतसंवादः। सर्वादौ त्रेतायुगे तथ्या देहप्रतिष्ठा विभागोवा बभूव, पश्चान्तरे पाराशर्यो वेदव्यासस्तु द्वापरयुगस्य सायंकालीन एव कश्चित् ऋषिरिति। वेदानां प्रथमविभागस्तु सुरज्येष्ठब्रह्मण आदेशात् अग्निवायुसूर्य्यैरेव कर्तृभिः सम्पादित इति। यदुक्तं महर्षिणा वायुना—

त्रेतादौ संहिता वेदाः। ४७—५७ अ।

वस्तुतस्तु सुरज्येष्ठ एव ब्रह्मा त्रेतायुगस्य प्रातरेव विद्यमान आसीदिति शास्त्रालोचनया उपलभ्यते। उक्तञ्च तत् तेनैव वायुना—उत्तरखण्डे—

त्रेतायुगे तु प्रथमे पौत्रः स्वायम्भुवस्य सः।
आत्मानं धारयन् योगात् प्रार्थयन् सुमहद्यशः॥ ७८
तस्मै ब्रह्मा ददौ प्रीतो ज्योतिषां स्थानमुत्तमम्।
आभूतसंप्लवं ह्यस्तोदयविवर्ज्जितम्॥ ७८—१ अ। उ, ख

अतएव यदा त्रेतादौ अग्निप्रभृतिभिः खलु त्रयी सम्पाद्यते, तदा कृष्णद्वैपायनस्य ऊर्द्धतनपुरुषाणामपि सत्ता नासीत्। तदैव त्रेतायां सर्वादौ त्रयी सम्पादिता स्यात्, तथा तत्रैव त्रेतायां वेदचतुष्टयस्य प्रथमो विभागः क्रियते मनुनाम्ना केनचित् ऋषिणा इति। उक्तञ्च तत् वायुनैव—

एकवेद श्चतुष्पाद स्त्रेतायुगविधौ स्मृतः।
त्रीणि वर्षसहस्राणि तदा जीवन्ति मानवाः॥ ८३—५७ अ
त्रेतायां तु परावृत्ते मनोः स्वायम्भुवान्तरे।
ब्रह्मा मनुमुवाचेदं तद् वदिष्ये महामते॥ २
एवमुक्तस्तथेत्युक्त्वा मनुर्लोकहिते रतः।
वेदमेकं चतुष्पादं चतुर्धा व्यभजत् प्रभुः॥ ८—६० अ—वायु।

कोऽयं मनुः? तत्र परिज्ञातं, अयं ब्रह्मा सुरज्येष्ठोधाता, सतु स्वायम्भुव मनोः प्रपौत्र एव। तर्हि मनुरयं स्वायम्भुवमनुरिति वयं न मन्यामहे। मनुरेव वैवस्वतो धातुर्भ्रातुष्पुत्र एव, स एव ब्रह्मण आदेशात् (अग्निना ऋग्वेदस्य मन्त्रसमाहारादनन्तरं) ये ये मन्त्राः अवशिष्टा आसन्, तान्

मथर्वणा समाहरय्य अथर्ववेदस्य देहप्रतिष्ठा मकारयत्, ततो वेदाश्चतुर्धा बभूवुः । वस्तुतस्तु भगवान् कृष्णद्वैपायनस्तु अष्टाविंशव्यासो न पुनरादिरिति । यदुक्तं विष्णुपुराणे—

त्रेतायां प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा ।
त्रेतायां द्वितीये चैव वेदव्यासः प्रजापतिः* ॥ ११
तृतीये चोशना व्यासश्चतुर्थे च बृहस्पतिः ।
सविता पञ्चमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः ॥ १२
सप्तमे च तथैवेन्द्रो वशिष्ठश्चाष्टमे स्मृतः ।
सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः ॥ १३
एकादशे तु त्रिवृषा भरद्वाजस्ततः परम् ।
त्रयोदशे चान्तरीक्षो वप्री चापि चतुर्दशे ॥ १४
त्रय्यारुणः पञ्चदशे षोड़शे तु धनञ्जयः ।
कृतञ्जयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः ॥ १५
ततो व्यासो भरद्वाजो भरद्वाजात्तु गौतमः ।
गौतमादुत्तमो व्यासो "हर्य्यात्मा" योऽभिधीयते ॥ १६
अथ हर्य्यात्मनो वेणः स्मृतो वाजश्रवान्वयः ।
सोमशुष्मायण स्तस्मात् तृणविन्दुरिति स्मृतः ॥ १७
ऋक्षोऽभूत् भार्गवस्तस्मात् वाल्मीकिर्य्योऽभिधीयते ।
तस्मादस्मत्पिता शक्तिर्व्यास स्तस्मादहं मुने ॥ १८
जातूकर्णोऽभवत् मत्तः कृष्णद्वैपायन स्ततः ।
अष्टाविंशति रित्येते वेदव्यासाः पुरातनाः ॥ १९
एकोवेदश्चतुर्धातु यैः कृतो द्वापरेषु च ।
भविष्ये द्वापरे चापि द्रौणिर्व्यासोभविष्यति॥२०—३अ—३यंश ।

कोऽयं स्वयम्भूः ? एषा तु पौराणिकी भ्रान्तिरेव । ते तु ब्रह्मवितय मेकं मत्वा एवं प्रयोगस्त्वैर माश्रितवन्तः । वस्तुतस्तु एष स्वयम्भूर्ब्रह्मा न, परन्तु

---

* द्वापरे प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा ।
द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः ॥ ११
इति तु पाठो न खलु साधीयान् । यतः ब्रह्मादयः सर्वे देवाः त्रेतायुगे वर्त्तमाना आसन् ।

सुरज्येष्ठो ब्रह्मा, कः, परमेष्ठीति। तदादेशेन अग्न्यादयः सर्व्वादौ त्रयीविभागं सम्पादयामासुरिति ततः प्रजापतिर्द्वितीयो व्यासः, अयमेव—प्रजापतिः वैवस्वतो मनुरिति अनुमीयते वायुपुराणवचनात्। स एव अयोध्या राजवंशस्य प्रवर्त्तक इति। षष्ठो व्यासस्तु मृत्युः शिव इति प्रतीयते, यमस्य व्याकरणाभावात् साहित्यचर्च्चाभावाच्च। अथ व्यासानां नामानि लिख्यन्ते।—

१। स्वयम्भूरिति भ्रान्तिरेषा सुरज्येष्ठो ब्रह्मा। २। प्रजापतिः—तदधीनो वैवस्वतो मनुः। ३। उशना दैत्यगुरुः। ४। देवगुरुर्वृहस्पतिः। ५। सविता—अदितिनन्दनविशेषः। ६। मृत्युः—शिवः ७। इन्द्रो देवराजः। ८। वशिष्ठः (उर्वशीतनयः) ८। सारस्वतः। १०। त्रिधामा ११। त्रिवृषा। १२। भरद्वाजः १३। अन्तरीक्षः। १४। वप्री। १५। त्रय्यारुणः। १६। धनञ्जयः। १७। क्रतञ्जयः। १८। ऋणज्यः। १८। भरद्वाजः (द्वितीयः)। २०। गौतमः २१। उत्तमः (नामान्तरं हर्य्यात्मा)। २२। वेणः (वाजश्रवापत्यं) २३। सोमशुष्मायणः (अस्य नामान्तरं तृणविन्दुरिति)। २४। ऋचो भार्गवः, अयं भृगुकुलप्रभवो नामान्तर मस्य (वाल्मीकिः) २५। शक्तिः। २६। पराशरः। २७। जातूकर्णः २८। कृष्णद्वैपायन—व्यासदेवः।

अनेन वेदविभागशब्देन किमेव बोद्धव्यं? न खलु एकस्यैव वेदस्य द्विधा-त्रिधा विभजनं, परन्तु एतानि पृथक् पृथक् संस्करणान्येव। शाखाशब्देनापि न खलु वेदानां पार्थक्यं संसूचितं, ये वेदमन्त्रा माध्यन्दिनीशाखायां वर्त्तन्ते, त एव काण्वशाखायां दृश्यन्ते। तत्र केवलं क्वचित् पाठभेदो वैषम्यं सूचयति। ये मन्त्राः आश्वलायनशाखायां त एव मन्त्राः शाकलशाखायां, य एव मन्त्राः कौथुमी शाखायां, त एव च मन्त्रा राणायनी-शाखायां। प्रतिसंस्करणे नूतनं विरचिता मन्त्राः समाम्नाताः सन्तः तेषु नूतनसंस्करणेषु, संयोजिता आसन्। शाखानां कति वा संख्या स्तदपि—अनिर्णेय मिति। तथाहि विष्णुपुराणम्।

ब्रह्मणा चोदितो व्यासो वेदान् व्यस्तुं प्रचक्रमे।
अथ शिष्यान् स जग्राह चतुरो वेदपारगान्। ७
ऋग्वेदश्रावकं पैलं जग्राह स महामुनिः।
वैशम्पायननामानं यजुर्वेदस्य चाग्रहीत्॥ ८

जैमिनिं सामवेदस्य तथैवाथर्ववेदवित्।
सुमन्तुस्तस्य शिष्योऽभूत् वेदव्यासस्य धीमतः॥ ८
एक आसीत् यजुर्वेदस्तं चतुर्धा व्यकल्पयत्।
चतुर्होत्रमभूत् यस्मिन् तेन यज्ञमथाकरोत्॥ १०
आध्वर्य्यवं यजुर्भिस्तु ऋग्भिर्होत्रं तथा मुनिः। ११
उद्गात्रं सामभिश्चक्रे ब्रह्मत्वञ्चाप्यथर्वभिः॥ १२
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् मुनिः।
यजूंषि च यजुर्वेदं सामवेदञ्च सामभिः॥ १३
राज्ञस्त्वथर्ववेदेन सर्वकर्माणि स प्रभुः।
कारयामास मैत्रेय ब्रह्मत्वञ्च यथास्थिति॥ १४
सोऽयमेकोमहावेदतरुस्तेन पृथक् कृतः।
चतुर्धा तु ततो जातं वेदपादपकाननम्॥ १५

परन्तु नैतत् सर्वं विसंवादपरिशून्य मिति। यतः कृष्णद्वैपायनात् बहु प्रागेव मनुना चत्वारोवेदाः विभक्ताः। ततः प्राक् ब्रह्मण आदेशात् अग्निवायुसूर्य्यदेवैः तथ्या देहप्रतिष्ठा सम्पादिता।

एक एव पुरावेदः प्रणवः सर्ववाङ्मयः।
एको नारायणो देव एकोऽग्निर्वर्ण एव च॥

इति यत् वोपदेवगोस्वामिना धीमता भिषजा तस्य भागवते उक्तं, तत्र समीचीनम्। अत्रापि विष्णुपुराणप्रणेता यदुक्तं—

एको महावेदतरुः पृथक् कृतः।

एतदपि समीचीनं न, यतः पूर्वमेकोवेदः ऋग्यजुःसामभूयिष्ठो नासीत्, एतेषां वेदानां व्याहृतिरुत्पत्तिस्थानञ्च एकं नासीत्। आदिसर्गेऽपि ये गेयमन्त्राः प्रणीता स्तेषां समाहारेण—सामवेदः सम्पादितो बभूव। उक्तञ्च भगवता जैमिनिना व्यासशिष्येण—

गीतिषु सामाख्या। २६—१ पा—२अ।

तत्र शबरस्वामी—अथ साम्नः किं लक्षणं? विशिष्टा काचित् गीतिः साम उच्यते।

वस्तुतस्तु या ऋचः पदानि ज्ञेया स्तासां समाहारेण सामवेदो घटितः। तर्हि का ऋक् ?—

तेषाम् ऋक्, यत्र अर्थवशेन

पादव्यवस्था। ३५—१ पा—२ अ

तत्र शवरस्वामी—तस्मात् यत्र पादकृता व्यवस्था सा ऋगिति।

अतएव ऋक् पद्यं, तत्र यत् गेयं तत् साम। किं तर्हि यजुः ?—

शेषे यजुः शब्दः। ३७—१ पा—२ अ, मीमांसा।

तत्र शवरस्वामी—या न गीतिर्न पादबद्धं प्रश्लिष्टपठितं, तत् यजुरिति।

अतएव गद्यमया मन्त्रा एव यजुरिति ज्ञेयं। अथर्ववेदस्तु पद्यमयः, ऋग्वेदस्य देहप्रतिष्ठानन्तरम् या ऋचः शिष्ठाः आसन् तासां समष्टिरेव अथर्ववेदः। अङ्गिरोगोत्रीयेण केनचित् अथर्वणा मनो रादेशात् ते शिष्ठा मन्त्राः समाहृता स्ततः आथर्वाङ्गिरसी श्रुतिरिति। उक्तञ्च मनुसंहितायां- श्रुतीरथर्वाङ्गिरसीः। ३३—११ अ

अथ ऋग्वेदशाखाविभागः।

विभेद प्रथमं विप्र पैल ऋग्वेदपादपम्।
इन्द्रप्रमतये प्रादात् वास्कलाय च संहिते॥ १६
चतुर्धा स विभेदाथ वास्कलि द्विज संहिताम्।
बौध्यादिभ्यो ददौ तास्तु शिष्येभ्यः स महामुनिः॥ १७
बोध्याग्निमाठरौ तद्वत् याज्ञवल्क्यपराशरौ।
प्रतिशाखास्तु शाखायास्तस्यास्ते जगृहुर्मुने॥ १८
इन्द्रप्रमतिरेकां तु संहितां स्वसुतं ततः।
माण्डूकेयं महात्मानं मैत्रेयाध्यापयत् तदा॥ १९
तस्य शिष्यप्रशिष्येभ्यः पुत्रशिष्यान् क्रमात् ययौ।
वेदमित्रस्तु सकल्यां संहितां तामधीतवान्॥ २०
चकार संहिताः पञ्च शिष्येभ्यः प्रददौ च ताः।
तस्य शिष्यास्तु ये पञ्च तेषां नामानि मे शृणु॥ २१
मुद्गलो गालवश्चैव वात्स्यः शालीय एव च*।
शिशिरः पञ्चमश्चासीत् मैत्रेय सुमहामुनिः॥ २२

संहितात्रितयं चक्रे शाकपूणिरथेतरम्।
निरुक्तमकरोत् तद्वत् चतुर्थं मुनिसत्तम ॥ २३
क्रौञ्चो वैतालिकस्तद्वत् बलाकश्च महामतिः।
निरुक्तकृत् चतुर्थोऽभूत् वेदवेदाङ्गपारगः ॥ २४
इत्येताः प्रतिशाखाभ्योऽप्यनुशाखा द्विजोत्तम।
वास्कलि श्चापरास्तिस्रः संहिताः कृतवान् द्विजः ॥ २५
शिष्यः कालायनिर्गार्ग्य स्तृतीयश्च कथाजवः।
इत्येते बहुधा प्रोक्ताः संहिता यैः प्रवर्त्तिताः ॥ २६।४ अ—३अंश

एतेन अनुमीयते ऋग्वेदसंहिता बहुशाखासु विभक्ता बभूव। परन्तु तासां सर्वासां शाखानां सम्यक् नामापि न ज्ञायते—ग्रन्था अपि न दृश्यन्ते। केचित् राष्ट्रविप्लवेन विनष्टाः, केचिच्च गृहदाहेन भस्मीभूताः, केचिच्च कीटानां जठर-ज्वालानिवृत्तये लुप्तदेहाः। ये च केचित् ग्रन्था विद्यन्ते ते सर्वैरज्ञाता यत्र तत्र वा सन्ति। केचिदेवं वदन्ति यत् मुसलमानाक्रमणेन सहसा सर्वे वेदादि विनष्टा बभूवुः। परन्तु नैतत् सत्यमित्येव प्रतीयते। वस्तुतस्तु अपवादोयं सर्वथैव अमूलक इति। यतो यदा यास्कनिरुक्तौ प्रचलितान् ऋग्वेदमन्त्रान् विना अन्ये मन्त्रा न दृश्यन्ते, पाठभेदोपि न, तदा अकारणमन्येषां दोषाविष्करणम् असमीचीनमेव।

या शाखा साम्प्रतं प्रचलिता अस्मिन् भारतवर्षे सा खलु वास्कलशाखा एव। वास्कल एव ऋषि मन्त्राणां पदपाठविभागप्रथां प्रवर्त्तितवान्। मुम्बयी प्रकाशितायाम् ऋग्वेदसंहितायां यादृक् सूक्तसन्निवेशो दृश्यते, मोक्षमूलरप्रका-शितायां तथा न। अतो वयं मन्यामहे—मोक्षमूलरप्रकाशिता शाखा वास्कल शिष्यशाकलेन प्रवर्त्तिता, मुम्बयीप्रचारिता शाखा तु आश्वलायनकृता इति। यतो बङ्गदेशेऽपि आश्वलायनशाखाया नामनिर्देशो लभ्यते। दृश्यते च ताम्रफलकादिषु। यथा—

"जगद्धर देवशर्म्मणः प्रपौत्राय नारायणदेवशर्म्मणः पौत्राय, नरसिंह-देव-शर्म्मणः पुत्राय गार्ग्यसगोत्राय अङ्गिरोवृहस्पतिशिलगर्गभरद्वाजप्रवराय—
ऋग्वेदाश्वलायनशाखाध्यायिने

* मुद्गलो गोकुलो वात्स्यः शैशिरः शिशिरस्तथा।
पञ्चैते शाकलाः शिष्याः शाखा भेदप्रवर्त्तकाः।

श्रीलक्ष्मणधरदेवशर्म्मणे ताम्रशासनोत्कीर्त्य प्रदत्तः अस्माभिः। सुन्दरवनसन्निधौ प्राप्तं लक्ष्मणसेनताम्रफलकम्।

ऋग्वेदस्य साङ्ख्यायनः, शाकलः, वास्कलः आश्वलायनः माण्डुकश्च एते पञ्च सूत्रकाराश्च आसन्। तेषां श्रौतसूत्राणि लभ्यन्ते इति।

अथ यजुर्वेदशाखाविभागः।

यजुर्वेदतरोः शाखाः सप्तविंशन्महामुने।
वैशम्पायननामासौ व्यासशिष्यश्चकार वै॥ १
शिष्येभ्यः प्रददौ ताश्च जगृहुस्तेप्यनुक्रमात्।
याज्ञवल्क्यस्तु तस्याभूत् ब्रह्मरातसुतो द्विज।
शिष्यः परमधर्म्मज्ञो गुरुवृत्तिपरः सदा॥ २

का एताः सप्तविंशतिसंख्यकाः शाखास्तदपि न ज्ञायते। अस्मद्देशेषु या शाखा प्रचलिता, सा तु माध्यन्दिनीति नाम्ना प्रसिद्धा। अथ या काण्वशाखा काश्यां लभ्यते, तत्र केवलं कियान् पाठभेद एव दृश्यते इति।

यजुर्वेदस्यापि पञ्च सूत्रकारा आसन्। तद् यथा आपस्तम्बः, हिरण्यकेशीयः, मैत्रायणीयः, सत्याषाढः बौधायनश्च।

ये ये मुख्यब्राह्मणा अन्यब्राह्मणाश्च अन्तरीचात् असुरभय-विह्वलाः सन्तः पार्शीजातिवत् भारतवर्षमाजग्मुः, ते सर्वे प्रायेण यजुर्वेदाध्यायिन एव।

अथ सामवेदशाखा।

सामवेदतरोः शाखा व्यासशिष्यः स जैमिनिः।
क्रमेण येन मैत्रेय विभेद शृणु तन्मम॥ १
सुमन्तुस्तस्य पुत्रोऽभूत् सुकर्म्मास्यापरभूत् सुतः।
अधीतवन्तौ त्वेकैकां संहितां तौ महामुने। २
सहस्रं संहिताभेदं सुकर्म्मा तत्सुत स्ततः।
चकार ताश्च तच्छिष्यौ जगृहाते महामती॥ ३
हिरण्यनाभः कौशल्यः पौष्यिञ्जिश्च द्विजोत्तम।
उदीच्याः सामगाः शिष्यास्तेभ्यः पञ्चदश स्मृताः॥ ४
हिरण्यनाभात् तावत्यः संहिता यैर्द्विजोत्तमैः।
गृहीतास्तेपि चोच्यन्ते पण्डितैः प्राच्यसामगाः॥ ५

लोकाक्षिः कुथुमिश्चैव कुसीदिर्लाङ्गलिस्तथा।
पौष्यिञ्जिशिष्यास्तद्भेदैः संहिता बहुलीकृताः। ६
हिरण्यनाभशिष्यश्च चतुर्विंशतिसंहिताः।
प्रोवाच कृतिनामासौ शिष्येभ्यः स महामतिः॥
तैश्चापि सामवेदोऽसौ शाखाभिर्बहुलीकृतः॥ ७

६ष्ठ—३य अंश।

सामवेदस्य शाखाः सहस्रश इति श्रूयते, न तु ताः केनापि दृश्यन्ते दृष्टा वा इदानीन्तनैः। मन्ये तत् सर्वं विलोपं गतमिति। साम्प्रतं तु केवलं "कौथुमी" शाखा प्रचरद्रूपा, राणायनी शाखापि कैश्चित् दृष्टा इति किंवदन्ती।

सामवेदस्तु सर्वेभ्यो वेदेभ्य एव प्राचीनतमः। एष तु अस्माकं पितृलोके प्रणीत इति एतस्य गौरवाधिक्यं तेनैव गीतायामुक्तम्—

"वेदानां सामवेदोऽस्मि"

एतस्य दशसूत्रकारा आसन् इति च जनश्रुतिः श्रुतिं चपलयति, परन्तु कौथुमः, राणायनः, गोभिलः राणायनीयः, एते चत्वार एव परिचिता इति।

अथ अथर्ववेदशाखा।

अथर्वाणामथोवक्ष्ये संहितानां समुच्चयम्।
अथर्ववेदं स मुनिः सुमन्तुरमितद्युतिः॥ ८
शिष्यमध्यापयामास कबन्धं सोऽपि तत्द्विधा।
कृत्वा तु देवदर्शाय तथा पथ्याय दत्तवान्॥ १०
देवदर्शस्य शिष्यास्तु मौद्गो ब्रह्मबलिस्तथा।
शौल्कायनिः पिप्पलादस्तथान्यो मुनिसत्तम॥ ११
पथ्यस्यापि त्रयः शिष्याः कृता ये द्विज संहिताः।
जाजलिः कुमुदादिश्च तृतीयः शौनको द्विज॥
शौनकस्तु द्विधा कृत्वा ददौ एकां तु बभ्रवे।
द्वितीयां संहितां प्रादात् सैन्धवायनसंज्ञिने॥ १२
सैन्धवा मुञ्जकेशाय भिन्ना वेदा द्विधा पुनः।
नक्षत्रकल्पो वेदानां संहितानां तथैव च॥ १४

चतुर्थः स्यात् आङ्गिरसः शान्तिकल्पश्च पञ्चमः।
श्रेष्ठास्त्वथर्वणामेते संहितानां विकल्पकाः॥ १५

६ अ—३ अंश—वि: पु

अथर्ववेदस्य पिप्पलादीया शौनकीया च द्वे शाखे विद्येते। अहो अन्यत् सर्वं ममंख्यं वैदिक-पुस्तकं विलुप्तं केचिद्दा ग्रन्था भारतीजनगौरवभूता यत्र तत्र अज्ञातवासे निवसन्ति।

वेदानां पौर्वापर्य्यम्।

यदा सर्वे वेदाः पौरुषेयाः कृतका इदानीन्तनाश्च, तदा उत्पन्नत्वात् तेषां पौर्वापर्य्यमपि अस्ति, इति अनुमीयते। तर्हि वेदचतुष्टयानां मध्ये क एव वेदः प्राचीनतमः कएव पुनः कनीयान्।

वेदानां मध्ये सर्वादौ त्रय्या एव देहप्रतिष्ठा अभवत्, तदा अथर्ववेदस्य वार्त्तापि न आसीत्, अतो वेदेषु अथर्ववेद एव सर्वेभ्यः कनीयान् इति गम्यते श्रुतिप्रमाणात्।

तस्मात् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मादजायत॥ ८।८०।१०म

तस्मै यज्ञाय यज्ञसिद्ध्यर्थम् ऋग्यजुःसामलक्षणं वेदत्रयं विरचितं, गायत्र्यादीनि छन्दांसि च साध्यदेवैर्ग्रथितानि। किन्तु छन्दः पद्ये च वेदे च। अतएव "छन्दांसि" पदेन अत्र कथम् अथर्ववेदस्यापि परिज्ञानं न भवेत्? महात्मना दयानन्देन तु एवमेव स्थिरीकृतम्। परन्तु यदा सर्वादौ त्रय्या एव विभागः सम्पादितस्तदा अस्मिन् मन्त्रे प्रयुक्तेन "छन्दांसि" इति पदेन त्रयीतराथर्ववेदस्य संसूचना भवितुं न शक्यते वेदविरुद्धत्वात्। इदं छन्दांसीति तु पदं गायत्र्यादेरेव संसूचकं न तु चतुर्थस्य वेदस्य अथर्वण इति। यतः—

अग्नेर्ऋचः, वायोर्यजूंषि सामानि आदित्यात् इतिश्रुतेः।

अस्त्वेवं वेदचतुष्टयेषु अथर्ववेदः अर्वाचीन इति स्वीकार्य्यं, परन्तु अन्येषां वेदानां मध्ये को वर्षीयान् को यवीयान् वा? सर्वेषु वेदेषु सामवेद एव सर्वेभ्यो वर्षीयान्, ऋग्वेदो द्वितीयो यजुर्वेद एव तृतीयः, अथर्ववेद एव चतुर्थः कनीयांश्च इति शास्त्रालोचनया उपलभ्यते।

तत् कथं सायणादयः पाश्चात्याश्च सर्वे कोविदाः ऋग्वेदस्य आदिमत्वं प्राथम्यञ्च निर्द्दिशन्ति ? तत्तु तेषां निरङ्कुशत्वं स्वातन्त्र्यञ्च स्वैरविचेष्टा वा इति। वस्तुतस्तु ये केचन वेदानां पठनपाठनादिभि र्दिगन्तविश्रुता अभवन्, ते आचार्य्यपादाः सायणदयानन्द—मोक्षमूलरादयश्च कथमित्थं स्थिरीचक्रुः, तत्र वयं वक्तु मुत्सहामहे। यदि ऋग्वेदो वर्षीयान् न स्यात्, तर्हि कथं कौषीतकी ब्राह्मण मिदमुक्तवत् ?

तत्परिचरणौ इतरौ वेदौ। ६-२

इतरौ सामयजुर्वेदौ तस्य ऋग्वेदस्य परिचरणौ सेवकौ। तत्र मोक्षमूलरः — Thease two Vedas, the Yajur Vada and the Sama Veda were, in truth, what they are called in the Kaushitaki Brahman, the attendants of the Rigveda. S. T. Vol. II, P. 203.

नैवम्। एतत्तु ब्राह्मणप्रणेतुः स्वदेशप्रीतिप्रकटनमिति। यत ऋग्वेदो भारतीयसम्पत्, अतो भारतीय एव ब्राह्मणग्रन्थ एवं निरदिशत्। अथवा ऋषिरनेन ऋग्वेदस्य प्राचीनत्वं न उक्तवान्, परन्तु ऋग्वेदस्तु विषयगौरवात् अन्येभ्यो वेदेभ्यः—श्रेष्ठतम इत्येव व्यक्तीचकार इति। तत् कथं सायणोऽपि एव मवदत्—

"अत्र केचिदाहुः—ऋग्वेदस्य प्राथम्येन सर्वत्र आम्नातत्वात् "अभ्यर्हितं पूर्वम्" इति न्यायेन अभ्यर्हितत्वात् तद्व्याख्यानम् आदौ युक्तम्। प्राथम्यञ्च पुरुषसूक्ते विस्पष्टम्—

तस्मात् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात् यजुस्तस्मात् अजायत॥

इति। सहस्रशीर्षा पुरुष इत्युक्तत्वात् परमेश्वरात् यजनीयात् पूजनीयात् सर्वहुतः सर्वैर्हूयमानात् यद्यपि इन्द्रादयस्तत्र तत्र हूयन्ते, तथापि परमेश्वरस्यैव इन्द्रादिरूपेण अवस्थानात् अविरोधः। तथाच मन्त्रवर्णः—

इन्द्रं मित्रं वरुणमग्निमाहु रथो दिव्यः स पुरुषो गरुत्मान्
एकं सत् विप्रा बहुधा वदन्ति, अग्निं यमं मातरिश्वान माहुः॥ इति

सायणस्तु तदीयोपद्घात-प्रकरणप्रारम्भे एवमुक्तवान्। अस्तु तावदेतत्। परन्तु तदुक्तिरेषा न खलु कथमपि साधीयसी युक्तिविरुद्धत्वाद् वेद-विरुद्धत्वाच्च।

पूर्वं तावत् वेदा याज्ञसेनीवत् यज्ञात् यज्ञकुण्डात् न उत्पन्नाः, न च पुनस्ते यज्ञात् यजनीयात् परमेश्वरात् वा उत्पन्ना, वेदा देवेभ्य उत्पन्ना देवैर्ब्राह्मणैः पाराशरकक्षीवत्कवषवोषादिभिश्च प्रणीता इति वेदेषु एव दृश्यते। अथ इन्द्रादयः शब्दा परमेश्वरस्यैव नामभेदा इति च न साधीयः, यत स्ते इन्द्रादयो देवाः काश्यपात्मजा जननमरणशीला नरा एव। अतएव उद्धृतवेदमन्त्र एव प्रमाद-दुष्टः, न खलु तत् प्रमाणं भवति स्वयमसिद्धत्वात्। ऋग्वेदस्य सर्वेभ्यः अभ्य-र्हितत्वञ्च अपि न खलु स्वीकृतसत्य मिति छान्दोग्यवचनात् अनुमीयते एषां भूतानां पृथिवी रसः, पृथिव्या आपो रसः; अपामोषधयो रसः, ओषधीनां पुरुषो रसः, पुरुषस्य वाक् रसो, वाच ऋग्रस ऋचः साम रसः (सारः) ७ पृ। नक्षत्राणि एव ऋक्, चन्द्रमाः साम, तदेतस्याम् ऋचि अध्यूढं साम। तथाहि भगवद्गीता—

"वेदानां सामवेदोऽस्मि"

यदि छान्दोग्य-गीतावचनं प्रमाणं स्यात्, तर्हि वेदेषु सामवेद एव अभ्यर्हितो न पुन र्ऋगादय इति। भगवता मनुनापि उक्तम्—

सामध्वनौ ऋग्यजुषी नाधीयीत कदाचन। १२३

सामवेदः स्मृतः पित्र्य स्तस्मात् तस्याशुचिर्ध्वनिः। १२४-४अ

यदा सामवेदस्य गानं भवेत्, तदा ऋग्वेदं यजुर्वेदञ्च न अधीयीत न पठेत्। यत स्तत्पठनेन पवित्रस्य समधिकपूजनीयस्य च सामवेदस्य ध्वनिः अशुचिर्भवेत्। कथं सामवेदः पूजनीयः! यतः स सामवेदः पित्र्यः पितरि भवः—अस्माकं पितृलोके स्वर्गे प्रणीत इति। उक्तञ्च तत् छान्दोग्येन—

आदित्यं दिवः, सामानि आदित्यात्, स्वरिति सामभ्यः। ३००-१ पृ महेशपाल।

ब्रह्मा वेदमन्त्रसमाहरणाय दिवः स्वर्गात् आदित्यं सूर्यं सावर्णिमनोः पितरं जग्राह। स च सूर्यः सामवेदस्य समाहर्त्ता, समाहरणस्थानञ्च स्वरादि स्वर्गो द्यौ स्तथाहि कृष्णयजुः—देवलोको वै साम, देवलोकादेव अध्यमन्त्रं मनुष्यलोकं प्रत्यवरोहन्तो यन्ति। ४७७पृ

सामवेदो देवलोके द्यवि प्रणीतः ततस्तस्मात् मनुष्यादिलोकेषु भारतवर्षा-दिषु च समानीत इति।

अतएव पितरि द्यवि स्वर्गे उत्पन्नत्वात् आदिपैतृकवस्तुत्वाच्च सामवेदस्यैव

अभ्यर्हितत्वं, नतु पुनर्ऋग्वेदस्य इति। ऋग्वेदो भारतीयसम्पत् अतः पुरुषसूक्तप्रणेत्रा पूर्व्वमेव ऋग्वेदस्य नामग्रहणं कृतं, नतु तत्र तस्य सर्व्वश्रेष्ठत्वादिति। युक्तिरपि सामवेदस्य पूर्वोत्पन्नत्वं समर्थयति। यतः सर्वादौ स्वर्गे एव गीर्वाणवाणी, नागराक्षराणि च उद्भावितानि। तत्रैव सर्वादौ कवित्वस्य विकाशोऽभवत्। तत्रैव स्वर्गे सर्वादौ देवाः सूक्तवाक्यस्यैव प्रथममुत्पादनं कृतवन्तः। तेषां समाहारेण एव सामवेदस्य देहप्रतिष्ठा अभवत्, अतो न ऋग्वेदानां प्राचीनत्वं न च तेषामभ्यर्हितत्वं वा सामवेदेभ्य इति। तत् कथं मार्कण्डेयेनापि ऋषिणा एवमुक्तम् ?

तस्मात् अण्डात् विनिर्भिन्नात् ब्रह्मणोऽव्यक्तजन्मनः।
ऋचो बभूवुः प्रथमं प्रथमात् वदनात् मुने ॥ १

मार्कण्डेयेन सूर्य्योत्पत्तिप्रकरणे एवमुक्तं, परन्तु एषा तस्य मुने र्भ्रान्तिरेव। यतो यो ब्रह्मा अण्डात् प्रसूतः,स खलु निरक्षर आदिमानवो लोकपितामहो ब्रह्मा, तस्य भाषाकवित्वविहीनस्य मुखात् ऋचो विनिःसृता इति न युक्तिर्निर्दिशति। अथवा यस्य कस्यापि ब्रह्मणो मुखादिभ्यो वेदा निर्गता इदमपि युक्तिप्रमाणविरुद्धत्वात् न ग्रहणीयं स्यात्।

तत् कथं मोक्षमूलरादयोऽपि एवमवदन् यत् यजुर्वेदः सामवेदश्च So called वेदौ, ऋग्वेदस्य मन्त्रैरेव एतयोर्देहप्रतिष्ठा अभवत्. भ्रान्तिरेषा तेषामिति। स्वर्गभ्रष्टा वैवस्वतमन्वादयो देवा एव (तदा न ते क्षत्रिया आसन् तदा चातुर्वर्ण्यप्रतिष्ठाया अभावात्) स्वर्गात् भारत मागताः, ते सामगा आसन्, साम गायन्त एव ते भारतं प्रविष्टाःइति—यदुक्तं यजुषि—

दिवि विष्णुर्व्यक्रंस्त जागतेन छन्दसा, अन्तरिक्षे विष्णुर्व्यक्रंस्त त्रिष्टुभेन छन्दसा, पृथिव्यां विष्णुर्व्यक्रंस्त गायत्रेण छन्दसा। ६८पृ

वामनविष्णुस्तु वैवस्वतमनुश्रयुप्रभृतिभिः सह त्रिभिः छन्दोभिः साम गायन् पृथिवीं पृथोः पृथुलजनपदं भारतवर्षं प्रविष्टः। ततो भारतागता स्तेदेवा यस्मिन् भारतवर्षे यान् यान् मन्त्रान् प्रणिन्युस्तेषा मेव समाहारेण ऋग्वेदस्य तथा अथर्ववेदस्य च देहप्रतिष्ठा अभवत्। एतत् सत्यं यत् त्रय्या विभागो हि त्रेतायां समकालमेव अभवत्, परन्तु तेषां मन्त्राणामुत्पत्ति स्तु न खलु समकालं बभूव। सर्वादौ विश्वेदेवनिविदः प्रणीताः, तदनु साममन्त्राः सत्यावसानसमये त्रेतादौ

च प्रणीता:। ततश्च त्रेतादौ द्वापरयुगे च ऋङ्मन्त्राः यजुर्मन्त्रा अथर्ववेद मन्त्राश्च प्रणीता इति। अत एषां मध्ये विश्वेदेवनिविद एव सर्वेभ्यः प्राचीन तमाः, तदनु साममन्त्राः, तदनु ऋग्यजुरथर्वमन्त्राश्च प्रणीता इति। कि मत्र प्रमाणम्? विश्वेदेवनिविदस्तु न कस्मिन्नपि वेदे अवकाशं प्राप्ताः, परन्तु तासां भाषा एव तासां प्राचीनत्वं द्योतयति, यथा—

१। तक्कान्नानि मतिथोवानः।

२। अस्क्राः पचत वाहसः।

३। मा वो देवा अपि शसा, मा परिशसा ब्रुचि।

४। द्यावापृथिवी पञ्चदश, ऋभवो देवाः पञ्चदश, विश्वेदेवा स्त्रिंशत्, मरुतोदेवा श्चतुर्दश॥ एतासां निविदां भाषा दुरधिगम्या, न सायणादिभिरपि एतासां व्याख्या कृता। पौराणिकाः साम्प्रतं वदन्ति भुवनानि चतुर्दश, परन्तु पूर्वं भुवनसंख्याः पञ्चदश एव आसन्, मन्ये हरियूपीया (Europe) पञ्चदशीति। एवं विश्वेदेवादीना मपि संख्याविधौ पार्थक्यं जातम्। सामवेदेऽपि इत्थं दुरूहपदकदम्बकं नास्ति, अतएव निविदएव प्राचीनतमा इति गम्यते। तथाहि ऋग्वेदः— तान् पूर्वया निविदा हूमहे।३—८८सू—१म

वयं रहूगणाः तान् विश्वेदेवान् पूर्वया पूर्वं प्रणीतया निविदा निविदाख्येन मन्त्रेण हूमहे आह्वयामः। तथाहि ऐतरेयब्राह्मणम्—

गर्भा वै एते उक्थानां यन्निविदः। ३१०पृ

पेशा वै एते उक्थानां यन्निविदः। ३११पृ

उक्थानि साममन्त्राः, निविद स्तेषां गर्भा उत्पत्तिस्थानं पेशा च पेशी स्वरूपाश्च। अतएव महर्षि वायुना उक्तम्—

वेदाः सप्तर्षिभिः प्रोक्ताः स्मार्त्तं धर्मं मनुर्जगौ।
पूर्वेभ्यो वेदयित्वेह, श्रौतं सप्तर्षयोऽब्रुवन्।
ऋचो यजूंषि सामानि, ब्रह्मणोऽङ्गानि च श्रुतिः॥३१—५८ष

अतएव मरीच्यादयः सप्तर्षयः, पूर्वेभ्यो विश्वेदेवनिवित्प्रणेतृप्रभृतिभ्यो ज्ञात्वा साममन्त्रान् प्रणिन्युरिति। अतएव साममन्त्राः प्राचीनत्वे तु द्वितीय स्थानीयाः परन्तु वेदानां मध्ये स एव खलु सामवेदः प्राचीनतम इति ध्येयं ज्ञेयञ्च। कथ मेतत्? तत्र बहव एव हेतवो विद्यन्ते।

१। पूर्व्वं तावत् सामवेदस्य सर्वे मन्त्रा वैदिकसंस्कृतबहुला: पश्चान्तरे ऋङ्मन्त्रास्तु केचित् वैदिक-संस्कृत-भूयिष्ठा: केचिच्च वैदिकलौकिकसंस्कृत-बहुला:, केचिच्च केवलं लौकिकसंस्कृतमया इति । यथा—

(क) जराबोध तत् विविड्ढि विशे विशे यज्ञियाय। स्तोमं रुद्राय दृशीकम् । १५पृ

(ख) अग्ने युंच्वा हि ये तव अश्वासो देव साधव: । अरं वहन्ति आशव:

(ग) नि त्वा नक्ष्य विश्पते द्युमन्तं धीमहे वयम् । १३पृ

तत्र सायण:··· नक्ष्य उपगन्तव्य ! नक्षति र्व्याप्तिकर्म्मा । एवमन्येऽपि बहवो दुरधिगम्या: शब्दा सामवेदे विद्यन्ते । ऋचि अपि एवं शब्दा वर्त्तन्ते परन्तु ते तु अल्पसंख्यका एव । अथ सामवेदेषु यथा प्राचीनतमा व्याकरण-प्रयोगा विद्यन्ते, तथा ऋचि यजुषि च न । यथा—

अग्निं वो वृधन्तम् अध्वराणां । ११पृ तत्र सायण: हे ऋत्विज: ! वो यूयम् ।

कथमत्र "वो यूयम्" इत्थं व्याख्या कृता ? यत: प्राचीनतमवैदिकयुगे प्रथमाया अपि बहुवचनेषु "वस्नसौ" अभवतां, तेन हेतुना अत्र "वो यूयम्" इति प्रयुक्तं व्याख्यातं च । एवं लाटिनभाषाया मपि इत्थं प्रयोगा दृश्यन्ते ।

यथा–Latin.—Nos—we, Nos—us. Vos—you, Vos—you (युष्मान्)।

पाणिन्यादे: समये वस्नसौ केवलं द्वितीयाया: चतुर्थ्या: षष्ठ्याश्च बहुवचनेषु एव प्रयुक्तौ भवत इति । ऋग्वेदेऽपि तादृशा प्रयोगा दृश्यन्ते, परन्तु पश्चान्तरे सामवेदे न । अतएव अनेन सामवेदस्य प्राचीनत्वं पूर्वप्रभवत्वञ्च संसूच्यते इति । न केवलं वयं पाश्चात्या अपि केचित् मनीषिण: श्रीश्रीयेवरनामान एवमवदन् तत् सर्वं पश्चात् प्रदर्शयिष्यते । तथाहि—

२। सामवेदेषु न केवलं ब्रह्म, ईश्वर: परमेश्वरश्च एते शब्दा न दृश्यन्ते, परन्तु तदा सामरचनाकाले तस्य परमेश्वरस्य अस्तित्वमपि न कैरेव अनुभूतं यतस्तदानीं जना: सर्वे प्रकृतिपूजापरायणा आसन्, पश्चान्तरे ऋग्वेदेषु यथा प्रकृतिपूजा पद्धतिरुपलभ्यते, तथा तत्र सृष्टिकर्त्तु रनुभवश्च दृश्यते ।

३। सामवेदे वर्णशब्दोऽपि न लभ्यते चातुर्वर्ण्यवार्त्तापि न श्रूयते, पश्चान्तरे

ऋग्वेदे यथा केषुचित् मन्त्रेषु वर्णवार्त्ता न लभ्यते, तथा बहुषु मन्त्रेषु चातुर्वर्ण्य संसूचका ब्राह्मणराजन्यवैश्यशूद्रशब्दा विद्यन्ते।

४। सामवेदस्तु साधारणविषयभूयिष्ठः, पक्षान्तरे ऋग्वेदेषु बहुज्ञान विज्ञानसृष्टितत्त्वभगवत्तत्त्वादिविषयका बहु मन्त्राः सन्ति।

५। सामवेदेषु ऋग्वेदस्य एकोऽपि मन्त्रो न गृहीतः, पक्षान्तरे बहवः साम मन्त्रा ऋग्वेदमध्ये लब्धावसरा इति। वस्तुतस्तु चातुर्वर्ण्य प्रतिष्ठायाः पूर्वमेव सर्वे साममन्त्रा प्रणीताः अतएव त एव प्राचीनतमा इति।

साममन्त्रा ऋग्वेदेषु गृहीता इत्यत्र किं प्रमाणं? तत्र बहूनि एव प्रमाणानि सन्ति। येयं वेदमाता गायत्री चतुर्षु एव वेदेषु वर्त्तते, सा खलु सर्वादौ सामवेदे एव आसीत् आदिस्वर्गे प्रणीतत्वात्। यदुक्तं योगियाज्ञवल्क्येन—

तपसा सुसन्तप्तस्य आदिस्वर्गात् स्वयम्भुवः।
ओङ्कारपूर्वा गायत्री निर्जगाम ततोमुखात्॥

यदा सुरज्येष्ठब्रह्मा (न तु स्वयम्भू र्ब्रह्मा इति) भारतवर्षात् आदिस्वर्गे गतः (आदिस्वर्गात आदिस्वर्गं प्राप्य) अवस्थित आसीत्, तदा तस्यैव मुखात् ओङ्कारपूर्वा गायत्री वहिरासीत्—

ॐ तत् सवितुर्वरेण्यं भर्गोदेवस्य धीमहि॥
धियो यो नः प्रचोदयात्॥ १०—६२सू—२म। ७८० पृ साम

अतएव एषा गायत्री सामवेदादेव ऋग्यजुरथर्वसु वेदेषु गृहीता इति अनुमातुं वक्तुञ्च शक्यते। तथाहि—

ओङ्कार श्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिका वुभौ॥

एवं चेत् तर्हि योऽयं प्रणवः, वेदमन्त्रादौ अन्ते च व्यवह्रियते, सोऽपि साम वेदस्य, न तु अन्येषा मृगादीना मिति। तथाहि—

प्रथश्च यस्य सप्रथश्च नाम, आनुष्टुभस्य हविषो हविर्यत्।
धातुर्द्युतानात् सवितुश्च विष्णोः रथन्तरम् आ जभार वसिष्ठः॥१

यस्य वशिष्ठस्य प्रथः तथा सप्रथश्च नाम द्वौ पुत्रौ विद्येते, स एव भारतीयो वशिष्ठ ऋषिः, धातुः सुरज्येष्ठब्रह्मणः सकाशात्, तथा द्युतानात् (from the Tueton of heaven) द्युतानर्षेः, सवितुः सवितृनामकात्, विष्णोः सकाशाच्च

यत् हविशो हविः अतएव अति पवित्रम् आनुष्टुभस्य आनुष्टुभं (व्यत्ययो-बहुलमिति) अनुष्टुभछन्दोविरचितं रथन्तरं नाम साममन्त्रं आ जभार आजहार संगृहीतवान्। तथाहि—

अविन्दन् ते अतिहितं यदासीत्, यज्ञस्य धाम परमं गुहा यत्।
धातुर्द्युतानात् सवितुश्च विष्णो भरद्वाजो बृहदाचक्रे अग्नेः॥ २

यत् बृहत्साम यज्ञस्य परमं धाम, यच्च गुहा गुहासु अतिहितं संगुप्तम् आसीत यच्च ते धात्रादयः अविन्दन् अलभन्त, भरद्वाजो भारतीय ऋषिस्तत् बृहत् साम धातुः द्युतानात् सवितुः विष्णोस्तथा अग्नेश्च सकाशात् आचक्रे आहृतवान्। तथाहि—

ते अविन्दन् मनसा दीध्यानाः, यजुः स्कन्नं प्रथमं देवयानम्।
धातुर्द्युतानात् सवितुश्च विष्णोः, आ सूर्यात् अभरन् घर्म्ममेते॥ ३।१८१।१०म

ते धात्रादयः सर्वं प्रथमं देवयानं प्रथमे देवयाने आदिस्वर्गे धवि मनसा दीध्यानाः बहुध्यानं कुर्व्वन्तः यत् स्कन्नं मनःचरितं यजुः यजनमन्त्रम् अविन्दन् अलभन्त, ते धात्रादयो यान् घर्म्माख्यान् मन्त्रान् विरचितवन्तः, एते भारतीया ऋषयः सर्वं तत् यजुः तान् यजनमन्त्रान् स्तोमानिति यावत् तेभ्यो धात्रादिभ्य एव आभरन् आहृतवन्तो भारते आनीतवन्त इति यावत्।

अतएव स्वर्गात् स्वर्गप्रणीतात् सामवेदादेव वशिष्ठभरद्वाजादिभिर्भारतीयर्षिभिः रथन्तरबृहत्सामस्तोमादयः केचित् मन्त्रा भारते आनीतास्तत स्ते ऋग्वेद मध्ये प्रवेशिता इति ऋग्वेदवाक्यादेव अधिगम्यते। अतो न कथं सामवेदस्य प्राथम्यं प्राचीनतमत्वञ्च स्वीकृतसत्यं स्यात्?

साम खलु गेयं पद्यं। गानकरणमेव प्राचीनरीतिरिति। पूर्वं तावत् सर्वे सामाजिका सङ्गीतद्वारेण भजनपूजनादिकं चरितकथनादिकञ्च कृतवन्तः, अतएव गेयसाममयः सामवेदः प्राचीनतम इति प्रतीयते।

सर्वे सामगा भारतमागत्य पद्येन ऋग्वेदमन्त्रं प्रणीतवन्तः, तदा समधिक सभ्यताया उद्रेकात् सङ्गीतप्रथा परित्यक्ता; अतएव पादबद्धा ऋङ्मन्त्रा गानयोग्या अपि न गीता अभूवन्। अतएव सामवेदात् ऋगवेदः अवरज इति। ८

अथ अम्बरीषे स्थले परिणते सति वायुवरुणादयः केचित् देवा भारतवर्षात्

अन्तरीक्षं गताः। स्वर्गं पुनरधिकृतं इति ब्रह्मादयोबहवो देवाश्च याचि प्रतिजग्मुः। ततस्तस्मादपि स्वर्गात् बहवो देवा अन्तरीक्षं गत्वा उपनिविविशुः। तत स्तैः स्वर्ग भारतीयैर्देवमनुष्यै र्गद्ये न ये ये मन्त्राः अन्तरीक्षे प्रणीता स्तेषामेव समाहारेण यजुर्वेदस्य देहप्रतिष्ठा अभवत्। तदा सर्वे सामाजिकाः पद्यरचनाप्रथां परित्याज्य गद्यप्रथां प्रवर्त्ति तवन्तः। अतएव यजुर्वेदः खलु वयसि तृतीय इति प्रतीयते।

तर्हि किमथर्ववेदः पद्यमयो यजुर्वेदस्य अग्रज इति। नैवम्, अथर्ववेदस्य मन्त्राः केचित् ऋग्वेदस्य समकाल मेव केचित् वा अनन्तरमेव प्रणीता इति। परन्तु तेषां समाहारस्तु त्रय्याः समाहारात् अनन्तर मेव अभवत्, अतएव वयसि अथर्ववेदः खलु त्रय्याः कनीयानिति।

अथ यथा सामवेदे ब्रह्म, ईश्वरः परमेश्वरस्य ईश्वरवाचका एते शब्दा न सन्ति, तथा ऋग्वेदेऽपि ईश्वरवाचका एते शब्दा न विद्यन्ते। किन्तु ऋग्वेदस्य बहुषु मन्त्रेषु कस्यचित् सृष्टिकर्त्तुः सत्ताया अनुभवो बभूव, परन्तु तस्य स्रष्टुर्नामधेयकं ब्रह्म, ईश्वरः, परमेश्वरोवा इति कोऽपि निर्द्देशो नास्त्येव। पक्षान्तरे अथर्ववेदे ब्रह्मशब्दो दृश्यते।

इदं जनासो विदथ महत् ब्रह्म वदिष्यति।
न तत् पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः॥ १म खण्ड ११६

अतएव अनेनापि सर्वेभ्यो वेदेभ्यः अथर्ववेदस्य अवरजत्वम् अनुमीयते इति। तर्हि कथं यजुर्वेदे पद्यमया अपि केचित् मन्त्रा दृश्यन्ते? ये केचन पद्यमया ऋग्वेदीया मन्त्रा भारतवर्षात् अन्तरीक्षं गतैर्देवैः सह अन्तरीक्षं नीताः, ते मन्त्रा मन्त्रसमाहारसमये वायुना यजुषि प्रवेशिताः। अथ ये केचन पद्यमया मन्त्रा अन्तरीक्षे नूतनं विरचिता स्तेऽपि यजुषि स्थानं प्राप्ताः। यथा—

को अस्य वेद भुवनस्य नाभिं, को द्यावापृथिवी अन्तरिक्षम्। ५८क—२१अः
कास्वित् आसीत् पूर्वचित्तिः, द्यौरासीत् पूर्वचित्तिः॥ ११.१२ क—२३ अः

इत्येवमादयो मन्त्रा अभिनवा इति। अथ ये केचन मन्त्राः सामवेदे सन्ति, ऋग्वेदेपि सन्ति, तेषां मध्ये केचित् स्वर्गात् भारतागतानां देवानां सकाशात् महर्षिणा अग्निना ऋक्समाहारकाले गृहीताः केचित् वा इन्द्रदुहितृवचनस्य

प्रभृतयः स्वर्गस्य धात्रादिभ्यो भारतीयवशिष्ठभरद्वाजादिभिः गृहीत्वा ऋग्वेदे प्रवेशिता इति ।

आयं गौः पृश्निरक्रमीत्, असदत् मातरं पुरः । पितरञ्च प्रयन् स्वः ॥

अयं मन्त्रः चतुर्षु एव वेदेषु विद्यते, अतएव गायत्रीवत् एषोपि मन्त्रः सामवेदात् समागत इति अनुमातुं शक्यते ।

इत एते उदारुहन् दिवः पृष्ठानि आरुहन् ।
प्र भूर्जयो यथा पथा द्यामङ्गिरसो ययुः ॥ ५२ पृ साम

अयं मन्त्रो यथा सामवेदे वर्त्तते, तथा अथर्ववेदेपि अस्ति, अतएव मन्त्रोऽयं सामवेदात् अथर्ववेदे गृहीतः, अथवा स्वर्गात् भारतमागतस्य कस्यचित् सामज्ञस्य सकाशात् एष मन्त्रः अथर्वणा अथर्ववेदमध्ये संस्थापितः । एवमष्टमनवममण्डलयोरपि बहवो मन्त्राः सामवेदात् गृहीता, उत सामज्ञात् भारतीयात् विप्रात् समाहृत्य ऋग्वेदे प्रवेशिता इति । तत् कथं श्रीमता रमेशचन्द्रदत्तमहाशयेन एवमुक्तम् ?—

"सायण स्तोम अर्थे सामवेदेर स्तोत्र ओ उकथ अर्थे ऋग्वेदेर स्तोत्र धारणा करियाछेन । किन्तु ऋग्वेदेर एइ ऋक्गुलि ये काले रचित हय, तखन सामवेद वा अन्य कोनओ वेद रचित हय नाइ । सुतरां ऋक् रचयिता ऋषिगण सामवेदेर कथा किरूपे वलिवेन ! ऋग्वेदेर मन्त्र रचित हइले पर सेइ ऋक् भाङ्गिया ओ रूपान्तरित करिया अन्यान्य वेद रचित हय । ऋग्वेदे अन्य वेदेर मन्त्र देखा याय ना, साम ओ यजुर्वेदे ऋग्वेदेर मन्त्रइ अनेक ।" १२ पृ प्र, आ ।

अस्त्वेवमित्थं किमपि कथनं तस्य दत्तमहाशयस्य । परन्तु एतत् सर्व्वममूलकमिति । दत्तजो महाशयः खलु, अतलस्पर्शस्य वेदमहानिधेस्तलं गन्तुमसमर्थानां पाश्चात्यकोविदकदम्बानां प्रमादमनुसृत्य स्वयं प्रमादं गत इति । वस्तुतस्तु "स्तोम" शब्देन साधारणगद्यपद्यमयाः स्तुतिमन्त्रा बोध्यन्ते, उक्थशब्देन तु केवलं साममन्त्रा एव संसूच्यन्ते देवनिर्म्मितत्वात् । उक्तञ्च—

ततो देवा उक्थं निरमिमत । २४१ पृ तै, ब्राह्मणं ।

अत्र सायणस्य प्रमादः सञ्जातः, उक्थानि ऋक्मन्त्रा न, ते तु साममन्त्रा एव । भवतु यत् परन्तु सामवेद ऋग्वेदस्य अवरज इति न । अस्मिन् विषये

पाश्चात्यैः किमुक्तम् ? ते तु किमपि स्थिरीकर्त्तुं मसमर्था यत् किमपि स्वैर-मवोचन् इति। यदुक्तं मुइर महोदयेन—

"It is not, however, quite clear whether the Sama collection or the Rik collection may have been first made." Sanskrit Text Book Vol ii, P. 203

अत्र तु पूर्वं तावत् इदमेव विवेचनीयं यत् अस्य collection (कलेक्शनं) शब्दस्य तात्पर्य्यं किं ? यदि अनेन "मन्त्राणां समाहारः" इति व्यञ्जितं स्यात् तर्हि वयं ब्रूमः, वेदानां (त्रय्याः) प्रथम मन्त्रसमाहारे न किमपि पौर्वापर्य्यम् आसीत्। सा च त्रयी समकालमेव समाहृता। सूर्य्येण सामवेदः, अग्निना ऋग्वेदः, वायुना यजुर्वेदः समाहृत इति—

अग्नेर्ऋचः, वायोर्यजूंषि सामानि आदित्यादिति श्रुतेः।

अथ यदि अनेन कलेकशन शब्देन "मन्त्ररचना" अवबोधिता स्यात्, तर्हि अपि वयं ब्रूमः कथन मेतत् मुइरमहोदयस्य भ्रान्तिसमाम्नातमिति। यतः सर्वेषां वेदानां मन्त्रसमूहा न समकालं प्रणीता इति। बहवः साममन्त्राः सत्ययुगावसानसमये विरचिताः, बहवस्तु त्रेतायाः प्रभातसमये विरचिताः। पक्षान्तरे केचित् ऋङ्मन्त्राः त्रेतायाः प्रभातसमये विरचिताः केचित्तु द्वापराव-सानसमयेऽपि प्रणीता अभवन्। एवं केचित् यजुर्मन्त्रा स्त्रेतायां विरचिताः केचित् वा द्वापरयुगावसानसमयेऽपि प्रणीता अभूवन्। त्रय्या देहप्रतिष्ठाया अनन्तरमपि काले काले बहवो मन्त्रा नूतनं प्रणीताः सन्तः त्रयीषु अथर्ववेदेषु च प्रवेशिताः। अतएव सर्वे वेदमन्त्रा न समकालं प्रणीताः, विश्वेदेव निविदस्तु सर्वादौ प्रणीताः साममन्त्रास्तदनन्तरमिति। तत ऋग्यजुषा मथर्ववेदस्य च मन्त्रा प्रणीता इति। वस्तुतस्तु साममन्त्राः पूर्वं प्रणीता उत ऋङ्मन्त्राः पूर्वं प्रणीता इत्यत्र न कापि विप्रतिपत्ता संशयो वा। साममन्त्रा एव प्राचीनतमा इति तु वेदोप-निषदादीनामेव प्रमाणात् उपलभ्यते। तथाहि तेनैव पुनरुक्तम्—

'He supposes that the hymns found in the three Vedas were not "collected three times by three indipendent collectors

चतुर्णामेव वेदानां मन्त्रा भिन्नभिन्नसमये भिन्नै र्भिन्नै ऋषिभिरेव प्रणीताः परन्तु ते मन्त्राः समकालमेव त्रेतायां सर्वादौ ब्रह्मण आदेशात् अग्निवायुसूर्य्यैः समाहृत्य ग्रन्थाकारं प्रापिताः इति। अग्निः केषाञ्चित् ब्राह्मणानां पूर्वपुरुषः,

वायुश्च त्वष्टुर्जामाता, सूर्य्यश्च ब्रह्मणः कश्चित् कनीयान् भ्राता इति। अतएव मोक्षमूलरस्य विवृतिरपि एषा अप्रामाणीयसी भवति। तथाहि तेनैव सुहृदेन उक्तम्—

"Weber remarks Hist, of Ind. Lit, pp 9,62) that the texts of the Sama Veda frequently exhibit more ancient grammatical forms than those of the Rig Veda and suggests that as the former contains no extracts from any of the later hymns of the latter, it may have been compiled before these later pieces had been composed ; but adds that this point has not been yet investigated P 203 –

सामवेदस्य व्याकरणघटितानि पदानि सर्वेभ्यः प्राचीनतमानि, वेवरमहोदयस्य अभिमतमेतत् नितरामेव प्रशस्ततरम्। परन्तु सामवेदस्य सर्वे मन्त्राः ऋग्वेदस्य मन्त्रेभ्यो वर्षीयांस इति न। ऋग्वेदस्य न कोपि मन्त्रः सामवेदे गृहीत इति, पचान्तरे बहवः साममन्त्रा एव ऋग्वेदे लब्धावकाशा इति ऋग्वेदवचनादेव उपलभ्यते। सर्वेषु वेदेषु कतमोवेदः प्राचीनतमः, इति पाश्चात्त्यैरेव विद्वद्भिः स्थिरीकर्त्तुं न शक्तं, परन्तु वयं मन्यामहे, अस्माभिरिह यानि प्रमाणानि उपस्थापितानि तैः खलु सामवेदस्यैव प्राथम्यं सिद्धं स्यात् इति। तथाहि—Mr. Macdonell Says :—

These are cotained in the other Vedas, which are largely composed of hymns, stanzas and lines borrowed from the Rig Veda S L P. 32.

परन्तु म्याकडोनेल महोदयस्य अभिमतमेतत् सर्वथैव प्रमादभूयिष्ठमिति। ये केचन जना वेदेषु शास्त्रेषु च कृतश्रमा स्ते एवं वक्तुं न शक्नुयुरिति। तथाहि—

"Whitney also leaves the question undecided (Journ, Arm, or society, iv, 253-2;4). S. Text Vol. ii, P. 203.

एवं ह्विट्नी महोदयश्च आमेरिकायाः कस्यांचित् मासिकपत्रिकायां लिखितवान् यत् वेदचतुष्टयानां त्रयाणां वा मध्ये कतमोवेदो वर्षीयान्, कतमो वा अवरज इति न मीमांसित मभूत्। परन्तु कथं विषय एव न केनापि मीमांसितस्तद्वयं बोद्धुं न शक्नुमहे। वस्तुतस्तु स्वर्गाः पारलौकिकाः, देवाः पारलौकिकाः, सर्वे वेदाः भारतीया, एतानि एव भ्रान्तिजालानि पाश्चात्यानपि मोहान्धमहाकूपे पातितवन्ति इति। गीर्वाणवाणी संस्कृतभाषा स्वर्गे देवैरुद्भाविता, देवनागराणि अपि अक्षराणि इन्द्रचन्द्रप्रभृतिभिः स्वर्गे उद्भावितानि, देवा

एव स्वर्गे सर्गादौ वेदमन्त्रान् प्रणिन्यु, सामवेदः स्वर्गे विरचित इत्येतज्ज्ञाना-भावादेव सायणादयः प्रमादं गताः पाश्चात्या अपि मनोषिणः कुशाग्रीयधियोऽपि भारतीयानां विदुषां दुष्टमार्गं गता इति।

वस्तुतस्तु द्यौर्मानवानाम् आदिनिकेतनं, भारतवर्षमपि द्वितीयं स्थानं भुवर्लोकः (तुरुष्कपारस्यापोगस्थानानि) तृतीयं स्थानं, तत्र तत्र भवः सामवेद ऋग्वेदो यजुर्वेदश्च यथाक्रमेण वयसि प्रथमो द्वितीयः तृतीय एव इदमपि हृदयवतां विदुषां स्वीकार्य्यमिति।

अथ इतरेषां शास्त्राणां पौर्वापर्य्यनिर्णये कः पन्थाः? अन्यानि तु सर्वाणि शास्त्राणि उपनिषद्ब्राह्मणारण्यकश्रौतसूत्रकल्पसूत्रगृह्यसूत्रस्मृतिरामायणमहा-भारतपुराणतन्त्रादीनि प्रायेण प्रक्षिप्तबहुलानि अतस्तेषां पौर्वापर्य्यविनिर्णयनं सर्वथैव सुदूरपराहतमिति। तथापि वयं वक्तुमुत्सहामहे यत् वेदेभ्यः अवरजा उपनिषदः, उपनिषद्भ्यः श्रौतसूत्राणि तेभ्यः कल्पसूत्राणि कल्पसूत्रेभ्यो गृह्यसूत्राणि, गृह्येभ्यः स्मृतयः, स्मृतेरनन्तरं रामायणं, तदनु महाभारतं, तदनु पुराणं, तदनु ब्राह्मणारण्यके, तदनु यास्कस्तदनु पाणिनिः, तदनु वार्त्तिककारः कात्यायनः, तदनु भाष्यकारः पतञ्जलिस्तदनु चाणक्यसनाथचन्द्रगुप्तः, तदनु बुद्धदेवः शक्रवंशधुरन्धरः, तदनु गीता, तदनु अग्निपुराणं, तदनु संवत्प्रवर्त्तको विक्रमादित्यः, तदनु शकाब्दप्रवर्त्तकः क्षत्रियः शालिवाहनः प्रतिष्ठानाधिपः, तदनु वङ्गाधिपः शालाब्दप्रवर्त्तको वैद्यराजः शालिवाहनः, तदनु लाउसेनो वैद्यराजस्तदनु वैद्य आदिशूरोपनामा महाराजो लक्ष्मीनारायणसेनः, तदनु भूशूरोपनामा महाराजो विमलसेनः तदनु भागवतप्रणेता वैद्योवोपदेवो विश्वप्रकाशकोषप्रणेता वैद्यो महेश्वराचार्य्यसूरिः, तदनु कौलीन्यदाता वैद्यो बल्लालसेनः तदनु हलायुधसनाथो लक्ष्मणसेनः, तदनु द्वौ द्वितीयतृतीयौ बल्लालसेनौ वैद्यौ, तदनु ब्राह्मणो राजा गणेशः, तदनु चैतन्यचन्द्ररघुनन्दनौ। इति।

यद्यपि तन्त्राणि शनैः शनैर्बहुभिर्वङ्गदेशीयैरेव पण्डितैः प्रणीतानि, तथापि तान्त्रिकधर्म्मः ऋग्वेदयजुर्वेदयोः सायंकाले प्रवर्त्तित इति तत्तद्वेदपाठात् अनुमीयते। तान्त्रिकाणां नैष्ठुर्य्यादिकं समीक्ष्य एव दयावतारेण भगवता शाक्यसिंहेन भारते पुनः "अहिंसा परमोधर्म्मः" इति मतं प्रवर्त्तितवान्।

अथ सर्वासामुपनिषदामपि प्रादुर्भावः समकालमेव नाभूत्। उपनिषदि

छान्दोग्योपनिषत् प्राचीनतमा, ब्राह्मणेषु शतपथं, स्मृतिषु च मनुसंहिता। परन्तु प्रकृतमनुसंहिता गद्य-सूत्रमयी सा तु साम्प्रतं न अधिगम्या इति। या भृगुप्रोक्ता मनुसंहिता अधिगम्यते, सा तु प्रक्षेपबाहुल्यात् कलुषिता इति। आदिमूलरामायणमपि साम्प्रतं न अधिगम्यं,तस्य उत्तरकाण्डं कृतकं,अन्यानि षट्काण्डानि अपि महाभारतादनु केनापि रिपुकारेण प्रणीतानि। तत्र मूलरामायणस्य कियदेव अस्ति इति प्रतीयते। संस्कृतवित् हनुमान् लाङ्गूलं पृष्ठे संस्थाप्य लम्फप्रदानपूर्वकं बहुयोजनविस्तृतस्य लवणमहोदधेः पारं गतः इति हनुमता सह सञ्जातसन्दर्शनस्य वाल्मीकेर्वाणी न, इति अनुमातुं शक्यते खलु। श्वेताश्वतरोपनिषदपि प्राचीना न। एवं बह्व्य उपनिषदो गोपाल तापनी-प्रभृतयो बहुस्मृतिपुराणतन्त्राण्यपि खलु अतीव अर्वाचीनानि इति।

वस्तुतस्तु सर्वा उपनिषदः समसामयिक्यो न, सर्वाः स्मृतयश्च समकालीना न सर्वाणि पुराणानि च समसामयिकानि न, सर्वाणि च तन्त्राणि समसामयिकानि न। एतानि सर्वाणि युगे युगे काले काले पृथक् पृथग्व्यक्तिभिः पण्डितैश्च प्रणीतानि इति।

राधानाम्नी काचित् गोपवधूर्नासीत्; महाभारत-हरिवंशपुराणादिषु च राधायाः वार्त्तापि नोपलभ्यते। राजनीतिधुरन्धरः चरित्रवान् कृष्णो न राधाविनोदी न च गोपीगणदुकूलचौरश्च, न चापि निरपराधः स गीताया अपि वक्ता, न वा स यमुनाकूले राधया सह रहःकेलिपरायण इति। किं बहुना वैद्यवोपदेवस्य कृष्णसर्वस्वस्य भागवतेऽपि राधानाम न स्थानं लेभे इति। अतएव राधानामसनाथानि पद्मब्रह्मवैवर्त्तादीनि पुराणानि मेहतन्त्रवत् अतीव अवरजानि इति गम्यते। न केवलं राधानाम परन्तु ब्रह्मवैवर्त्तपुराणे

जोलजातिः प्रकीर्त्तिता, आगरीति प्रकीर्त्तितः,
काभोयाली प्रकीर्त्तितः।

इत्येवमादीनां वाक्यानां विद्यमानत्वात् इदमनुमेयं यत् एतत् ब्रह्मवैवर्त्तपुराणं खलु—मुसलमानराजत्वसमये केनापि कृष्णभक्तेन वङ्गवासिना वैष्णवेन विरचितमिति। एवं "वैदिको तान्त्रिको क्रिया" इत्येतस्य वाक्यस्य सन्निवेशात् प्रतीयते वोपदेवस्य भागवतमपि महानिर्वाणादीनां तन्त्राणामनु प्रणीतमिति।

प्रसङ्गवशात् साम्प्रतं तु अस्माभिः शास्त्राणां पौर्वापर्य्यविषये किमपि उक्तं, सारस्वतकाण्डे प्रत्नतत्त्वविधौ एतत् सर्वं सविस्तारं वक्ष्यते इति।

वेदानां वयःक्रमः।

यदि कश्चित् केशानां बालुकानां नक्षत्राणां वा गणनया संख्यां निर्णेतुं समर्थः अभविष्यत् तथापि स वेदानां वयो निर्णेतुं न पारगः अभविष्यत्, तेषामतीव प्राचीनतमत्वादिति।

कथमेतत्? यतो वेदा मान्धातुरपि अतिवृद्धप्रपितामहस्य पैतामहे युगे प्रणीताः, अतः के केनोपायेन तेषां वयःपरिमाणं स्थिरीकर्तुं समर्था भवेयुः, सर्वज्ञात् त्रिकालज्ञादन्ये।

तर्हि किं वैदिके युगे न केऽपि अब्दाः प्रचलिता आसन्? वेदेषु वर्षमासदिवसपौर्णमास्यादयः साधारणशब्दाः प्रयुक्ताः सन्ति,वर्षबोधकाः समाशरद्धिमादयश्च यत्र तत्र प्रयुक्ता दृश्यन्ते, पञ्जिकादिष्वपि श्वेतवराहकल्पाब्दाः, सत्याब्दाः, कल्यब्दा इत्येवमादयश्च पदनिबन्धा अवलोक्यन्ते, अतस्तदा सामाजिकानां ,जगतामादिमाध्यापकानां ज्योतिषज्यामितिवीजगणितादीनां मुद्भावयितॄणां भारतीयविदुषां ब्राह्मणानां मध्ये अब्दा न प्रचलिता आसन् इति न स्वीकर्तुं शक्यते विवेकविरुद्धत्वात्।

तर्हि कथं कस्मिन्नपि वैदिके लौकिकेऽपि वा ग्रन्थे प्राक्तनसमयपरिज्ञापका अब्दादयो न संलक्ष्यन्ते? कालपरिज्ञापकानि शब्दकदम्बकानि खलु ग्रन्थकारेण प्रायेण आत्मपरिचयदानप्रसङ्गात् ग्रन्थानामादौ अन्ते वा सन्निवेश्यन्ते इति। पक्षान्तरे तादृशाना मतीव प्राचीनतमग्रन्थानाम् आद्यन्तौ शटितगलितौ छिन्नभिन्नौ कीटाकुलितौ भवेताम्, अतएव तौ विनष्टौ एव बभूवतु रिति कस्मिन्नपि वेदादौ च समयपरिज्ञापकशब्दादिकं किमपि न दृश्यते लभ्यते वा। अतएव पुस्तके वेदानामब्दसंख्याद्वारेण वयोनिर्णयनं सुदूरपराहतमिति।

वेदाः कदा कस्मिन् युगे वा विरचिताः? न सर्वे वेदमन्त्राः समसामयिकाः। केचित् साममन्त्राः सत्ययुगावसाने प्रणीता अभवन् केचित् साममन्त्राः ऋग्वेदमन्त्रा यजुर्वेदमन्त्रा अथर्ववेदमन्त्राश्च त्रेतायुगस्य प्रातरेव विरचिता इति। तेषां समाहारेण समवायेन च तथा देहप्रतिष्ठा बभूव। अथ काले काले युगे युगे त्रेतायाः कैशोरकालादारभ्य द्वापरयुगस्य सायंकालपर्य्यन्तं ये ये वेद-

मन्त्राः स्वर्गभारतवर्षकेतुमालवर्षादिषु प्रणीता स्ते च शनैः शनैः समाहृत्य प्रतिसंस्करणमध्ये प्रवेशिता इति गम्यते शास्त्रपाठात्, अतएव सर्वे मन्त्राः सम-वयस्को न, इति अनुमातुं कथयितुं वा शक्यते।

केचित् वेदमन्त्राः सत्यावसानसमये विरचिता इत्यत्र किं प्रमाणम्? यतः प्रथमो वेदव्यासः सुरज्येष्ठो ब्रह्मा त्रेतायुगस्य प्रातरेव वर्त्तमान आसीत् इति विष्णुपुराणादिपाठात् लभ्यते,

त्रेतायुगमुखे ब्रह्मा कल्पस्यादौ द्विजोत्तम।
सृष्ट्वा पश्वोषधीः सम्यक् युयोज स तदाध्वरे॥ ४८।५अ।१अंश।

अर्थात् कश्यपस्य ज्येष्ठपुत्रो धाता सुरज्येष्ठो ब्रह्मा त्रेतायुगे कल्पस्य युगस्य आदौ प्रथमभागे यज्ञानुष्ठानप्रथां प्रवर्त्तितवान्। अथ तेनैव यज्ञे के के पशवः काः काः ओषध्यो वा मेध्या इति स्थिरीकृतमिति। अनेन पूर्वोक्तात् विष्णुपुराण-वचनाच्च वयमिति वक्तुं शक्यामहे यत् असौ परमेष्ठी त्रेतायुगस्य प्रातरेव वर्त्त-मान आसीदिति। यतः स एव प्रथमो वेदव्यासः, त्रेतादावेव त्रय्याः प्रथम विभागः सम्पादितः—

त्रेतादौ संहिता वेदाः। वायु
त्रेतायां प्रथमे व्यस्ताः स्वयं वेदाः स्वयम्भुवा। विष्णु

अतएव यदि त्रेतायुगस्य वयः परिमातुं कश्चित् समर्थः स्यात् तर्हि प्रथम विभागकाले प्रथमसंस्करणसमये वा लब्धदेहाया स्त्रय्या वयोनिर्णयने स कथं न समर्थो भवेत्? त्रेताया वयःपरिमाणं कियत्? उक्तञ्च विष्णुपुराणकारेण—

काष्ठाः पञ्चदश ख्याता निमेषा मुनिसत्तम।
काष्ठा स्त्रिंशत् कला तासु त्रिंशत् मौहूर्त्तिको विधिः॥ ७
तावत्संख्यैरहोरात्रं मुहूर्त्तैर्मानुषं स्मृतम्।
अहोरात्राणि तावन्ति मासः पक्षद्वयात्मकः॥ ८
तैः षड्भिरयनं वर्षं द्वेऽयने दक्षिणोत्तरे।
अयनं दक्षिणं रात्रिर्देवानामुत्तरं दिनम्॥ ९
दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितम्।
चतुर्युगं द्वादशभिस्तद्विभागं निबोध मे॥ १०

चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमम्
दिव्याब्दानां सहस्राणि युगेष्वाहुः पुराविदः ॥ ११ ।३अ।१अंश

अर्थात् पुराविदो विष्णुपुराणप्रणेतुरपि प्राक्तनकवय एवमवदन् यत् द्वादश-दिव्यवर्षाणां यानि संख्यापरिमाणानि चतुर्युगाणामपि वयःपरिमाणानि तत्-परिमाणान्येव। क एते पुराविदः? तेषां मध्ये भगवान् मनुरेव एकः* अन्ये च केचन ज्योतिर्विद इति। इदमेव प्राचीनज्योतिर्विदां मतमनुसृत्य पञ्जिकाप्रणेतारः स्थिरीकृतवन्तो यत् युगचतुष्टयानां वयःपरिमाणं विंशति-सहस्राधिकत्रिचत्वारिंशल्लक्षवर्षात्मकमिति।

सत्ययुगस्य वयःपरिमाणं दिव्यवर्षचतुष्टयमितं त्रेतायुगस्य वयःपरिमाणं दिव्यवर्षत्रयपरिमितं, द्वापरयुगस्य वयःपरिमाणं दिव्यवर्षद्वयपरिमितं, कलि-युगस्य वयःपरिमाणं—दिव्यैकवर्षपरिमितमिति। अतएव—

सत्ययुगपरिमाणं	...	१७२८०००	वर्षाणि
त्रेतायुगपरिमाणं	...	१२९६०००	"
द्वापरयुगपरिमाणं	...	८६४०००	"
कलियुगपरिमाणं	...	४३२०००	"
चतुर्युगपरिमाणं	...	४३२००००	"

न केवलमेतदेव, पञ्जिकाकारास्तु प्रभूतगवेषणया एतदपि स्थिरीकृतवन्तो यत्

सृष्टिसौरवर्षाणि	...	१७०६४०००
सृष्टितः कलिमुखे गताब्दाः	...	१९६९८९२००००
साम्प्रतं कलिगताब्दाः	...	५०१७
अतएव सृष्टेर्वयः परिमाणं	...	१९६९८९२५०१७

कथं सृष्टेर्वयःपरिमाणं निर्णीतमेतत् विद्वद्भिः? सृष्टेः प्रत्यक्षद्रष्टा तु न कोपि जगति आस्ते। तत् कथं सृष्टिवयोनिर्णीतं स्यात्? यदि नित्यपरिवर्त्तन-शीलायाः पृथिव्याः, स्तरगणनया रेडियमधातोरवस्थापर्य्यालोचनया च पाश्चात्या इदं स्थिरीकर्त्तुं शक्ताः स्युर्यत् पृथिव्या वयःपरिमाणं बहुलक्षवर्षात्मकं दशकोटि-वर्षात्मकं वा, तर्हि वीजगणितरेखागणितपाटीगणितज्यामितिवाष्पीयशकटवाष्पीय-

* यदेतत् परिसंख्यातम् आदौ [illegible] चतुर्युगम्। एतद् द्वादशसाहस्रं देवानां युगमुच्यते। ७१—१७

पोतपुष्पकरथविद्युद्दृहिचक्रयाणत्रिचक्रयाणादीनां भाषावर्णादीनामपि प्रादुर्भावयितारो जगद्व्यापका भारतीयब्राह्मणा ग्रहनक्षत्रादीनामुदयास्तावस्थानादिना न कथं सृष्टेर्वयःक्रमं किमपि निर्णेतुं समर्था भवेयुः। यूयं पुराणवचनेषु सर्वदैव अकृतश्रद्धाना इति,परन्तु विष्णुपुराणप्रणेतारस्तु एतत् पुराविदामेव मन्वादीना मभिमतं व्यक्तीचक्रुरिति। त एव पुराविदो भारतीयज्योतिर्विद इति, प्रतीयते। ज्योतिषशास्त्रमपि वेदाङ्गविशेषः। तत्तु उपनिषदामपि प्राक्तनमतो विद्वांस एव तस्य प्रामाण्य मप्रामाण्यं वा निर्देष्टुं प्रभव इति। कलियुगस्य परिमाणन्तु अनुमानबलेनैव स्थिरीकृतमिति। तन्त्रेभ्यः प्राक्तनानि पुराणानि, पुराणेभ्यश्च प्राक्तनं महाभारतं, महाभारतात् रामायणं, रामायणात् मनुसंहिता, मनुसंहिताया अपि प्राक्तना उपनिषदः। उपनिषद्भ्योऽपि नितरां प्राक्तना वेदाः। अहो अतएव तेषां वर्षीयसां वेदानां जगतामादिग्रन्थानां वयःक्रमः खलु बहुसहस्रवर्षात्मक इति कथने न कोऽपि प्रत्यवाय इति। सामवेदे वाष्पीय-शकट विद्युद्दृहिचक्रयाणत्रिचक्रयाणपुष्पकयाणादीनां समुल्लेखोनास्ति, पक्षान्तरे ऋग्-वेदमध्ये अथर्ववेदे च अमीषां सर्वेषामेव विषयाणां समुल्लेखो बभूव। अतएव एतयोरन्तरा एवं बहवः काला अतीता येषु कालेषु एतेषां वैज्ञानिकव्यापाराणां प्रादुर्भाव स्तिरोभावश्च समभवत्, अतएव ते काला बह्वब्दशतबहुला इति लोकसु युज्यते खलु। रामायणमहाभारतादिषु, राज्ञां ये वंशनामावलयो दृश्यन्ते, तास्तु धारावाहिकक्रमेण न समागता इति। वस्तुतस्तु यथा स्वायम्भुवमनुदक्षधर्म्म प्रजापतीनां प्राक् बहुकोटिसंख्यका अज्ञातनामानो मनुष्या गता स्तथा परवर्त्ति समयेऽपि उपेक्षया बहुनाम्नृपाणां राज्ञा मपि नामानि परित्यक्तानि। अतएव ग्रन्थोदितां वंशावलीं दृष्ट्वा ग्रन्थानां समयनिर्णयने सर्वथैव सुदूरपराहतमिति।

त्रेतायुगस्य प्रातरेव त्रयीणां प्रथमविभागः सम्पादितः, अतएव प्राथमिकानामृक्सामयजुर्वेदानां वयःक्रमः खलु त्रेताद्वापरगतकल्यब्दवयः-परिमाणात्मक इति वक्तुम् अनुमातुं वा शक्यते। यदि त्रेतायाः पञ्चसहस्रेषु वर्षेषु गतेषु प्रथमविभागः सम्पादितः स्यात्—तर्हि त्रय्या वयःक्रमः खलु—

त्रेतायाः १२९६००० द्वापरस्य ८६४००० कलेर्गताब्दाः ५०१७, साकल्येन समष्टिः—२१६५०१७ वर्षाणि। तस्मात्—५००० = २१६००१७ वर्षाणि।

सप्तदशवर्षाधिक—षष्टिसहस्राधिकैकविंशतिलक्षवर्षात्मक इति। परन्तु त्रेतारम्भ एव वेदमन्त्राः प्रणीतास्ततः तेषां समाहारेण समवायेन च वेदा ग्रन्थाकारं प्रापिताः, अतएव ते वेदमन्त्रा स्तथ्या एव वयोज्येष्ठा इति। अथ साममन्त्रा एतेभ्योपि प्राक्तनाः, विश्वेदेवनिविदोपि साममन्त्रेभ्यः प्राक्तनाः, अतएव साममन्त्रविश्वेदेवमन्त्राणां वयःक्रमः खलु एतेभ्य एव परिमाणेभ्यः समधिक इति वक्तुं युज्यते।

मनुपुराणादिषु एवमस्ति यत् युगपरिमाणं बहुलक्षवत्सरात्मक मिति। किन्तु एवं वक्तुम् अनुमातुं वा स्वाधीनाः केचित् समर्था एव, परन्तु सभ्यजगतां क एव इदं विश्वसितुं समर्थः स्यात् भारतीयात् कुसंस्कारान्धादन्यः? सत्यमेतत् पाश्चात्यादधिगतविद्या लब्धप्रज्ञास वयमपि नैतत् पुराणाभिमतं विश्वसितुमुत्सहामहे। परन्तु—

"भूते पश्यन्ति वर्वराः"

वर्वराः खलु--नितरां सन्दिग्धा एव, ते तु पूर्वं किमपि न विश्वसन्ति, पश्चात् सर्वमेव साधु मन्यन्ते इति। पूर्वं तावत् सर्वे पाश्चात्या अन्धवत् वाइवेल भक्ता आसन्, साम्प्रतं तु त एव वाइवेलभक्तास्तत्र नाना अयौक्तिकविषयसन्निवेशात् विज्ञानविरोधाच्च तस्मिन् वीतश्रद्धाना अभवन्। यद्येवं तर्हि अस्माकं शास्त्रकदम्बेषु वीतश्रद्धानाः परप्रत्ययनेयवुद्धयो वयमपि तेषु अश्रद्धेयेष्वपि शास्त्रेषु साम्प्रतं विश्वासस्थापनाय न कत्यं किमपि द्रव्यं प्राप्नुयाम? अनेन अभुत्सूनां युक्तिवादिनां मतपरिवर्त्तनं वा न भवतु, परन्तु शास्त्रे युगादीनां यत् परिमाणं विद्यते, अस्माभि स्तदेव प्रदर्शितम् अभूत्।

सर्वे वेदमन्त्राः समसामयिका न, ये ये मन्त्राः सुरजेष्ठब्रह्मणः प्रागेव प्रणीताः सत्यावसाने त्रेतारम्भे वा त एव सर्वेभ्यः प्राक्तना इति। तथा ये ये मन्त्रा त्रेताद्वापरयोः सन्धौ राम-राजत्वकाले प्रणीता स्त एव तु कियत् अवरजा इति। अथ ये ये मन्त्राः पराशरपाराशर्य्यादीनां प्राक् द्वापरशेषे प्रणीता स्ते तु सर्वेभ्यो मन्त्रेभ्य एव अवरजा इति अनुमातुं वक्तुं वा युज्यते। किन्तु य एव मन्त्राः पाराशर्य्यात् प्राक् द्वापरे एव वङ्गराजवैमात्रेयेण धीमता कक्षीवता तत्कन्यकया पारशव्या घोषया च विरचिताः सर्वेभ्यः अवरजानां तेषामपि

मन्वाणां वयःक्रमः षट्सहस्रवर्षात्मको भवेत्. (4000, B. C.) परन्तु न खलु त्रिसहस्रवर्षात्मक इति (1000, B. C.)।

कथमेतत्, यतः साम्प्रतं कलेर्गताब्दाः सप्तदशवर्षाधिकपञ्चसहस्रवर्षात्मका इति पञ्जिकापाठात् अधिगम्यते। पञ्जिकानामेषा गणना अतीव सुसङ्गता प्रामाणिकी च। यतो वैदिकयुगे एव भारतीया ज्योतिर्विदः पञ्जिकाप्रणयनतत्परा बभूवुः। प्रतिवत्सरं च पञ्जिकाया नूतनसंस्करणं भवति, प्रतिवत्सरमेव पञ्जिकायाम् एका वर्षाङ्कसंख्या सन्निवेशिता भवेत्। अतएव तत्र किमपि स्खलनं न अभवत् इत्येव वक्तु मनुमातु वा शक्यते। वंशपरम्पराक्रमेण निपुणैर्ज्योतिर्विद्भिः प्रणीता एताः पञ्जिका नितरां विशुद्धा एव। अतएव कलेर्गताब्दाः सप्तदश-वर्षाधिकपञ्चसहस्रवर्षाणि इत्येव अव्याहतसिद्धान्तः खलु।

अतएव द्वापरशेषे प्रसूतस्य प्रौढ़िं गतस्य च अष्टाविंशवेदव्यासस्य भगवतः कृष्णद्वैपायनस्य वयःक्रमः खलु प्रायेण शतवर्षाधिकपञ्चसहस्रवर्षात्मक इति। तस्य महाभारतस्यापि वयःपरिमाणं प्रायेण पञ्चसहस्रवर्षाणीति प्रतीयते। तद्विरुद्धं किमपि वक्तुं न कस्यापि किमपि सामर्थ्यमस्ति। यतो गणनेयं सर्वथैव प्रमादपरिशून्या इति। तर्हि कथं राजतरङ्गिणी एवं निर्दिशति।

शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले।
कलेर्गतेषु वर्षाणा मभवत् कुरुपाण्डवाः॥ ५१—१ तरङ्गिणी

"यदा कलेः त्रिपञ्चाशदधिकषट्शतवर्षाणि गतानि, तदेव कुरुपाण्डवा युधिष्ठिरादयः प्रादुर्भूता अभवन्।" मैवं, विष्णुपुराणवचनविरुद्धत्वात् अप्रामाण्यमेतत् कह्लणवचनम्। विष्णुपुराणमपि किं न ऽत्थं किमपि कथयति?—

सप्तर्षीणान्तु यौ पूर्वौ दृश्येते उदितौ दिवि।
तयोस्तु मध्यनक्षत्रं दृश्यते यत् समं निशि।
तेन सप्तर्षयो युक्तास्तिष्ठन्त्यब्दशतं नृणाम्॥ २३
ते तु पारिक्षिते काले मघास्वासन् द्विजोत्तम।
तदा प्रवृत्तश्च कलेर्द्वादशाब्दशतात्मकः॥ २४

तत्र श्रीमता बङ्किमचन्द्रचट्टोपाध्यायेन कृतानुवादः—"अर्थ—सप्तर्षिमण्डलेर मध्ये ये दुइटी तारा आकाशे पूर्वदिके उदित देखा याय, इहादेर समसूत्रे

ये मघानक्षत्र देखा याय, सेइ नक्षत्रे सप्तर्षि शतवत्सर अवस्थान करेन (नक्षत्र एखाने अश्विन्यादि) सप्तर्षि परिक्षितेर समये मघानक्षत्रे छिलेन। तखन कलिर द्वादश शत वत्सर प्रवृत्त हइया छिल।" कृष्णचरित—२० पृ।

पूर्वं तावत् वयं ज्योतिषशास्त्रे नितरां निरक्षराः, अथ विष्णुपुराणपाठोऽयं प्रामादिको विशुद्धो वा तदपि यत् किमपि हट्टलब्धं पुस्तकं पठित्वा न कोऽपि वक्तुं स्थिरीकर्त्तुं वा समर्थो भवति। वङ्किमचन्द्रस्य एषः अनुवादोपि प्रामादिक इति मन्यते विष्णुपुराणवचनान्तरेण सह विरोधात्। उक्तं च—

यदैव भगवद्विष्णोरंशोयातो दिवं द्विज।
वसुदेवकुलोद्भूत स्तदैव कलिरागतः॥ ३५
यस्मिन् कृष्णो दिवं यातस्तस्मिन्नेव तदाहनि।
प्रतिपन्नं कलियुगं तस्य संख्यां निवोध मे॥ ४०
गते सनातनस्यांशे विष्णोस्तत्र भुवोदिवम्।
तत्याज सानुजो राज्यं धर्म्मपुत्रो युधिष्ठिरः॥२७-२४अ-४अं

अतएव राजतरङ्गिणीवचनं वङ्किमचन्द्रस्य अनुवादश्च प्रमादशून्यं न इत्येव प्रतीयते। कुरुपाण्डवा द्वापरशेषे प्रादुर्भूता, न पुनः कलेः सार्द्धषट्शतवर्षेषु गतेषु इति सर्ववादिसुसम्मतं सत्यम्, महाभारतादयोपि एवं समर्थयन्ति। अथ यदि कृष्णस्य कालप्राप्तेरनन्तरमेव युधिष्ठिरः स्वर्गं गतवान्, कलिरपि समागतः स्यात्, तर्हि तदा कलेर्द्वादशशतवर्षाणि अतीतानि अभवन्, इति अनुमातुं न शक्यते। यतो व्यासयुधिष्ठिरादयः सर्वे त्रयोदशशतवर्षजीविन आसन् इति न, युक्तिव्यवहारविरुद्धत्वात्। युधिष्ठिरः परिक्षिदपि समसामयिक आसीत्। तर्हि किं स परिक्षिदपि त्रयोदशशतवर्षजीवी आसीत् इति स्वीकरणीयं भवेत्। वस्तु तस्तु मानवानामित्थं दीर्घजीवनं तदा नासीदिति।

वस्तुतस्तु यदा कुरुपाण्डवाः प्रादुर्भूता स्तदा न कलिः प्रवृत्तः। यदा परिक्षित् राज्ये अभिषिक्तः, कृष्णश्च दिवं गतो युधिष्ठिरादयश्च राज्यं त्यक्त्वा स्वर्गं गन्तुकामा स्तदा एव कलेर्द्वादशाधिकशतवर्षाणि गतानि इत्येव अनुमातुं स्वीकर्तुञ्च युज्यते।

द्वादशाब्दशतात्मकः किं ?

द्वादशशतवर्षात्मक इति न, परन्तु द्वादशवर्षाधिकानि शतवर्षाणि इत्येव अर्थः

स्यात् विषयप्रासङ्गिकत्वात्। परिक्षितो राजशासनसमये एव महाभारतं प्रणीतम्, अतएव तस्य महाभारतस्य वयःपरिमाणं शतवर्षन्यूनपञ्चसहस्रवर्षाणीति ।

महाभारतं कलेरारम्भकाले कलेः प्रागेव प्रणीतं, रामायणमपि च त्रेताद्वापरयोः सन्धिवेलायां विरचितमिति प्रमाणात् लभ्यते—

त्रेताद्वापरयोः सन्धौ रामः शस्त्रभृतां वरः ।
असकृत् पार्थिवं चत्रं जघानामर्षचोदितः ॥ ३

पर्वसंग्रह पर्व—१म ।

रामेण सह परशुरामस्यास्य मिथिलापथे बलपरीक्षा अभवत्, अतएव अयमादिपरशुरामो रामचन्द्रस्य समसामयिक इति। अतएव रामचन्द्रोपि त्रेताद्वापरयोः सन्धौ वर्त्तमान आसीत् इति गम्यते। तथाहि रामायणम्—बालकाण्डं ।

प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवान् ऋषिः ।
चकार चरितं कृत्स्नं विचित्रपदमर्थवत् ॥ १—४म

अतएव प्रकृतादिरामायणस्य वाल्मीकिप्रणीतस्य वयःक्रमः खलु सप्तदश वर्षाधिकोनसप्तति सहस्र वर्षोपेताष्टलक्ष वर्षात्मक इति ।

द्वापरयुगपरिमाणं	८६४०००	८६९०१७
कलेर्गताब्दाः	५०१७	

रामायणात् मनुसंहिता वयोज्येष्ठा, मनुसंहिताया अपि गृह्यसूत्राणि, गृह्यसूत्रेभ्यः श्रौतसूत्राणि श्रौतसूत्रेभ्यः कल्पसूत्राणि, कल्पसूत्रेभ्यः छान्दोग्योपनिषत् वर्षीयसी, तस्याः अथर्ववेदः, अथर्ववेदात् यजुर्वेदः, यजुर्वेदात् ऋग्वेदः ऋग्वेदात् सामवेदः खलु वर्षीयान्। अतएव तस्य सामवेदस्य वयःपरिमाणं बहुलक्षवर्षात्मकं न भवतु, परन्तु बहुसहस्रवर्षाणि इति अवश्यमेव वक्तुं शक्यते। पक्षान्तरे पाश्चात्या अनुमानबलेन स्तेषां बाइवेलग्रन्थस्य प्राचीनत्वरक्षणाय वेदवयःक्रमविरुद्ध यत् किमपि अवदन्, तत् सर्वं भ्रष्टादपि भ्रष्टमिति। किं पुनर्वेदाः, लोलचर्म्माणः स्खलितदन्ताः ? किं वायु विष्णुमत्स्यादीनि पुराणान्यपि बाइवेलपुस्तकात् वर्षीयांसि न भवेयुः ? यतो, यथा वेदेषु—मूर्त्तिपूजा नास्ति प्रतिमाशब्दोपि * न विद्यते तथा मूल पुराणादौ च प्रतिमा

* कैवल्य १।१६०।१०म, सके प्रतिमा शब्दो हश्यते—का आसीत् प्रमा "प्रतिमा" निदानम् ।

पूजायाः अपि प्रसङ्गो न दृश्यते,पक्षान्तरे वाइवेलग्रन्थे प्रतिमापूजानिषेधविधिरेव अवलोक्यते। प्रतिमापूजा तन्त्रानुमोदिता, अतएव तन्त्रमतबहुलं वाइवेलपुस्तकं कथं प्राचीनं भवेत्? वस्तुतस्तु वेदादिसर्वशास्त्राणि वाइवेलपुस्तकात् प्राचीनतमानि, एतेभ्य एव वेदपुराणेभ्यो वाइवेलग्रन्थे वस्तुजातं गतमिति।

नाहो न रात्रिर्न नभो न भूमि. र्नासीत् तमो ज्योतिरभून्न चान्यत्।
श्रोत्रादिबुद्ध्यानुपलभ्यमेकं, प्राधानिकं ब्रह्म पुमान् तदासीत्॥
२३—२अ—१ अंश विष्णुपुराणं।

अस्मादेव वाइवेलग्रन्थे सृष्टेः प्रागवस्थाप्रसङ्गो गतः। वाइवेले विद्यते—
In the begining God created the heaven and the earth, 1—16.
पक्षान्तरे अस्माकं वेदादिसर्वशास्त्रेष्वपि इत्थं विवृतिर्विद्यते –

द्यावाभूमी जनयन् देव एकः।३।८१।१०म
यतो द्यावा पृथिवी निष्टतक्षुः। ४ ऐ

इयं द्यौरेव आदिस्वर्गः सुवर्गम्, भूमिश्च पृथिवी भारतवर्षमिति। अस्य सुवर्गम् इति पदस्य विकारादेव (सुवर्गम्—सुवगम्—हुवघम्-हेवघन्—हेवेन) heaven शब्दो व्युत्पादित स्तथा पृथ्वीशब्दस्य विकारात् Earth शब्दः सञ्जातः। तथाहि—

And darkness was,upon the face of the deep. 2—1 Chap.
पक्षान्तरे— अस्माकं वेदेषु विद्यते—तम आसीत् तमसा गूढ़मग्रे। ३।१२९।१०म। ऋक्। आसीदिदं तमोभूतमप्रज्ञातमलक्षणम्। ५। १अ। मनु।

अतएव यस्मिन् वाइवेलग्रन्थे तान्त्रिकयुगस्य प्रतिमाशब्दो विद्यते, प्रतिमा पूजानिषेधोऽपि वर्त्तते, तदेव अर्वाचीनं वाइवेलपुस्तकं, वेदस्मृति पुराणादिक मादर्शीकृत्य विरचितम्, एतत् सर्वं तेभ्यो वेदादिभ्यो गृहीतम् इति। तथाहि—

एकार्णवे तदा तस्मिन् न प्राज्ञायत किञ्चन। २
ब्रह्मा नारायणाख्यः स सुष्वाप सलिले तदा॥ ३

आपो ह्येते च यत् तस्मात् तेन नारायणः स्मृतः। ५—६अ वायुपुराणम्।

पुराणोक्त मेतत् सर्व मैतिह्यं भ्रान्तिदुष्टं, यतः परमेश्वरः कच्छपो न मत्स्योपि न, सृष्टेः प्राक् कुत्र वा सलिलं, कुत्र वा सर्व्वव्यापी अनन्तः स कुम्भीरवत् गोष्पद-परिमिते जले शयनं कुर्य्यात्। तुर्वसुतनयाः क्षत्रिया यवनास्तु चन्द्रवंशीयाः सगरकोपेन सर्वादौ आफरिकायां मिश्रदेशं गताः ततस्तस्मात् तुरुष्कदेश मागत्य पुराणानां भ्रान्ति मिमा मनुसृत्य वाइवेलं लिलिखुः—

And the spirit of God moved upon the face of the waters.

न केवलमेतत्. परमेश्वरः पाटीगणितस्य कखगघवत् षट्दिवसैः सर्व मसृजत्। वस्तुतस्तु भ्रान्तिरेषा—स ईश्वरः अतप्यत, तत्क्षणादेव जगतामादि-कारणं परमाणुः सृष्ट इति। तत स्तेषां परमाणूनां योगवियोगेन सर्वे पदार्था उत्पन्नाः। तेषु मनुष्या भगवतः षष्ठो सृष्टि रिति पुराणेषु विद्यते न पुनर्वेदेषु। पक्षान्तरे वाइवेलग्रन्थे अस्ति—

So God created man (27) And the evening and morning were the sixth day. 31—1 chap, genesis.

भ्रान्तिरेषापि वाइवेलग्रन्थस्य। वस्तुतस्तु पुराणप्रसङ्गस्य विस्मरणादेव ते भूतपूर्वभारतसन्ताना यवना इदमलिखन्। पुराणेषु तु एवं विद्यते—

इत्येते कथिताः सर्गाः षड्त्र मुनिसत्तम।
प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः॥ १८
तन्मात्राणां द्वितीयश्च भूतसर्गस्तु स स्मृतः।
वैकारिक स्तृतीयस्तु सर्ग ऐन्द्रियिकः स्मृतः॥ १९
इत्येष प्राकृतः सर्गः सम्भूतो बुद्धिपूर्वकः।
मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः स्मृताः॥ २०
तिर्य्यक्स्रोतास्तु स प्रोक्त स्तिर्य्यग्योन्यः स उच्यते।
ऊर्द्ध स्रोता स्ततः षष्ठो देवसर्गस्तु स स्मृतः॥ २१
ततोऽर्वाक्स्रोतसः सर्गः सप्तमः स तु मानुषः। २२

५अ—१ अंश—विष्णुपुराण।

एतेन किं मायातं ? यतः सर्वादौ परमाणूनां सृष्टि र्बभूव, तत स्तस्मादेव जलस्थलस्थावरजङ्गमजीवजन्तुमनुष्यादयः सर्वे समुत्पन्नाः। स तु परमेश्वरः साक्षात्सम्बन्धेन सर्वेषां जड़नराणां स्रष्टा न, तस्य कौशलेन विवर्त्तनक्रमेणैव

परमाणुभ्यः अन्यत् सर्वमुत्पन्नमिति। परन्तु वाइवेलप्रणीता पैत्रकपुराणादि विद्युतविषयाणां विस्मृतिवशात् यत् किमपि अलिखत्। तथाहि—

And on the seventh day God ended his work which he had made : and he rested on the seventh day from all his work which he had made.

परन्तु भ्रान्तिरेषापि। यस्य चिन्तनमात्रेण सर्वमुत्पद्यते उत्पन्नञ्च, स सप्तदिवसान् व्याप्य कठोरश्रमेण सृष्टिं सम्पाद्य पश्चात् साधारणमनुष्यवत् व्यश्राम्यत् इति समीचीनं न। कस्मादेषा भ्रान्तिः समागता ? यतो हिन्दुशास्त्रादेव इयमपि भ्रान्तिः वाइवेलग्रन्थे लब्धावसरा इति। तत्र प्रमाणम्—

स: अर्चन् अचरत्, तस्य अर्चत आपोऽजायन्त। आपो वै अर्कः,
तत् यदपां शर आसीत् तत् समहन्यत, सा पृथिवी अभवत्, तस्याम्
अश्राम्यत्। ४२—४४ पृ, वृहदारण्यक।

तत्र शङ्करभाष्यम्—स प्रजापतिः अश्राम्यत् श्रमयुक्तो बभूव। सर्वोहि लोकः कार्यं कृत्वा श्राम्यति। तथाहि—

> स भूयः अश्राम्यत्, भूयः अतप्यत्, भूयः आत्मानं समतप्यत्, तस्य श्रान्तस्य तप्तस्य सन्तप्तस्य सर्वेभ्यो रोमगर्तेभ्यः पृथक् स्वेदधारा प्रास्यन्दन्त। गोपथब्राह्मणम्।

अनेन किं सिद्धं ? कवित्वं, सत्यमन्यत् किमपि वा साधारणं वस्तु सर्वेषु जनपदेषु स्वतएव जायते, तत्साम्येन—कश्चिदेवं वक्तुमनुमातुं वा न शक्यते यत् एतयोरेक आदर्शः, अन्यश्च अनुकारीति, परन्तु वाइवेलहिन्दुशास्त्रयो रेतेन भ्रान्तिसाम्येन वयमेवमेव वक्तुं शक्यामहे यदत्र हिन्दुशास्त्रमादर्शः, वाइवेलग्रन्थस्तु तदनुकारीति। यतो भूतपूर्वभारतसन्ताना यवना एव भारतवर्षात् मिश्रदेशं गत्वा तस्मात् तुरुष्कदेशमागत्य हिन्दुशास्त्रस्य द्रव्यसम्भारेण वाइवेलग्रन्थं प्रणिन्युरिति।

यद्येवं स्यात्, तर्हि वाइवेलग्रन्थात् अस्माकं पुराणानि ब्राह्मणानि उपनिषदश्च प्राचीनानि इति स्वीकर्त्तुं युज्यते। वाइवेलग्रन्थस्य वयःपरिमाणं ३८०० वर्षाणि। अतएव पुराणवयःक्रमः खलु वाइवेलवयःपरिमाणादधिक एव इति कथने न कोपि प्रत्यवायः। अथ पुराणब्राह्मणोपनिषदः खलु वेदानां व्याख्यापुस्तकानि अतएव तेषां वेदानां वयःक्रमः खीः पू १५०० —१००० वर्षाणि इति वक्तुं कथमपि न युज्यते। अथ मनीषिणा म्याकडोलानमहोदयेन उक्तम्—

All previous estimates of the antiquity of the Vedic period have been

outdone by the recent theory of Professor Jacobi of Bonn, who supposes that period goes back to at least 4000 B. C. This theory is based on astronomical calculations conected with a change in the begining and the seasons, which Professor Jacobi thinks, has taken place since the time of the Rigveda The whole estimate is, however, invalidated by the assumption of a doubtful, and even improvable, meaning in a Vedic word, which forms the very starting-point of the theory. Meanwhile we must rest content with the certainty that Vedic literature in any case is of considerably higher antiquity than that of Greece, P. 12.

अध्यापको जेकोविमहोदयो ज्योतिषगणनया इदं स्थिरीकृतवान्, यत् ऋग्वेदस्य वयःक्रमः खृष्ट पूः ४००० वर्षाणि। तस्य गणना इयं विशुद्धा न वा, वयन्तु एतदपि परिमाणं नितरां लघीय एव मन्यामहे। यत् महाभारतं रचयित्वा ऋषयो भारतीयाः सर्वेभ्यो विदायं गृहीत्वा विरेमुस्तस्य अर्वाचीनस्यापि महाभारतस्य वयःपरिमाणं प्रायेण षट्सहस्रवर्षाणीति। तथाहि—

Considering that the affinity of the oldest form of the Avestan language with the dialect of the Vedas is already so great that by the mere application of phonetic laws, whole Avestan stanzas may be translated word for word into Vedic, so as to produce verses correct not only in form but in poetic spirit; considering further, that if we knew the Avestan language at as early a stage as we know the Vedic, the former would necessarily be almost identical with the latter, it is impossible to avoid the conclusion that the Indian branch must have separated from the Iranian only a very short time before the beginning of Vedic literature, and can therefore have hardly entered the North-West of India even as early as 1500 B. C. (P. 12)

अतएव वच्मि केपि भारतीयाः पाश्चात्या वा अस्माकं वेदादिशास्त्रं पठित्वा पाठयित्वा वा न किमपि बुबुधिरे इति। वयं असुरान् (Iranians) पारस्ये विहाय भारतं प्रविष्टा इति न, वेदविरुद्धत्वात्। ते तु भारते चातुर्वर्ण्यप्रतिष्ठाया अनन्तरमेव अस्मात् भारतवर्षात् पारस्ये तुरुष्के च निर्वासिता इति। तस्मात् बहु प्रागेव स्वर्गे सामवेदः प्रणीतो, भारतवर्षे च ऋग्वेदाथर्ववेदौ प्रणीतौ इति। वेदविद्वेषात् वैदिकयागादिषु अवज्ञावर्षणादेव च ते भारतवर्षात् सन्ताडिता अतएव ते असुरा वेदरचनायाः पूर्वमेव अस्माभिर्वियुक्ता इति न। उक्तञ्च—

इन्द्र ब्रह्मद्विषो जहि। नुदस्व अदेवयुं जनम्। ऋग्

वज्रिन् ओजसा अधि पृथिव्या निःशशाः। अर्वाञ्चं नुनुदे वलम्। ऋक

इत्यादिभिर्वैदिकप्रमाणैरेव प्रतीयते प्रमीयते च यत् असुरा वेदविद्वेष वशादेव भारतवर्षात् सन्ताड़िता इति। न पुनस्तान् आर्य्यायणे (at Iran) विहाय भारतीया आर्य्या भारतवर्षं प्रविविशुरिति।

ते च असुरा अस्माकं दायादबान्धवा भ्रातृव्याश्च (cousin), अतएव कथं तैः सह अस्माकं सर्वेषु विषयेषु एवं साम्यं न भवेत्। परन्तु यथा पालिभाषा, वङ्गभाषा, ग्रीकभाषा, लाटिनभाषा, तथा जर्म्माणभाषादयश्च संस्कृतभाषाया अवरजा स्तन्मात्रकत्वात्, तथा जेन्दभाषापि संस्कृतभाषाविकारप्रभवत्वात् तदवरजा इति जेन्दभाषायां विरचित आभेस्तायन्थो वेदेभ्यः सर्वथैव कनीयान् इति स्वीकर्त्तुं युज्यते। असुरा (Iranians) अतीव प्राचीनतमा न तत्र कोपि सन्देहः—परं तेषां आभेस्तापुस्तकं भारतपरित्यागात् बहुकालानन्तरमेव विरचित मिति। पह्लवी देवनागराक्षराणां विकारेण सम्भूता, जेन्दभाषापि संस्कृतभाषाविकारेण प्रसूता। अतएव तेन सह वेदानां वयःक्रमस्य तुलना न खलु कदापि करणीया इति। तत् कथं मुइरमहोदयेन इत्थं विहृतम् ?—

It is true that more may be said in favour of the hypothesis that Zend has been derived from Sanskrit, but there are sufficent reasons for believing that Zend is a sister and not a daughter of Sanskrit, and consequently, that both have a common mother of a more primeval date. S. T. Book, Vol II, P. 275

मैवम्, एतत्तु खलु मोयेबारवत् मुइरमहोदयस्य नितरां भारतविद्वेषणा भाषाज्ञानाभावत्वस्य वा, यतो यदि पालीमहाराष्ट्रीशौरसेनीगौड़ीप्रभृतयो भाषाः संस्कृतप्रभवाः स्युस्तर्हि कथं ता ग्रीकलाटिनजेन्दप्रभृतयश्च भाषाः संस्कृतप्रभवा न भवेयु रिति ? किमेताः सर्वा एव भाषाः संस्कृतभाषाया दुहितृ-दौहित्री-स्थानीया न भवन्ति ? न किं सत्यभीरुः Mr. W. Scott. Eilot एवमवदत्

Greek is the offspring of Sanskrit ? (PP. 9.)

ग्रीकभाषा संस्कृतभाषाया अपत्य मिति तु आटलाण्टिपयन्थे विहृत मस्ति। एवं सत्यवादी श्रीमान् उइलकिन्स महोदयोपि अवदत्—

There is a language, he writes, still existing, and preserved among the Brahmans of India. I shall be able to prove that the Greek is derived from the Sanskri, Max—S. L. Vol I. (PP—185.)

वस्तुतस्तु यथा ग्रीकलाटिनादयोपि भाषाः संस्कृतप्रभवा स्तथा जेन्दहिब्रु जर्म्माणादयोपि भाषाः संस्कृतप्रभवा इति। दृश्यते च—

संस्कृत	जेन्द	संस्कृत	जेन्द
सोम	हओमा	नराशंस	नेर्य्योसंघ
वृत्रघ्न	वेरेथ्रघ्न	महत् (वां—मस्त)	मज्दा
मित्र	मिथ्र	त्वम्	तुम्
भरन्	बरन्	दाता	दाता
पितरः	पेतार	वयं	वयेम्
दुहितरः	धुगतर	वहामि	वजामि
भ्रातरः	ब्रातर	त्रि	थ्रि
पतिस्	पयतिस्	नवम	नउमो
नामन्	नामन्	विंशति	विंशैति
मधु	मधु	चत्वारः	चथ्वारो
जात	जात	त्रयस्	थ्रयो
अहि	अजि	उपरि	उपैरि
अहं	अजेम्	मृत्यु	मेरेथ्यु
मध्य	मद्ध्य	वारि	वएरि
अश्व	अश्प	वस्त्र	वस्त्र
श्वेत	शफेद	पराक	फराक
हरिद्रा	जरदा	शतं	शतेम्
स्तारः	स्तेयार	दशन्	दशेम
कृशाश्व	केरेशाश्प	ददामि	दधामि
उभ	उव	पृच्छामि	पेरेछामि
द्वौ	द्वा	न	नो
तिस्रः	तिसारो	वस्	वो
सप्तन्	हप्तन्	दातारः	दातरो
केतन	ये तन	असुर	अहुर
पद	पाध	पथस्	पतस्

अथ यदि गौड़ीयः चांदशब्दः संस्कृतचन्द्रशब्दप्रभवः स्यात्, यदि पालीय शब्दाः संस्कृतशब्दप्रसूता इति अनुमातुं शक्यते, तर्हि उपरि धृताः सर्वे जेन्दशब्दा अपि संस्कृतप्रभवा इति कथं न वक्तुं शक्यते ? अतएव जेन्दभाषा संस्कृतभाषायाः कन्या एव इति कथने कः प्रत्यवायो भवेत् ? अतएव जेन्दाभास्ता वेदेभ्यो नितरामेव कनीयसी इति प्रकृतानां विदुषामेव परामर्श इति।

अथ केचिदेवं वदन्ति यत् मिश्रदेशस्य हाइरोग्राफिकभाषा लिपिश्च संस्कृत भाषायाः प्राचीनतमा इति। मेशरसभ्यता च भारतीयसभ्यताया वर्षीयसीति। परन्तु तन्न, भारतीयाः क्षत्रिया यवना एव सगरलाञ्छिता मिश्रदेशं गत्वा इथिओपियानजातौ परिणता अभवन्, तस्मात् मिश्रदेशादेव केचित् यवना आरव देशं, केचित् पल्लीस्थानं (Palestine) केचिच्च ग्रीशदेशं गताः। अतएव ते कथं मिश्रदेशवासिनो भारतीयात् प्राचीनतमाः स्युः ? किं न महामतिः पोकक्कोपि इदमुक्तवान् ?

Philostratus introduces the Brahmin Iarchus, stating to his auditor, that the Ethiopians were originally an Indian race, compelled to leave India, for the impurity contracted by slaying a certain monarch, to whom they owed allegiance. India in Greece P.—205.

An Egyptian is made to remark that he had heard from his father, that the Indians were the wisest of men, and that the Ethiapians, a colony of the Indians preserved the wisdom and usages of their fathers and acknowledged their ancient origin. (Ibid)

अद्यापि आफ्रिकादेशस्य भङ्गुरीयाकार स्तस्य अर्वाचीनत्वं रूसूचयति। तान्त्रिकयुगे तान्त्रिकधर्म्मं गृहीत्वा यवना भारतवर्षात् मिश्रदेशं गताः। यदि हाइरोग्रिफिकलिपिः प्रकृतपाठोद्धारः स्यात्, तत् कथं तत्र बहवो मतभेदा लक्ष्यन्ते ?

अथ केचित् भारतगौरवं सोढुमसमर्था वदन्ति वेबिलनमेषपटेमियाप्रभृतयो जनपदा एव भारतवर्षात् प्राचीनतमा इति। परन्तु ये खलु वेदपारगा स्ते न कथमपि एव एव अनुमातु मपि शक्ष्यन्ते वेदविरुद्धत्वात्। जगति द्यौः सर्वेभ्यो जनपदेभ्यः प्राचीनतमा, भारतवर्षं प्राचीनत्वे द्वितीयं, ततः भुवर्लोकः

(तुरुष्कपारस्यापोगस्थानं) स्थले परिणत: अभूत्। भारतीया देवमनुष्या एव स्वर्ग भारतवर्षाभ्यां तत्र उपनिविविशु रिति, अतएव वेबिलोनियादीनां प्राचीनत्वं खलु वेदानभिज्ञमुखराणां मुखरत्वविशेष इति।

बुद्ध तावत् सर्वं, परन्तु युगपरिमाणम् अतीव पराकाष्ठां गतं, तत् विश्वमित्र माला न रोचते। वयं मन्यामहे, अस्माकं युगमानम् उत्तरकुरुवर्षस्य वर्षमाणात्मकं न, परन्तु आदिस्वर्गस्य पितृलोकस्य द्योरेव वर्षमाणेन स्थिरीकृतं। देवानामेकेन दिव्यदिवसेन अस्माकं एकवर्षं भवति पितृणा मेकदिवसेन अस्माकं मास एक: स्यात्, अस्माकं सत्ययुगं पित्रचतु:सहस्रवर्षात्मकं, त्रेतायुगं पित्रत्रिसहस्र वर्षात्मकं, द्वापरयुगं पित्रद्विसहस्रवर्षात्मक मिति। एवं कृते सर्वं विश्वास योग्यं स्यात्। अस्तु यदेव, परं यदि महाभारतस्य वय:क्रम: सप्तदश-वर्षाधिकपञ्चसहस्रवर्षपरिमित: स्यात् तर्हि अष्टाविंशव्यासस्य कृष्णद्वैपायनस्य वय:क्रम: खलु शतवर्षाधिकपञ्चसहस्रवर्षात्मक इति वक्तुं युज्यते।

यदि तत् स्वीकरोषि, तर्हि येषां वेदानां तत्पूर्वं सप्तविंशतिसंस्करणानि अभवन् तेषां प्राचीनतमवेदानां वय:क्रम: खलु त्रिंशत्सहस्रवर्षात्मक इति अनुमातुं स्वीकर्तुं वा को व्यामोह:? यदा मुद्रायन्त्रं नासीत् वाष्पीयशकटादिकमपि विलुप्त मभवत्, तदा वेदानामष्टाविंशतिसंस्करणसम्पादने अष्टाविंशति-सहस्राणि वर्षाणि गतानि इति न कथं ब्रूम:।

अथवा येषां वेदानां पठनपाठने विलुप्ते येषां वेदानां शब्दा न बोधगम्या अर्था अपि न ज्ञातव्या येषां वेदानां पितृभूमि द्यौरपि पारलौकिकपितृलोकत्वं गता, येषां वेदानां व्योम आकाशं दिव् द्यौश्च गगनत्व मापु:, येषां वेदानां—

द्रेकाण, हरकाण जीरदातु,

प्रभृतयश्च शब्दा आरविकशब्दवत् किम्भूतकिमाकारत्वं गता, येषां वेदानामुत्पत्तिस्थान मपि वयं साम्प्रतं निर्णेतुं न समर्था येषां वेदानां व्याख्यात्मका उपनिषद्ब्राह्मणादयश्च वेदत्वं गता: खलु एव, यांश्च वेदान् उपजीव्य—

व्यासोच्छिष्टं जगत् सर्वं

वेदोच्छिष्टं जगत् सर्वम्

सव ग्रन्था: श्रौतसूत्रकल्पसूत्रगृह्यसूत्रब्राह्मणोपनिषत्स्मृतिरामायण महाभारत-पुराण (पुराणं वेदसम्मितं) तन्त्रादयो बाइबेलकोराणे विरचिता स्ते वेदा जगतामादिग्रन्था: प्राचीनतमा बहुलक्षवत्सरवयसो न किं वा, तत् धीरा एव सत्यभीरव: कथयन्तु। एते वेदा हिन्दुमुसलमानखृष्टानपारसिकानां बौद्धाना मपि पैतृकविभवा इति यदि अमूलकं न स्यात् तर्हि ते जगतां सर्वेभ्यो ग्रन्थेभ्य एव वर्षीयांस इति कथन मेव युक्तियुक्तमिति। उक्तञ्च—

पूर्व्या जायमाना पित्रा धो:। २।३८।२म

पितृलोकमङ्गलोयाप्रभवा धो: कवित्वसभ्यतादिकं पूर्व्या सर्वेभ्य: प्राचीनतमा इति।

यदोत्पन्नो न स्यान् मिशरमरुदेश: किमथवा
तुरुष्क: पारस्यो न पुनरपि वेबीलन मथो।
यदेमे द्यौ: पृथ्वी (India) पृथुलपरिमाणे विलसत:
तदैवास्यां वेदान् रचयतितरां ब्राह्मणगण:॥
अनित्या: पौरुषेयाश्च वेदा: सर्वे न संशय:।
किन्त्वेते वयसि वृद्धा: सर्वेभ्य एव भूतले।
भाषा ज्ञानं विना तात वेदज्ञानं विना तथा।
जानीयु: के च वेदानां महिमानं महीतले॥

व्याख्या-प्रकरणम् ।

१ । उपनिषत् ।

वैदिकयुगे वैदिकप्रायभाषया ऋषिभिर्ये ये वेदव्याख्याग्रन्थाः सम्पादिता स्ते आदिवेदव्याख्याग्रन्था एव "उपनिषद्" इति संज्ञया समलङ्कृताः इति ।

उप भगवतः समीपे निषीदति उपविशति
गच्छति वा अनया इति "उपनिषत्"।

अस्मिन् उपनिषद्युगे दार्शनिकप्रतिभाशालिन ऋषयो भारतवर्षे ब्रह्मतत्त्वादि विषये यां पराकाष्ठां प्रदर्शितवन्तः, सा अत्युन्नति वेदेष्वपि न प्रदर्शिता, अत उपनिषदो वेदस्य ज्ञानकाण्डमिति प्रवादः प्रचरद्रूपः। वस्तुतस्तु यथा वेदा विभिन्नाः, तथा उपनिषदश्च नितरां विभिन्ना एव। वेदाः कर्म्मकाण्डविषया न, परन्तु ते तु प्राकृतनैतिह्यबहुलाः, धर्म्मकर्म्मादिकमपि, क्वचित् प्रसङ्गत स्तेषु विवृत-मिति, पक्षान्तरे वेदरचनाया बहुकालादनन्तरमेव स्वतन्त्रै ऋषिभिरेताः उपनिषदः प्रणीता इति। तर्हि किं सर्वा उपनिषदो वेदानामादर्शेन न प्रणीताः ? तास्तु प्रायेण वेदानेव उपजीव्य विरचिता इति प्रतीयते ।

वेदेषु अध्यात्मतत्त्वादीनां सामान्यभावेन अवतारणा कृता, उपनिषदि तु तत् सर्वं विस्तारेण विवृत मासीत्। यथा वेदेषु ऐतिह्यादीनामपि बाहुल्यं विद्यते, तथा उपनिषदि अपि ऐतिह्यं प्रसङ्गतः अवतारितमिति। वेदे मन्त्राः सन्ति, उप-निषदि अपि केचित् केचित् वेदमन्त्रा विकलम् अविकलं वा अध्याहृता इति। वेदे मन्त्रव्याख्या नास्ति, पक्षान्तरे उपनिषदि सा क्वचित् क्वचित् वर्त्तमाना। अतएव वयं वक्तुमुत्सहामहे यत् उपनिषदो वेदस्य आदिव्याख्याग्रन्था इति ।

मूलम्—समुद्रादर्णवादधि संवत्सरो अजायत । २—१९०—१०म

व्याख्या—संवत्सरो वै प्रजापतिः, तस्य अयने, दक्षिणञ्च उत्तरञ्च। तद् ये ह वै तत् इष्टापूर्त्ते कृत मित्युपासते ते चान्द्रमसमेव लोकम् अभिजयन्ते। ९ पृ प्रश्नोपनिषत् ।

ऋग्वेदमन्त्रे उत्तरमहासागरगर्भे संवत्सरलोकस्य उत्पत्तिविवरणं विहितम्, असौ संवत्सरः किं ? प्रश्नोपनिषत्प्रणेता तत् विशदयति, एष संवत्सरः कश्चित् जनपद इति। तत् कथं मिथ्यशङ्करेण व्याख्यातम् "एष प्रजापतिः सूर्य्यः, तस्य द्वे अयने उत्तरायणं दक्षिणायनञ्च, ताभ्यां द्वादशमासात्मकः संवत्सरः घटितः"। मैवं, यतो यदा तत्रैव चान्द्रमसस्य लोकस्य निर्द्देशो दृश्यते, तदा अयं प्रजापतिः खलु दिवाकरो न। वस्तुतस्तु प्रजापतिशब्देनात्र अत्रिनन्दन चन्द्रः संसूचित इति, तस्य द्वे अयने द्वौ जनपदौ, उत्तरसंवत्सरस्तथा दक्षिणसंवत्सरश्च। दक्षिण-संवत्सरो मेरुपर्व्वतसानुसंस्थः,उत्तरसंवत्सरस्तु उत्तरमहासागरगर्भे समुत्पन्नो महर्लोकः (दक्षिण साइबिरिया) इति। ये योगिनः खलु इष्टं यागादिकं पूर्त्तं कूपवापीखननादिकं कृत्वा ब्रह्म उपासितु मिच्छन्ति, ते तु चान्द्रमसम् उत्तरसंवत्सरं गत्वा अभिजयन्ते, तत्र सुखेन वसन्ति। अस्त्यत्र प्रमाणान्तरम् ? अस्त्येव—

ता द्वादश सम्पद्यन्ते दादश वै मासाः संवत्सरः। संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेव आभीराप्नोति। ६०पृ ऐतरेय-ब्राह्मणम्।

संवत्सरशब्दस्य द्वौ अर्थौ, एकार्थस्तु द्वादशमासात्मकः पूर्णवत्सरः, अन्यार्थस्तु प्रजापते श्चन्द्रस्य आयतनविशेष इति। यदुक्तं कृष्णयजुषि— संवत्सरः खलु वै देवाना मायतनं, तस्मात् वै आयतनात् देवा असुरान् अजयन् इति।—८८ पृ। तथाहि तैत्तिरीयब्राह्मणं—द्वादश मासाः संवत्सरः, संवत्सरः खलु वै देवानां पूः (नगरम्)। २१६ पृ।

अतएव ऋग्वेदमन्त्रस्य (२।१८०।१०म) सायणव्याख्या, तथा प्रश्नोपनिषदि यत् शङ्करभाष्यमस्ति, तत् सर्वं व्याहत मिति। तथाहि—छान्दोग्योपनिषत्— मासेभ्यः संवत्सरं(कतिपयमासैर्भारतवर्षात् दक्षिणसंवत्सरं मेरुपर्व्वतस्थम्) संवत्सरात् आदित्यं(अदितिनन्दनसूर्य्यस्य द्यां)आदित्यात् चन्द्रमसं चन्द्रस्य उत्तरसंवतसरम्। ३५७पृ। मद्देशपालसं।

मूलं······अहोरात्राणि विदधत् विश्वस्य मिषतो वशी।२।१८०·१०म

व्याख्या······अहोरात्रो वै प्रजापतिः। तस्य अहरेव प्राणः ; रात्रिरेव रयिः।१४पृ अथ उत्तरेण तपसा ब्रह्मचर्य्येण श्रद्धया विद्यया आत्मानम् अन्विष्य आदित्यम् अभिजयन्ते। एतत् वै प्राणाना मायतनम् अमृतम् अभयम् एतत्

परायणम् एतस्मात् न पुनरावर्त्तन्ते, इत्येष निरोधः। ११पृ प्रश्नोपनिषत्। अत्र अदितिनन्दनः सूर्य्य एव आदित्यः, स एवात्र प्रजापतिशब्देन विशेषितः। तस्यापि द्वे अयने अहर्जनपदः, रात्रिजनपदश्च। एतौ जनपदौ अपि उत्तरमहासागरगर्भे उत्पन्नौ (१।२-१८० सू-१०म) तयोर्मध्ये अहर्जनपदो देवयानपथस्य उत्तरांशः (अग्निर्ज्योतिरहः—गीता २४।८अ), रात्रिजनपदश्च पितृयाणपथस्य दक्षिणांशः (धूमोरात्रिः। २५ ऐ)। यदा असौ सूर्य्यः दिवं गत्वा उपनिविवेश, तदा तेनैव एतज्-जनपदद्वय मध्युषित मिति। श्रद्धान्विता विद्वांसो ब्रह्मचारिणो ये आत्मान्वेषिण स्ते तु अत्रैव गत्वा सुखेन वसन्ति। एतत्स्थानद्वितय मतीव शान्तिप्रदं। तस्मात् ये तत्र गच्छन्ति ते न पुनर्गृहं प्रत्यागच्छन्तीति। तथाहि—ऐतरेयब्राह्मणम्।

अहर्वै देवा अश्रयन्त रात्री मसुराः। ४४५ पृ—

एतौ जनपदौ पूर्वं सूर्य्याधिकारे आस्तां, पश्चात् अहर्जनपदं देवा रात्रिजनपद मसुरा (न तु असुराः परन्तु दैत्यदानवाः, स्वर्गे असुराणामभावात्) आश्रयन्। ततस्तान् निरस्य विष्णुना सर्वमधिकृतम्। तत एतयोर्नाम तपोलोक इति। तथाहि—धूमात् रात्रिं रात्रेरपरपक्षं। छा—२५८। अर्चिषः (उत्तरसंवत्सरात् ज्योतिर्लोकात्) अहः अहर्लोकम्, अह्नः अहर्लोकात् आपूर्य्यमाणपक्षम्। छान्दोग्य। २५२ पृ।

मूलम्······यत्र त्रिदिवे दिवो लोका यत्र ज्योतिष्मन्तः। ९ यत्र कामा निकामाश्च, यत्र ब्रध्नस्य विष्टपं, स्वधा च यत्र तृप्तिः। १०। यत्र आनन्दाश्च मोदाश्च, मुदः प्रमुद आसते, कामस्य यत्र आप्ताः कामाः, तत्र मा मम्टतं कृधि।११।११३-९म

व्याख्या······एष ब्रह्मलोको येषां तपो ब्रह्मचर्य्यं येषु सत्यं प्रतिष्ठितम्। तेषामसौ विरजो ब्रह्मलोको न येषु जिह्म मनृतं, न माया चेति। १६प्रश्नोप।

मूलम्······न मृत्युरासीत् अमृतं न तर्हि,न रात्र्या अह्न आसीत् प्रकेतः। आनीदवातं स्वधया तदेकं, तस्मात् द्धान्यत् न परः किञ्चनास॥ २-१२९-१०म

व्याख्या······आत्मा वै इदमेक एव अग्रे आसीत् नान्यत् किञ्चन मिषत्। ऐतरेयोपनिषत् प्रारम्भः।

शङ्करभाष्यम्—अग्रे जगतः सृष्टेः प्राक् (इदमयम् एक आत्मा परमात्मा ब्रह्म एव) आसीत् अन्यत् किञ्चन (ईश्वरादन्यत् किमपि वस्तु जातम्) न मिषत् (विद्यमानं न) व्यापारवत् न इति।

मूलम्……यतो भूमिं जनयन् विश्वकर्मा वि द्यामौर्णोत् महिना विश्वचक्षाः। २-८१-१०म

व्याख्या……स ईक्षत लोकान् नु सृजा इति। स इमान् लोकान् असृजत। दिवं द्यौः प्रतिष्ठान्तरिक्षं पृथिवीम्। ऐतरेयोपनिषत्। ७पृ

मूलम्…… चन्द्रमा मनसो जातः चक्षोः सूर्यो अजायत। १३-९०-१०म

व्याख्या……मनसश्चन्द्रमाः, अक्षिभ्यां चक्षुः, चक्षुषः—आदित्यः। १०पृऐत

मूलम्……दिशः श्रोत्रात्, तथा लोकान् अकल्पयन्। १४-९०-१०म

व्याख्या……श्रोत्रात् दिशः। १०पृ। स इमान् लोकान् असृजत। ७पृ-ऐ-

मूलम्……कस्मै देवाय हविषा विधेम। १-१२१-१०म

व्याख्या……तस्मात् तस्मै कस्मै च देवतायै हविर्दीयते। १४पृ-ऐत, उ,

मूलम्…को ददर्श प्रथमं जायमानम् अस्थन्वन्तं यदनस्था बिभर्ति।

४-१६४-१म

व्याख्या……तं स्त्री गर्भं बिभर्ति। सोऽग्रे एव कुमारं जन्मनः अग्रे अधि भावयति। स यत् कुमारं जन्मनः अग्रे अधिभावयति, आत्मान मेव तद् भावयति एषां लोकानां सन्तत्या एवं सन्तता हि इमे लोकाः तदस्य द्वितीयं जन्म। २८पृ-ऐत उ

मूलम्……आत्मा क्वस्वित्। ४।१६४।१म

व्याख्या……कोऽय मात्मेति वयमुपास्महे कतरः स आत्मा येन वा रूपं पश्यति येन वा शब्दं शृणोति येन वा गन्धान् आजिघ्रति। येन वाचं व्याकरोति। ३३पृ—ऐ

मूलम्…यो नः पिता जनिता यो विधाता यो देवानां नामधा एक एव। ३-८२-१०म। एकं सत् विप्रा बहुधा वदन्ति ४६।१६४।१म ॥५।११४।१०म

व्याख्या……एष ब्रह्म एव इन्द्र एष प्रजापतिः एते सर्वे देवाः। ३६पृ-ऐ

य एकोऽवर्णो बहुधा शक्तियोगात् तदेवाग्नि स्तदादित्य स्तदु वायु स्तदु चन्द्रमाः। ७५ श्वेताश्वतरः

मूलम्······· यः प्राणतो निमिषतो महित्वा एक इत् राजा जगतो बभूव ।
य ईशे अस्य द्विपद श्चतुष्पदः कस्मै देवाय हविषा विधेम ॥ ३
यस्य इमे हिमवन्तो महित्वा यस्य समुद्रं रसया सह आहुः ।
कस्मै देवाय हविषा विधेम । ४-१२१-१०म

व्याख्या: ·····केन इषितं पतति प्रेषितं मनः, केन प्राणः प्रथमः प्रैति
युक्तः । केनेषितां वाच मिमां वदन्ति । चक्षुः श्रोत्रं क उ देवो
युनक्ति । तलवकारोपनिषत् प्रारम्भः

मूलम्·······न एतावत् एना परो अन्यदस्ति,उक्षासो द्यावापृथिवी बिभर्त्ति ।
८-३१सू—१०म

व्याख्या·········यत् चक्षुषा न पश्यति येन चक्षूंषि पश्यति तदेव ब्रह्म त्वं
विद्धि नेदं यदिद मुपासते ।१० पृ तलवकार

मूलम्······न तं विदाथ य इमा जजान अन्यत् युष्माक मन्तरं बभूव ।
नीहारेण प्रावृता जल्प्या च । असुतृप उक्थ- शंसश्चरन्ति ॥ ७-८२—१०म

व्याख्या······न तत्र चक्षुर्गच्छति न वाक् गच्छति नो मनो न विद्मः ।
विजानीमो यथा एतत् अनुशिष्यात् अन्यदेव तत् विदितात्
अथो अविदितात् अधि । इति शुश्रुम, पूर्वेषां ये नः तत् व्याच
चक्षिरे । तलवकार । ७पृ । नाहं मन्ये सुवेदेति । १२पृ तलव ।
नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । २५पृ,कठ
नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा । अस्तीति
ब्रुवतोऽन्यत्र कथं तदुपलभ्यते ॥ ७८पृ— काठ ।

मूलम्·······इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
७। १२८-१०म

नासदासीत् नो सदासीत् तदानीं नासीद्रजो नो व्योमपरोयत् । १
को अद्धा वेद क इह प्रवोचत्, कुत आयाता कुत इयं विसृष्टिः ।
१।६।१२८ सू । १०म

व्याख्या·······किं कारणं ब्रह्म, कुतः स्म जाताः । जीवाम केन क्व च संप्रति-
ष्ठिताः श्वेताश्वतर । १६पृ

मूलम् …काल: प्रजा असृजत कालो अग्रे प्रजापतिम् । स्वयम्भू: कश्यप:
कालात् तप: कालात् अजायत ॥ ५१३पृ,
कालादृच: समभवन् यजु: कालादजायत ५१४ ।

कालोऽमूं दिवमजनयत् काल इमा पृथिवीरुत । कालो भूति मसृजत ।५१० पृ । कालोह ब्रह्म भूत्वा विभर्त्ति परमेष्ठिनम् । कालो हि सर्वस्य ईश्वर: । ५१२ पृ । ४र्थ खण्ड अथर्ववेद

व्याख्या………काल: स्वभावोनियतिर्यदृच्छा, भूतानि योनि: पुरुष इति चिन्त्या । १७ पृ श्वेताश्वतर: । स्वभावमेके कवयो वदन्ति । कालं तथान्ये परिमुह्यमाना: । १०४ पृ श्वेताश्वतर:

स्वभावोजगतां स्रष्टा, कथमिदं श्वेताश्वतरादयोऽपि अवधारितवन्त: ? एतत् खलु "यदि वा दधे, यदि वा न" एतस्य ऋग्वेदमन्त्रांशस्यैव अनुवाद इति । यदि वा कश्चित् स्रष्टा दधे कृतवान्, तर्हि स कस्मात् समायात: ? किम् कारणं ब्रह्म ? अतएव यदि वा न दधे, यदि वा कश्चित् ईश्वरो न सृष्टवान्, सर्वमेतत् प्रकृत्या यदृच्छया स्वभावात् कालात् वा समुत्पन्न मिति ।

मूलम् ……द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिसस्वजाते । तयोरन्य: पिप्पलं स्वादु अत्ति, अनश्नन्नन्यो अभिचाकशीति ॥ २०।१६४ । १म

व्याख्या ……समाने वृक्षे पुरुषोनिमग्न:, अनीशया शोचति मुह्यमान: । जुष्टं यदा पश्यत्यन्य मीशमस्य महिमान मिति वीतशोक: ॥ ७८ पृ श्वेताश्वतर ।

मूलम्………तत् सवितुर्वरेण्यं धियोयो न: प्रचोदयात् । १०-६२-३म

व्याख्या …… तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी ॥
श्वेताश्वतर:—८८ पृ

मूलम्……मा नो हिंसीत् जनिता य: पृथिव्या:,यो वा दिवं सत्यधर्मा जजान, यश्चापश्चन्द्रा वृहतीर्जजान, कस्मै देवाय हविषा विधेम । ८-१२१ १०म

व्याख्या……मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिष: । वीरान् मा नो रुद्र भावितोऽवधी:,हविष्मन्त: सदसि त्वा हवामहे ॥
८२ पृ श्वेताश्वतर:

मूलं …..भूर्भुव: स्व: । ३-३६ अ,३७-३म शुक्लयजु: ।

व्याख्या......भूर्भुवः सुवरिति वै एतास्तिस्र व्याहृतयः। भूरिति वै अयं लोकः। भुव इत्यन्तरीक्षं, सुव—रित्यसौ लोकः (स्वः)। माहाचमस्यः प्रवेदयते एतां चतुर्थीं मह इति। १७ पृ तैत्तिरीयोपनिषत्।

मूलम्.....आपो ह यत् बृहतीर्विश्वमायन्, गर्भं दधाना जनयन्तीरग्निम्। ततो देवानां समवर्त्ततासुरेकः, कस्मै देवाय हविषा विधेम॥ ७-१२१-१०म

व्याख्या.........आपः अजायन्त ४२ पृ। आपो वै अर्कः, तत् यत् अपां शर आसीत्, तत् समहन्यत। सा पृथिवी अभवत् तस्या मश्राम्यत्, तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्त्तत अग्निः। तत्र शङ्करभाष्यम्—तस्य श्रान्तस्य सन्तप्तस्य खिन्नस्य तेजोरसः तेजएव रसः तेजोरसः सारो निरवर्त्तत प्रजापतिशरीरात् निष्क्रान्त इत्यर्थः। कोऽसौ निष्क्रान्तः? अग्निः, सः अण्डस्य अन्तर्विराट् प्रजापतिः प्रथमजः। "स वै शरीरी प्रथमः" ४ -४४ बृहदारण्यक।

मूलम्.......तस्मात् विराट् अजायत विराजो अधिपूरुषः। स जातो अत्यरीच्यत, पश्चात् भूमि मथोपुरः॥ ५। ८०। १०म

व्याख्या.....आत्मा एव इदमग्रे आसीत् पुरुषविधः, सोऽनुवीक्ष्य न अन्यत् आत्मनः अपश्यत्। १२२ पृ। स वै नैव रेमे तस्मादेकाकी न रमते, स द्वितीय मैच्छत्। १२५ पृ। स इममेव आत्मानं द्वेधा अपातयत् ततः पतिश्च पत्नी च अभवताम्। तस्मादिदम् अर्धवृगलमिव स्व इति ह स्माह याज्ञवल्क्यः। तस्मात् अयमाकाशः स्त्रिया अपूर्यत एव। तां समभवत् ततो मनुष्या अजायन्त। १२७ पृ, बृहदारण्यकोपनिषत् तत्र शङ्करभाष्यम्—स च पुरुषविधः पुरुषप्रकारः शिरःपाण्यादिलक्षणः। विराट् स एव प्रथमः सम्भूतः। प्रथमः अण्डजः। १२५ पृ

मूलम्......अहं मनुरभवं सूर्यश्च अहं कक्षीवान् ऋषि रस्मि विप्रः। १।२६।४म तत्र सायणः—इत्यादिमन्त्रत्रये अयं गर्भे वसन् वामदेवः उत्पन्नतत्त्वज्ञानः सन् सार्वात्म्यं प्रदर्शयन् आह।

व्याख्या......तत यो यो देवानां प्रत्यबुध्यत स एव तदभवत्। तथा ऋषीणां तथा मनुष्याणां तत् हि एतत् पश्यन् ऋषिर्वामदेवः

प्रतिपेदे—अहं मनुरभवं सूर्य्यश्चेति। बृहदारण्यकोपनिषत् २११ पृ

मूलम् ...ॐ (ओङ्कार:)

व्याख्या......ओमिति एतदक्षरम् उद्गीथ मुपासीत ।१।

ओमिति उद्गायति, तस्य उपव्याख्यानम्। १। ७पृ छान्दोग्य महेशपाल।

ओम् इति एतदक्षर मिदं सर्वं तस्य उपव्याख्यानं भूतं भवत् भविष्यदिति सर्वमोङ्कार एव। माण्डुक्यप्रारम्भः।

मूलम्.....बृहस्पते प्रथमं वाचो अग्रं यत् प्रैरत नामधेयं दधाना:।
१।७१।१०म

व्याख्या.....तेन तं ह बृहस्पतिमुद्गीथम् उपासाञ्चक्रे। एतमु एव बृहस्पतिं मन्यन्ते वाग् हि बृहती, तस्या एव पति:। २५ पृ। छान्दोग्य

मूलम्.....उद्गीथम्।

व्याख्या.....द्यौरेव उत् अन्तरीक्ष. गी: पृथिवी, थम्—आदित्यएव उद्वायुर्गी: अग्नि:, थं सामवेद:, उद् यजुर्वेद: गी: ऋग्वेद:, थं-दुग्धे अस्मै वाग्दोहं यो वाचो दोह:। अन्नवान् अन्नादो भवति य एतानि एवं विद्वान् उद्गीथाक्षराणि उपास्ते उद्गीथ इति। ३२ पृ। छान्दोग्य

मूलम्......अग्नेर्वयं प्रथमस्य अमृतानां मनामहे चारु देवस्य नाम।
२-२४मू--१म।

व्याख्या......तत् यत् प्रथम मन्मृतं तत् वसव उपजीवन्ति अग्निना मुखेन।
छान्दोग्य—१७१ पृ

मूलम्......ब्रह्मा देवानां पदवी: कवीना मृषि र्विप्राणाम्। ६।८६।८म

व्याख्या......तत् ह एतत् ब्रह्मा प्रजापतये उवाच, प्रजापतिर्मनवे, मनु: प्रजाभ्य: तत् ह एतद् उद्दालकाय आरुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच।
छा-१८७।

ब्रह्मा देवानां प्रथम: संबभूव, विश्वस्य कर्त्ता भुवनस्य गोप्ता, स ब्रह्म विद्यां सर्वविद्याप्रतिष्ठाम् अथर्वाय ज्येष्ठपुत्राय प्राह। मुण्डकप्रारम्भ:।

मूलम्......ॐ तत् सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियोयोन: प्रचोदयात्।
वेदचतुष्टयम्।

व्याख्या······गायत्री वै इदं सर्वं भूतं यदिदं किञ्च। वाग् वै गायत्री वाग् वै इदं सर्वं (Bible) भूतं, गायति च त्रायते च। १८९ पृ, छान्दोग्य।

मूलम्······आकाशो वै ब्रह्म। इति श्रुतिः।

व्याख्या······अयं वाव स योऽयमन्तःपुरुष आकाशः। पृ-१९४ छान्दोग्य। स य आकाशं ब्रह्म इत्युपास्ते। छा—५४१ पृ

मूलम्·········तस्मात् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्मात्, यजुस्तस्मादजायत॥ ९—९०-१०म

व्याख्या······प्रजापतिर्लोकान् अभ्यतपत्, तेषां तप्यमानानां रसान् प्राबृहत्, अग्निं पृथिव्या वायुमन्तरिक्षात् आदित्यं दिवः। अग्नेर्ऋचो वायोर्यजूंषि, सामान्यादित्यात्। भूरिति ऋग्भ्यः, भुवरिति यजुर्भ्यः, स्वरिति सामभ्यः। ३०० पृ। १४७ पृ। छान्दोग्य।

प्रजापतिर्वै इदमग्रे आसीत् एक एव। स इमान् त्रीन् लोकान् अभितताप तेभ्यस्तप्तेभ्यः त्रीणि ज्योतींषि अजायन्त, अग्निः, योऽयं पवते, सूर्य्यः। स इमानि त्रीणि ज्योतींषि अभितताप, तेभ्य स्तप्तेभ्य स्त्रयो वेदा अजायन्त। अग्नेः···ऋग्वेदः, वायोर्यजुर्वेदः, सूर्य्यात् सामवेदः। स इमान् त्रीन् वेदान् अभितताप, तेभ्य स्तप्तेभ्यः त्रीणि शुक्राणि अजायन्त, भूरिति ऋग्वेदात् भुवरिति यजुर्वेदात्, स्वरिति सामवेदात्। १०।५।८।१ शतपथम्। एवं षड्‌विंश ब्राह्मणम्। २७पृ।

कथमेतत् अधिगम्यते? यज्ञात् यज्ञसिद्धयर्थं देवैर्ऋषिभिश्च वेदमन्त्राः प्रणीतास्तेषां समाहारेण त्रयी सम्पादिता। ब्रह्मण आदेशात् अग्निवायुरवयो यथाक्रमेण भूर्लोकात् ऋग्वेदं, भुवर्लोकात् यजुर्वेदं, स्वर्लोकाच्च सामवेदं समाजह्रुरिति। अतएव ते लोका व्याहृतय इति। मनुरपि भगवान् आह—"दुदोह यज्ञसिद्धयर्थ-मृग्यजुःसामलक्षण मिति (२३-१अ)। वस्तुतस्तु यज्ञात् "यज्ञ—कुण्डात्" इति न, यज्ञात्— "परमेश्वरात्" इति च न। अग्निवायुरवयः···वह्निपवन-दिवाकरा इति च न। विषयेऽस्मिन् व्याख्याविधौ ब्राह्मणसायणमेधातिथिदयानन्द-कुल्लूकगङ्गाधरादीनां महती भ्रान्तिरभूत्।

मूलम्······ब्रह्माणि ससृजे वशिष्ठः।४।१८।७म। वशिष्ठासः पितृवत् वाचमक्रत देवान् ईळानाः स्वस्तये॥१४-६६-१०म

व्याख्या ·····यो ह वै वशिष्ठं वेद। वशिष्ठो ह स्वानां भवति वाग् वाव वशिष्ठः छा-२०८ पृ।

मूलम् ·····चत्वारि वाक् परिमिता पदानि, तानि विदुर्ब्राह्मणा ये मनीषिणः

व्याख्या·····पुरा विद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु लोकेषु चत्वरि ग्रव प्रशासन मभूदिति। छा—३२५ पृ। सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एषु लोकेषु त्रीणि, पशुषु तुरीयम्। इति ब्राह्मणम्। ४५-१६४-१म भाष्यम्।

मूलम् ·····न असत् आसीत् नो सदासीत् तदानीं। १-१२९सू।१०म

व्याख्या·····सदेव सौम्य इदमग्रे आसीत् एकमेव, अद्वितीयम्। तत् ह एक आहुः—असदेव इदमग्रे आसीत् एकमेवाद्वितीयं तस्मात् असतः सत् जायेत। छा-४१४ पृ।

मूलम्······इदं जनासो विदथ महत् ब्रह्म वदिष्यति। न तत् पृथिव्यां नो दिवि येन प्राणन्ति वीरुधः।१६६ पृ १म ख अथर्व।

व्याख्या······स एव अधस्तात् स उपरिष्टात्, स पश्चात् स पुरस्तात्. स दक्षिणतः, स उत्तरतः,स एव इदं सर्व्वम्। छान्द—५६६।स-स्वराट् भवति तस्य सर्वेषु लोकेषु कामचारो भवति। ५६७ पृ छा।

मूलम्···न तं विदाथ य इमा जजान, अन्यत् युष्माक मन्तरबभूव। नीहारेण प्रावृता जल्प्या च, असुतृप उक्थशासश्चरन्ति॥ ७—८२—१०म

व्याख्या···सूक्ष्ममिति सूक्ष्मविदः स्थूलमिति च तद्विदः। मूर्त्त इति मूर्त्तविदो अमूर्त्त इति च तद्विदः॥ काल इति कालविदो दिश इति च तद्विदः। वादा इति वादविदो भुवनानीति तद्विदः॥ माण्डूक्य—१०७पृ

अणोरणीयान् महतो महीयान्। आत्मास्य जन्तो र्निहितं गुहायाम्।
तमक्रतुः पश्यति वीतशोको धातुर्विभुमात्मानं मत्वा धीरोन शोचति॥
नायमात्मा प्रवचनेन लभ्यः, न मेधया न बहुना श्रुतेन।२५पृ,कठ
अस्ति नास्त्यस्ति नास्तीति नास्तीति नास्ति वा पुनः।
चलस्थिरोभयाभावैराहृणोत्येव बालिशः॥ २६४ पृ-माण्डूक्य।

अनेन किमायातम्? एतदेव लब्धं यत् सर्वा उपनिषदः खलु—वेदानां व्याख्यानग्रन्था इति। तत्र ग्रन्थकाराः स्वतः प्रवृत्ताः सन्तो दार्शनिकभावेन

ईश्वरविषये बहुगवेषणां कृतवन्तः, बहूनामवान्तरविषयाणामपि अवतारणां चक्रुरिति। बहुषु स्थलेषु च वयं न किमपि बुध्यामहे। तत्र तत्र—वैदिकगुरो रुपदेशः प्रयोजनीय इति। परन्तु बहुकालं यावत् वेदाना मध्या- पनाध्ययने विलुप्ते,तेन तादृशा गुरवोपि न विद्यन्ते। अथवा न केवलं वयमेव,स्वयं शङ्करादयोपि आचार्य्यपादा उपनिषदां मन्त्राणां कामपि प्रकृतां व्याख्यां कर्तुं न समर्था अभवन्। यथा—

लोकद्वारम् अपावार्णू-२३३, पश्येम त्वा वयं रा ३३३३,

१२३ हुं ३ आ-२३३ ज।३ यो ३ आ १२४५ इति। छान्दोग्य१५१ पृ।

तत्र शङ्करभाष्यम्—लोकद्वार मस्य पृथिवीलोकस्य प्राप्तये द्वारमपावृणु। हे अग्ने तेन द्वारेण पश्येम त्वा त्वां राज्याय इति।

परन्तु नेदं प्रकृतं व्याख्यान मिति। कथ मत्र एताः संख्या निर्वेशिताः?

२। ब्राह्मणम्।

वैदिकयुगे वैदिकप्रायभाषया विरचितं वेदानां द्वितीयव्याख्यापुस्तकं ब्राह्मण मिति।

ब्रह्मणो वेदस्य इदं ब्राह्मणम्।

अयं वा ग्रन्थो ब्राह्मण इति।

तत्र—उपनिषदः खलु ब्रह्मतत्त्वभूयिष्ठा, आंशिकभावेन तत्र वेदानां व्याख्यानमपि कृत मिति। पक्षान्तरे ब्राह्मणग्रन्थेषु बाहुल्येन यज्ञानुष्ठानप्रणाली विवृता, वेदानां व्याख्यान मपि तत्र अवतारितमिति। अतः आर्षं वचनम्—

"ब्राह्मणो वेदस्य व्याख्यानम्"।

अतएव ब्राह्मणानि वेदानां द्वितीयव्याख्यापुस्तकानीति वक्तुं युज्यते। तत् कथम् आपस्तम्बादयः सूत्रकारा अपि एवमवदन्—

"मन्त्रब्राह्मणयो र्वेदनामधेयम्"। तथाहि—"मन्त्रब्राह्मणात्मको वेदः" इति सायणादयः। तथाहि—मीमांसाभाष्ये शबरस्वामी—

अथ किंलक्षणं ब्राह्मणं? मन्त्राश्च ब्राह्मणश्च वेदः।

मैवं, तत् कथमापस्तम्बेनैव उक्तं—कर्म्मचोदना ब्राह्मणानि। कर्म्मसु चोदना प्रेरणा वेदे नास्ति, अतएव ब्राह्मणं खलु वेदातिरिक्तं मन्यते किमपि।

जैमिनिरपि कथयति—शेषे ब्राह्मणशब्दः। ३३—१पा—२अ। पर्य्यात्

यत् खलु वेदचतुष्टयादन्यत् किमपि, तदेव ब्राह्मणमिति। वस्तुतस्तु, यदा तु भारतवर्षे वेदाना मध्ययनाध्यापने विलुप्ते, वेदेषु किमस्ति, ब्राह्मणेषु च किं विद्यते, तत्र परिज्ञानं, सर्वमेव विस्मृतं, तदैव "मन्त्रब्राह्मणात्मको वेदः" एतन्मिथ्याभिधानं प्रचलित मभूदिति। वस्तुतस्तु ब्राह्मणः खलु वेदानां द्वितीय आर्षव्याख्याग्रन्थ इति। शबरेणापि कारिकेयमुद्धृता—

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु॥
एतद्वै सर्ववेदेषु नियतं विधिलक्षणम्॥१२८पृ. पूर्वमीमांसा

अत्र निर्वचन मेव निरुक्ति र्व्याख्यान मिति। वेदे व्याख्यानं नास्ति, ब्राह्मणग्रन्थे तदस्ति। यथा—"ता वा एता उज्जितयो व्याख्यायन्ते"।१२०पृ तैत्तिरीयब्राह्मणम् अतएव एतदेव वाक्यं वेदब्राह्मणयोर्वैषम्यं सूचयति। तथाहि—आपस्तम्बेन उक्तं

कर्मचोदना ब्राह्मणानि। २पृ। कर्म्मणां यज्ञानुष्ठानादीनां विधेरुपदेशः चोदना। यथा—

अवान्तरा इडामेव पूर्वं प्राश्नीयात्, होतृचमसं भक्षयेदिति। २५१ ऐत ब्रा

उदुम्बरेण स्रुवेण जुहोति। तै: ब्रा:।

अतएव ब्राह्मणं वेदो न, परन्तु वेदानां व्याख्यापुस्तकमेव। अथ केचिदेवं निर्दिशन्ति—

विधिरर्थवादोऽनुवादश्च ब्राह्मणम्।

तत्र विधि चोदना। इदं कुरु, इदं मा कुरु, इत्थं क्रियता मिति। अर्थवादस्तु ऐतिह्यविनिर्देशपूर्वकम् अर्थवचनं (पुराकल्पः), अनुवादस्तु पुनरुक्तिविशेषस्तदेव व्याख्यानमिति यावत। एतत् समर्थनाय केचित् दृष्टान्ताः प्रदर्श्यन्ते—

मूलम्……यज्ञेन यज्ञ मयजन्त देवाः, तानि धर्म्माणि प्रथमानि आसन्।
ते ह नाकं महिमानः सचन्त, यत्र पूर्वे साध्याः सन्ति देवाः॥
१६।८०।१०म। ५०—१६४-सू—१म

व्याख्या…यज्ञेन वै तद्देवा यज्ञमयजन्त, यत् अग्निना अग्निम् अयजन्त, ते स्वर्गलोक मायन्॥ छन्दांसि वै साध्या देवास्ते अग्रे अग्निना अग्नि मयजन्त। ७२।७४पृ ऐतरेय ब्राह्मणम्।

मूलम्……त्वामग्ने पुष्करादधि अथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघत: ॥ १३—१६सू—६म

व्याख्या……त्वामग्ने पुष्करादधीति तृच माग्नेयं गायत्रम् अन्वाहाग्नौ मथ्यमाने स्वया एव एनं तद्देवतया स्वेन छन्दसा समर्द्धयति । अथर्वा निरमन्थत [६७पृ) हस्ताभ्यां ह्येनं मन्थन्ति शिशुं जातमिति शिशुरिव वा एष प्रथमो जातो यदग्नि: ।६८ ऐतरेय ब्रा ।

ईले द्यावापृथिवी पूर्वचित्तये, इति सूक्तम् । ८८पृ—ऐत

मन्तव्यम्……सूक्तमेतत् ऋग्वेदस्य (१—११२—१म), परन्तु ऐतरेयेण एतस्य न कापि व्याख्या कृता । तथापि बोध्यं सूक्तमयं पुस्तकं वेद:, ब्राह्मणन्तु तदितरदिति ।

मूलम्……इलाया स्त्वा पदे वयं नाभा पृथिव्या अधि जातवेदो निधीमहि । अग्ने हव्याय वोढ़वे ॥४—२८सू—३म ।

व्याख्या……एतद्वा इलायास्पदं यदुत्तरवेदी नाभि रिति ।११८पृ—ऐ ब्रा ।

मूलम्……पिता यत् स्वां दुहितरमधिष्कन् क्ष्मया रेत: संजग्मानोनिषिञ्चत् । स्वाध्यो अजनयन् ब्रह्म देवा: वास्तोष्पतिं व्रतपां निरतक्षन् ॥७।६१।१०म

व्याख्या……प्रजापति: स्वां दुहितरम् अभ्यध्यायत्, दिवम् इत्यन्ये आहु:, उषस मित्यन्ये । २७५पृ । तं देवा अब्रुवन् अयं वै प्रजापति: अकृतम् अक: । इमं विध्य इति । २७६पृ—ऐत: ब्रा: । तथाहि—प्रजापति: स्वां दुहितरं अभिदध्यौ । दिवं वा उषसं वा । मिथुनी एनया स्यामिति । तां संबभूव । तत् वै देवाना माग आस । य इत्थं स्वां दुहितरम् अस्माकं स्वसारं करोतीति । ५१२पृ । शतपथम् । सोसाइटी संस्करणम् ।

मूलम्……नवनीतेन अभ्यञ्जन्ति इति—१७पृ,ऐत ब्रा ।

व्याख्या……आज्यं देवानां सुरभि घृतं, मनुष्याणाम् आयुतं पितृणां नवनीत मिति । तत्र सायण:—आज्यघृतयोर्भेद: पूर्वाचार्यै रुदाहृत:—

सर्पिर्विलीन माज्यं स्यात् घनीभूतं घृतं विदु: । १७पृ—ऐत ब्रा: ।

अनेन किमायातम् ! एतदेव सिद्धमभूत् यत् ब्राह्मणानि वेदा न,परन्तु तानि सर्वाणि वेदानां व्याख्यानानीति ।

३। अथ आरण्यकम्।

आरण्यकं किम्? अरण्ये विरचितं यत् ब्राह्मणं, तदेव आरण्यक मिति। वस्तुतस्तु उपनिषत्, आरण्यकं ब्राह्मणञ्च सर्वमेव वेदानां व्याख्यानं, सर्वमेव ब्राह्मणमिति। अतएव वृहदारण्यकोपनिषत्सु उपनिषत्त्वं, ब्राह्मणत्वमारण्यकत्वञ्च सर्वमेव लक्षणं लक्ष्यते।

मूलम्·····तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियोयो नः प्रचोदयात्। १०।६२।३म

व्याख्या······तत् सवितुर्वृणीमहे वयं देवस्य भोजनम् श्रेष्ठं सर्व्वधातमं। तुरं भगस्य धीमहि। ८८पृ, तैः आरण्यकम्।

मूलम्······कामस्तदग्रे समवर्त्तताधि मनसोरेतः प्रथमो यदासीत्।
सतो बन्धुमसति निरविन्दन्,हृदि प्रतीष्या कवयो मनीषा ॥४-१२८-१०म

व्याख्या······ आपो वै इदमासन्त्स॒ सलिल मेव, स प्रजापतिरेकः पुष्करपर्णे समभवत्। तस्य अन्तर्मनसि कामः समवर्त्तत, इदं सृजेय मिति। तस्मात् यत् पुरुषो मनसा अभिगच्छति, तद्वाचा वदति, तत् कर्म्मणा करोति। तदेषा अभ्यनूक्ता—कामस्तदग्रे समवर्त्तताधि। तैः आरण्यम् १२७ पृ।

४। अथ षड़ङ्गानि।

वेदानां तात्पर्य्यावबोधनाय ऋषिभिर्यानि षट् शास्त्राणि प्रणीतानि, तानि खलु षड़ङ्गानि इति। षड़ङ्गन्तु वेदानां चतुर्थव्याख्यापुस्तक मिति। उक्तञ्च—

शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषा मयनं चैव, षड़ङ्गोवेद उच्यते ॥
छन्दः पादौ च वेदस्य हस्तौ कल्पोऽथ कथ्यते।
ज्योतिषा मयनं नेत्रं निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति शिक्षा।
शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा।
छन्द श्चेति षड़ङ्गानि वेदानां वैदिका विदुः ॥ शब्दरत्नावली।

तत्र पाणिनीययाज्ञवल्क्यनारदीयप्रभृतयः शिक्षाग्रन्थाः। यत्र यज्ञानुष्ठान प्रणाली लिपिबद्धा, स एव कल्पः। तत्सर्वं सूत्राकारेण प्रणीत मिति।

श्रौतसूत्रं, गृह्यसूत्रं, मन्वादिधर्मशास्त्रं च तदनुगमिति। तत्र मानव कल्पसूत्रम्, आपस्तम्बादिकल्पसूत्रम् इत्येवमादीनि बहूनि कल्पसूत्राणि विद्यन्ते ।

व्याकरणं विना पदपदार्थानां ज्ञानं न भवति, अतएव तदपि वेदानां मुखस्वरूप मिति। पूर्वं तावत् देवनगरे इन्द्रचन्द्रशिवैरक्षराणि उद्भावितानि। तत स्तैरेव त्रीणि व्याकरणानि देवानां प्रार्थनया विरचितानि। यथा—ऐन्द्रं, चान्द्रं माहेशञ्च। अथ कालेन गालवस्फोटायनगार्ग्य शाकटायनापिशलिपाणिन्यादयः सर्वे आचार्य्याश्च व्याकरणं निर्ममुरिति। उक्तञ्च ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्। सारस्वतम् आपिशलं शाकलं पाणिनयकम्॥ इति श्रीतत्त्वनिधिः। तथाहि—

पालाशमपि माहेशं शैवं यावनिकं तथा।
पाणिन्याख्यञ्च कौमारं कात्यायन मुलौकिकम्॥

केचित् वदन्ति व्याकरणानि नव। तेन १म प्रमाण मुदाहरन्ति। अथ तन्मतं समर्थयन्ति च ते रामायणवचनात्।

सोऽयं नवव्याकरणार्थवेत्ता।

परन्तु यदा पाणिनिरपि स्वयं गालवगार्ग्यादीनां नाम निरदिशत्, तदा अदो रामायणवाक्यं निष्फलीभवति। वस्तुतस्तु बहवो वैयाकरणा अस्मिन् भारतखण्डे आसन्। तेषां मध्ये यो यस्य नामज्ञ आसीत् स तस्यैव नामोच्चारणं कृतवान्।

कौमारं व्याकरणं किं? का वा अस्य निवृत्तिः? बहवः शाब्दिका अस्य कौमार व्याकरणस्य नामनिर्द्देशं चक्रुरिति अनुमीयते कुमारेण कार्त्तिकेयेन प्रणीतं व्याकरण मिदं,पश्चात् विदुषा विप्रेण सर्ववर्माचार्य्येण संस्कृत्य संक्षिप्य वा तत. "कलाप" इति नाम्ना प्रख्यापित मिति। तस्यैव नामान्तरं कातन्त्रव्याकरण मिति

क हरिः शेते का च निकृष्टा, किं बहुलार्थं किं रमणीयम्।
वद कातन्त्रे कीदृक् सूत्रम्! शेषे सेवा वा पररूपम्॥

तत् कथं साम्प्रतं कुमारनाम विलोपं गतं? बहव आचार्य्या कलाप व्याकरणमेव कौमारनाम्ना निर्दिशन्ति। कलापो मयूरपुच्छं, तत्र···"सिद्धो वर्णसमाम्नायः" इति वाक्यं लिखित मासीत् इति किंवदन्ती। तथाहि—

कात्यायनः कुमारस्तु ज्ञात्वा विस्तर मब्रवीत्। गरुड़

कात्यायनवररुचिः कुमारव्याकरणं पठित्वा स्वकीये वार्त्तिके बहु तथ्यं प्रकटितवान्। एतेन शिववत् तत्पुत्रः कार्त्तिकेयोऽपि वैयाकरण आसीत् इति गम्यते। तथाहि—

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।

पाणिन्यमर जैनेन्द्रा जयन्त्याद्याष्ट शाब्दिकाः॥

एतेन गम्यते पाणिनेरनन्तरं पारशवामरसिंहो जैन हेमचन्द्रश्च वैयाकरणौ आस्तां, तयो र्व्याकरणे विलुप्ते, देशान्तरे प्रचलिते वा। हेमचन्द्रस्य प्राकृत व्याकरण मद्यापि विद्यते।

अथ वङ्गदेशे वैद्यः श्रीशोपतिदत्तशर्म्मा कलापस्य परिशिष्टं प्रणिनाय। वैद्येन सुषेणाचार्य्येण तस्य कविराजाख्यां टीकामपि प्रणिन्ये। अथ वैद्येन गैलाग्रामनिवासिना त्रिलोचनदासेन कलापपञ्जी प्रणीता। तथा वैद्येन पद्मनाभ दत्तशर्म्मणा सुपद्मं, वैद्यचक्रपाणिदत्तसूनुना क्रमदीश्वरेण संक्षिप्तसाराख्यं, वैद्यवोपदेवेन भागवतप्रणेता मुग्धबोधं रामव्याकरणञ्च तथा वैद्य भरतसेन मल्लिकेन द्रुतबोधं व्याख्यरणम् व्यरचीति। अथ लघुकौमुदी, प्रयोगरत्नमाला, रत्नमाला तथा इत्येवमादीनि बहूनि व्याकरणानि सन्ति।

अथ वेदार्थावबोधनाय ऋषिभिर्यानि प्रातिशाख्यानि प्रणीतानि तान्यपि वेदस्य व्याकरणविशेष एव। तेषु खलु व्युत्पत्तिनिर्देशपूर्वकं वैदिकशब्दानां व्याकरणं विवृत मिति।

छन्दस्तु गायत्र्यादिकं सर्वादौ साध्यदेवैरेव निर्म्मितं तत एव पद्यमया मन्त्रा जाता इति। तत्पूर्वं तु विश्वदेवनिविद्रूपाः मन्त्रा गद्येन विरचिता स्ते तु वृत्तगन्धिन इति। ततो लौकिकयुगे भगवता पिङ्गलनागेन वैदिकच्छन्दोग्रन्थं विरचितः ततो वृत्तरत्नाकरश्रुतबोधच्छन्दोमञ्जरीप्रभृतय श्छन्दोग्रन्थाः प्रणिन्यिरे। तत्र वैद्यगोपाल दास एव छन्दोमञ्जरीप्रणेता इति।

अथ वेदोदितज्योतिषविषयाणा मवबोधनाय प्राक्तनै र्ऋषिभिश्च ज्योतिष ग्रन्था विरचिता इति। उक्तञ्च—वेदाङ्गेषु—

वेदाहि यज्ञार्थं मभि प्रवृत्ताः, कालानुपूर्वा विहिताश्च यज्ञाः।

तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥

कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ।
ज्योतिषा मयनं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः ॥

अतएव गम्यते पूर्वं तावत् लगधनामा कश्चित् प्राचीन ऋषिरासीत्। स एव सर्वादौ ज्योतिश्शास्त्रं प्रणिनाय। अथ कालेन गच्छता भृगुनारदादयः प्राज्ञज्योतिर्विदो बहून् ज्योतिषग्रन्थान् प्रणिन्युः। अथ अपोगस्थान मध्यवर्त्तिनि रोमकपत्तने ब्राह्मणा यान् ज्योतिषग्रन्थान् विरचितवन्तस्ते ग्रन्था "रोमकसिद्धान्ताः" इति संज्ञया परिचिताः। अस्मादेव केचित् कम्बोज-क्षत्रिया इतालीजनपदं गत्वा ताइबरनदीतीरे द्वितीयरोमकपत्तनस्य प्रतिष्ठां चक्रुरिति। परं नव्याः साम्प्रतं परप्रत्ययनेयबुद्धय एवं मन्यन्ते यत् भारतीया ऋषयो ग्रीकजातेः सकाशात् ज्योतिषं गृहीतवन्तः। अहो ये भारतीया ज्योतिषग्रन्थाः रामायणमहाभारतादिभ्य एव प्राचीनतमाः उपनिषद्ब्राह्मणादिभ्योऽपि प्राचीनतमाः ते कथं त्रिसहस्रवर्षवयस्केभ्यो नितरामर्वाचीनेभ्यो ग्रीक-यवनेभ्यो ज्योतिषं जगृहुरिति। बालकास्तु रोमकसिद्धान्तनामदर्शनेन विचलिता भवन्ति। परन्तु यदि ज्योतिषं मूलतो ग्रीकयवनानामेव स्यात् तर्हि तस्य नामधेयं "ग्रीकसिद्धान्त"इति न भूत्वा कथं "रोमकसिद्धान्त" इति अभूत्? यस्तु तत्तु रोमकपत्तनं केतुमालवर्षमध्यगतं,तत्तु भारतसाम्राज्यान्तर्गतमासीत्। पूर्वं तावत् ते च सर्वे तुरुष्कपारस्यापोगस्थानवासिनो भारतसन्ताना एव आसन्। तत्रैव अस्मदीयो यजुर्वेदः पाणिनिव्याकरणमपि प्रणीतम् बभूव। यदि तत्रभवौ तौ ग्रन्थौ अस्माकं स्यातां, तर्हि अपोगस्थानस्थ—रोमकपत्तनप्रभवो रोमकसिद्धान्तो कथं रोमकाणां ग्रीकजातीयानां वा भवेत्? किं बहुना, अस्माकं महाप्राचीनं ज्योतिषशास्त्रं तु दूरे आस्तां, पञ्जिकाप्रणयनमपि ग्रीकजातेरुत्पत्तेर्बहु-प्रागेव समारब्धमभूदिति। केचित् वदन्ति खृष्टात् पूर्वं षट्सहस्रेभ्यो वर्षेभ्यः प्रागेव पञ्जिकारचना समारब्धा, वयं मन्यामहे, वैदिकयुगे एव लगधेन पञ्जिका उद्भाविता आसीदिति।

अथ वेदार्थावबोधनाय शाकपूणिस्थौलाष्ठीव्यौर्णनाभप्रभृतयो निरुक्तानि अरचयन्। परन्तु तेऽपि ग्रन्था विलोपं गता इति। तेषामवरजेन यास्केन ऋषिणा प्रणीतं यत् पुस्तकं विद्यते,तदेव निरुक्तनाम्ना प्रसिद्धमिति। यद्यपि तेषां ग्रन्थाः प्राचीनतमा स्तथापि तेषां व्याख्यासन्दर्शनेन अनुमीयते ते यत्

किमपि व्याख्यातवन्त स्तत् सर्वं भ्रष्टमेव। तत् कथं श्रीमता सायणेन उपोद्घात-प्रकरणे उक्तम्—

"तस्मात् वेदार्थाववोधनाय उपयुक्तं निरुक्तम्"।

सायणेन उक्तमेतदिति सत्यं, परन्तु परमार्थतः शाकपूणिप्रभृतीनां तथा यास्कस्य च वेदव्याख्यानानि न खलु मनागपि समीचीनानि इति। निघण्टुकोषः केन विरचितस्तन्न ज्ञायते, तदपि अभिधानं सर्वथैव असम्पूर्ण मिति।

५। पुराणानि—यद्यपि प्रचलितानि पुराणानि प्रक्षेपे विकृतानि अभवन्, तथापि प्राथमिकानि तानि वेदानां षष्ठी व्याख्या इति। सर्वेषु पुराणेषु मध्ये वायुविष्णुमत्स्यपुराणानि अतीव प्राचीनानीति। तानि वेदरामायणमहाभारत मुपजीव्य प्रणीतानि। अत उक्तं "पुराणं वेदसम्मितं" मिति। परन्तु बहुत्रैव ते पौराणिका वेदानां प्रकृतार्थ मबुद्ध्वा प्रमादं गताः। तेषामपि वयःक्रमः प्रायेण पञ्चसहस्रवर्षात्मक इति अनुमातुं शक्यते। तदनु लिङ्गमार्कण्डेयकूर्म्मादीनि पुराणानि रचितानि। तदनु भगवद्गीता, तदनु अग्निपुराणं, तदनु अन्यानि पुराणानि। भागवतपुराणं वैद्यश्रीवोपदेव गोस्वामिना प्रणीतं। ब्रह्मवैवर्त्त पुराण मपि केनचित् अर्वाचीनेन वङ्गदेशीय वैष्णवेन मुसलमानसमये प्रणीत मिति। तत्रैव तथा आधुनिकपद्मपुराणे च आकाशकुसुमराधाया नाम प्रथमं दृष्टमिति।

६। उवटभाष्यम्—ब्राह्मणग्रन्थादनन्तरं ये केचन आचार्य्या (न तु ऋषयः) वेदानां व्याख्यानं कृतवन्त स्तेषां मध्ये मुद्गलनामा कश्चित् प्राक्तनोमुनि रासीत्. तस्य भाष्यं सुदुर्लभ मिति। अथ तदवरजेन येन यजुर्वेदस्य व्याख्या पूर्वं कृता तस्य विदुषो नामधेयम् "उवट" इति। परन्तु तस्यापि भाष्यं समीचीनं न।

७। शङ्करभाष्यम्—उवटादनन्तरम् अन्ये ये भाष्यकारा वेदमन्त्राणां व्याख्यां कृतवन्त स्तेषु भगवान् शङ्कराचार्य्य एव गरीयान्। परन्तु तेन कस्यापि मूलवेदस्य व्याख्या न कृता, तेन तु वृहदारण्यकोपनिषदां वेदान्तदर्शनस्य भगवद्-गीतायाश्च व्याख्यानम् आचरितम्। अथ तस्य भगवतः शङ्करस्य मिथ्यैव शङ्करोपनामभिः छान्दोग्यकठमाण्डूक्यमुण्डककेनतैत्तिरीयश्वेताश्वतरप्रभृती-नामुपनिषदां व्याख्या कृता। तत्र तत्र ये ये वेदमन्त्राः सन्ति ते स्तेषामेव व्याख्यानं कृतमिति। अतएव शङ्करादीना मेषा व्याख्या सप्तमी व्याख्या इति।

८। हलायुधभाष्यम्—अथ वैद्यकुलधुरन्धरश्रीमल्लक्ष्मणसेनमहाराजस्य मन्त्रिश्रीमद्धलायुधेन विप्रेण तदीयब्राह्मणसर्व्वस्वग्रन्थे अवतारितानां वेदमन्त्राणां व्याख्या कृता। सा खलु वेदाना मष्टमी व्याख्या इति।

९। सायणभाष्यम्—अथ तदनन्तरं विजयनगरराजबुक्कस्य मन्त्रिश्रीमन्माधवाचार्य्यानुजं श्रीमत्सायणाचार्य्यो वेदचतुष्टयानामेव भाष्यं कृतवान्। यद्यपि वर्त्तमान-समयात् प्रायेण सार्द्धपञ्चशतवर्षेभ्यः प्रागेव मुसलमानाधिकारकाले सायणेन व्याख्यातं, तथापि तस्यैव भाष्यं सर्व्वेषामेव भाष्येभ्यो ब्राह्मणभाष्य गरीय इति वक्तुं शक्यते। बहवः सायणशिष्या अपि तस्य सहायतां कृतवन्त इति सायणव्याख्यासु बहु वैषम्यं संलक्ष्यते।

१०। महीधरभाष्यम्—वेदानां दशमी व्याख्या महीधरभाष्यम्। स तु उवटसायणभाष्येभ्यो विकलमविकलञ्च वस्तु समाहृत्य स्वनाम्ना किमपि भाष्यं प्रख्यापित मकरोत्।

११। पाश्चात्यव्याख्या—अथ इरियूरोपीयावासिनः पण्डिता रोथ-बोथलिङ्ग लासेनमोक्षमूलारोइलसनग्रास्‌म्यान-लाडुइक-प्रभृतयस्तु जर्म्मनफरासीङ्राजी भाषया वेदानां यां व्याख्यां कृता, सा खलु वेदानाम् एकादशी व्याख्या। यद्यपि ते दुरूहशब्दभूयिष्ठवेदानां व्याख्याविधौ बहुषु स्थलेषु अकृतार्था अभवन्, तथापि तेषा मतीव अध्यवसायोऽस्मान् मुग्धीकरोतीति वक्तुं युज्यते। धन्याः खलु ते जगति वरेण्याः।

१२। वन्द्योपाध्यायव्याख्या—अथ मनीषिणा श्रीमत्कृष्णमोहनवन्द्योपाध्यायेन खृष्टेन ऋग्वेदस्य प्रथमद्वितीयाध्याययोरिङ्‌लण्डीय-भाषया काचित् व्याख्या कृता। सैव व्याख्या वेदानां द्वादशी व्याख्या इति।—

१३। वेदार्थयत्नव्याख्या—मुम्बयीनगरे केचित् विद्वांस ऋग्वेदस्य, यां व्याख्यां कृतवन्तः, सैव वेदार्थयत्न इति नाम्ना प्रसिद्धा। तैः खलु ऋग्वेदस्य प्रथम मण्डलस्य व्याख्या कृता। अतएव सा वेदस्य त्रयोदशी व्याख्या।

१४। रमानाथघोषसरस्वतीव्याख्या—अयन्तु महाभागो मदवरजवयाः, स ढाकानगर्य्यां राजकीयविद्यामन्दिरस्य (Dacca college) संस्कृताध्यापक आसीत्। तेन संस्कृतभाषया ऋग्वेदस्य प्रथमाष्टकस्य चतुर्थाध्यायपर्य्यन्त

व्याख्यातं वङ्गभाषया अनूदितञ्च, अतएव एषा व्याख्या वेदस्य चतुर्दशी व्याख्या इति वक्तुं शक्यते।

१५। ✓रमेशचन्द्रदत्तानुवादः.........अथ—अस्माकं समसामयिकः सिभिल सार्भिसकार्य्यकारकः श्रीमद्रमेशचन्द्रदत्तो विदुष आलोकनाथन्यायभूषण भट्टाचार्य्यस्य साहाय्येन ऋग्वेदस्य वङ्गानुवादं कृतवान्। अतएव सोऽनुवादः खलु वेदस्य पञ्चदशी व्याख्या इति।

१६। ✓दयानन्दभाष्यम्—अनन्तरं रमेशचन्द्रस्य अस्माकञ्च समसामयिकेन आर्य्यसमाजप्रतिष्ठापयित्रा अशेषज्ञानराशिना वेदाचार्य्येण श्रीमद्दयानन्दसरस्वतीमहोदयेण ऋग्वेदस्य सार्द्धषण्मण्डलस्य भाष्यं कृतं। अतएव सा खलु वेदानां षोड़शी व्याख्या इति। महीधरादनन्तरं भट्टभास्करेण तैत्तिरीयसंहिताया भाष्यं प्रणीतम्, अस्माकं समसामयिकेन पूजनीयेन वेदाचार्य्येण श्रीमता सत्यव्रतसामश्रमिणा यजुर्वेदस्य सामवेदस्य च अनुवादः सम्पादितः, तद्भ्राता श्रीमता ब्रह्मव्रतसामाध्यायिना च पुरुषसूक्तस्य अनुवादः कृतः अतस्तेऽपि स्वर्गता धन्यवादार्हा इति।

१७। प्रकृतार्थवाहिनी.........तदनन्तरं मया साम्प्रतं ऋग्वेदस्य प्रकृतार्थवाहिनीतिनाम काचित् व्याख्या अनुवादश्च वङ्गभाषया प्रणीयते। अतएव एषा खलु वेदस्य सप्तदशी—व्याख्या इति ज्ञेयम्। कथं शारदीये पूर्णचन्द्रे समुदिते व्याख्याकदम्बके सत्यपि एतस्य मे ज्योतिरिङ्गणस्य पुनर्विस्फारोऽयं चाञ्चल्यं वा? सत्यमेतत्, परन्तु न केनापि पूर्वाचार्य्येण आधुनिकेन वा विदुषा वेदानां प्रकृतार्थो व्यक्तीकृता, अतएव तत्प्रकटनाय प्रयत्नोऽयमाश्रितोऽस्माभिरिति।

व्याख्यासमालोचना।

ब्राह्मणप्रणेतृभिऋ षिभिः शाकपूणियास्कप्रभृतिभिरुवटशङ्करदयानन्दादिभिश्च या व्याख्या न सम्यक् सम्पादिता, सा मादृशैरिदानीन्तनैः सर्वज्ञान शून्यैः सुष्ठु सम्पादनीया इति को विश्वसिष्यति, केन वा एषां श्रद्धा प्रदर्श्येत? सत्यमेतत्, परन्तु यदा वयं प्रत्यक्षीकुर्म्मः यदेतेषां केषामपि व्याख्या भाष्यादिकं समीचीनं नाभूत् तदा तूष्णीमपि स्थातुं न शक्यते बलवती ईच्छा मां नोदयति इति। कथं तेषां व्याख्या न समीचीना अभवत्?

पूर्वं तावत् अभिधानाभावः, यद्यपि एष निघण्टुकोषो विद्यते, तथापि स तु नारदस्य ठेकीवत् अतीव असम्पूर्णः प्रमादभूयिष्ठश्च । यदा द्यौः किं, द्यावापृथिवी किं, अन्तरीक्षं किं, रोचना किं, व्योम किं, स्वः किं, यज्ञः किं, नाभिः किम्, एतत् सर्वं पूर्वेषां स्मृतिपथात् विच्युतं, तदैव तादृशेन केनापि भ्रान्तेन निघण्टुर्विरचितः । तेन तेन स्वकोषे उक्तम्—

स्वः, पृश्निः, नाकः, गौः विष्टप्, नभः, इति षट् साधारणानीति । २५ पृ

परन्तु नितरां भ्रान्तिरेषा निघण्टुकारस्य खलु । वस्तुतस्तु स्वः, नाकः, गौः, व्योम, पुष्करम्, यज्ञः, (अध्वरं) द्यौः (द्यो+सु), आकाशं, इला इलावृतम्—(Elysium Elysion) एतत् सर्वम् आदिस्वर्गावबोधक मिति । एतदेव सर्वं मस्माकं पूर्वपितामहानामादिपितृभूमित्वात् पिता इति संज्ञया प्रख्यापित मिति । एषा इला अस्माक मुत्पत्तिस्थानं, अतएव सा "नाभि"रिति शब्देन संसूचिता ।

पृश्निस्तु कर्बुरवर्णा गौ रिति तदानीन्तनाना मभिमतं, परन्तु सा एव तुरुष्कपारस्यापोगस्थान मिति । तस्याः पृश्न्या एव नामान्तरम् अन्तरीक्षं तत्तु क्वचित् मरुमयं, क्वचित् जलमयं, क्वचिद्वा स्थलमयं, तेन हेतुना कवय एतत् "पृश्नि"रिति शब्देन संसूचित मकुर्वन् । केवलं सायणस्य एक एव शिष्यः पृश्निरन्तरीक्ष मिति तु स्वभाष्ये (१।६६ सू—६म) उक्तवान्, परन्तु सायणः सायणस्य अन्ये वा शिष्यास्तन्न जगृहुः । तेन न कोऽपि पृश्निशब्दस्य प्रकृतव्याख्यां कर्त्तु मलमिति । निघण्टुकारोपि स्वःपृश्निनाका दीनां किमपि पार्थक्यं न बुबुधे,अतस्तेन स्वयुवमघवतामेकत्र बन्धनं कृतम् ।

द्यावापृथिवी, रोदसी, पृथिवी, द्यौश्च, एतेषां शब्दानां कोऽर्थः, तदपि निघण्टुकारेण न बुद्धमत स्तदनुगा भाष्यकारा नैरुक्ता अपि प्रमादं गताः । सप्तऋषयः मरीच्यादयः सप्त प्रजापतयः, परन्तु निघण्टुकारेण—

सप्तऋषयः, साध्याश्च इति पदद्वितयं रश्मिप्रकरणे धृतं । तदनुगास्ते यास्कदुर्गाचार्य्यदेवराजयज्वादयश्च प्रमादं गताः । तत्र प्रमाणम्—

सप्त ऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सद मप्रमादम् । सप्तापः स्वपतो लोक मीयुः । तत्र जाग्रतो अस्वप्नजौ सत्रसदौ च देवौ ॥

यजुर्वेदस्य ५५ क—२४श

तत्र यास्कनिरुक्तिः......सप्तऋषयः प्रतिहिताः शरीरे रश्मय आदित्ये । सप्त रक्षन्ति सदम् अप्रमादं संवत्सरम् अप्रमाद्यन्तः । सप्त आपनास्त एव स्वपतो लोक मस्तमित मादित्यं यन्ति तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ वाय्वादित्यौ इत्यधिदैवतम् ।

अथ अध्यात्मम्—सप्तऋषयः प्रतिहिताः शरीरे षड् इन्द्रियाणि विद्यासप्तमी आत्मनि सप्त रक्षन्ति सद मप्रमादं शरीरम् अप्रमाद्यन्ति । सप्त आपनानि इमानि एव स्वपतो लोकम् अस्तमित मात्मानं यन्ति तत्र जागृतो अस्वप्नजौ सत्रसदौ च देवौ प्राज्ञश्च आत्मा तैजसश्च आत्मगति माचष्टे तेषा मेषा अपरा भवति ।

२८७पृ—२य खण्ड ।

तत्र दुर्गाचार्यः........हिरण्यगर्भमार्षम् आथर्वणं आत्मस्तुतौ विनियोगः ; उत्तरा च । शृणाति सर्वमिति शरीर मादित्यः । आश्रयणाद्वा सर्वमिद मस्मिन् आश्रितमिति । तस्मिन् सप्तऋषयः रश्मयः प्रतिहिताः प्रत्येकं हिता निहिताः । ते पुनः सप्तैव अन्यूनाधिकाः सन्तः सार्वदिक्यसुदक मुपनयन्तः तेन इद्धा स्तमादित्यं सदं सदैव अप्रमादम् अप्रमाद्यन्तः अनुत्सर्गेण स्वस्य कर्मणः रक्षन्ति निरिन्धनः पार्थिवोपि ह्यग्निरिन्धनक्षयात् निर्वाप्येत त एव च सप्त सप्ताः आपनाः सर्वस्य लोकस्य व्यापनाः स्वपतः अस्तम् उपगच्छतः अस्य आदित्यस्यैव तं लोकम् आत्मानं गच्छति वाद्यं मण्डलं प्रविशन्ति । तेषु अनु प्रविष्टेषु तत्र सुप्तेषु उपरतप्रकाशवृत्तिषु तत्र अन्तर्गतौ जागृतः तन्मण्डलान्तरपुरुषः तदधिष्ठाता योऽसौ हिरण्यश्मश्रुः हिरण्यकेश इति विज्ञायते वायुश्च इत्यधिदैवतम् ।

अथ अध्यात्मम्........मण्डलवत् अस्मच्छरीरे रश्मिवत् इन्द्रियाणि प्रतिहितानि निहितानि तच्छरीरं नित्यं रूपाद्यालोकनाद्युपकारेण रक्षन्ति अप्रमाद्यन्ति सप्त आपनानि व्यापनानि विषयाणां शरीरस्य वा तान्येव स्वपतः अस्य जीवस्य सुखदुःखभोक्तुः लोकं शरीरमेव प्रत्यस्तमित मीयुः बुद्धिद्वारेण भोक्तरि एव भावनानुरूपेण लीयते । तद्भावनोपपादकः स्वप्नभोक्तुः स्वप्नो भवति । तत्र जागृतः शरीरपरिपालनार्थं प्राज्ञश्च आत्मा परमात्मा चिन्मात्रेण यः शरीरं व्याप्य वर्त्तते तैजसश्च प्राणः अन्नं पानं पचनव्यूहश्च रसान्तभूतं तेजो वायु वृत्तिः । तेषा मेषा अपरा भवति सा पुनः किमर्थं रश्मय एव इति स्फुटतायै ।

अहो कीदृक् तथा वाग्जालडम्बरा इयं यास्कव्याख्या दुर्गाचार्यव्याख्या च। यः खलु स्वयं न बुध्यते, स कथमन्यान् बोधयितुं समर्थः स्यात्? एत न्निर्वचनस्य दुर्गाचार्यटीकायाश्च पदार्थग्रहः सर्वथैव सुदूरपराहत इति। यास्केन अस्य मन्त्रस्य द्विविधं व्याख्यानं कृतम्—अधिदैवतम् अध्यात्मञ्च। कथमेतत्? किं मेते वेदमन्त्रा द्व्यथाख्यार्था इति? किमेष मन्त्रः देवताविषयकः आत्मविषयकश्च? नैवं। वस्तुतस्तु मन्त्रोऽयं केवल मैतिह्यघटित इति। तत् बौद्धभयग्रस्तो यास्को मूढ़ानस्मद्विधान् व्यामोहयितुं यत् किमपि व्याचख्यौ। कतमस्मिन् काव्यनाटके वा इत्थ मस्ति यत्—"सप्त ऋषयः—रश्मयः" इति? कथं निघण्टुकारेण सदेव निरदिशत् यत् "किरणा" रश्मयः सप्तऋषयः साध्याः इति पञ्चदश रश्मिनामानि। २५ष्ट निघण्टु। निघण्टुकारोऽपि अबुद्धेव इत्थं चकार। सप्तऋषयः किरणाः किमस्य प्रमाणं निगमो वा? कः शिष्ट एवं प्रयोगं कृतवान्? निघण्टोः टीकाकारस्तु देवराजयज्वा तत् प्रादर्शयत्—

देवराजयज्वा········सप्त सृप्ता संख्या (निरुक्त ४।२६) इत्युक्तेः सृपेर्गत्यर्थात् सप्यशूभ्यां तुट्च (उ १, १५५) इति सपेर्विधीयमानः कनिन् प्रत्ययः तुड़ागमश्च बाहुलकात् भवति ऋकारस्य आकारश्च। षड्भ्यः सकाशात् सृप्ता संख्या सप्त। ऋषगतौ (तु प) अनेकार्थत्वात् धातूनां दर्शनार्थः। इगुपधात् (उ ४, ११६) इति इन् प्रत्ययः। ऋषयो द्रष्टारः। सप्तसंख्याकाश्च ते ऋषयः द्रष्टारश्च लोकस्य इति सप्तऋषयः।

एतेन चातुष्पाठिककाष्ठकल्पनाप्रसूतेन मिथ्या व्याख्यानेन किं सिद्धं? सप्तऋषयः सप्त द्रष्टारः एवं भवतु, तेन सप्तऋषयः सूर्यरश्मयः तत् कस्मात् समायाति सिद्धं भवति वा? अथ देवराजः स्वमतसमर्थनाय इमं निगमं उपस्थापयति—

सप्त युञ्जन्ति रथ मेकचक्रम् (ऋक् सं—२।३।१४।२)।

इत्यत्र सप्त आदित्यरश्मयः (४,२६) इति वदन्ति नैरुक्ताः। यद्वा षप समवाये (भू प) सप्यशूभ्यां तुट च। (उ, १ १५५) इति कनिन् प्रत्यय स्तुड़ागमश्च समवेताः सप्त, ऋषिरपि गत्यर्थ एव प्रत्ययः। समवेताः गच्छन्ति दिक्षु स्वाभि रश्मयः। यथा सप्तऋषीन् पर एक माहुः (ऋक्—८।३।१७।२)

सप्त ऋषयः प्रतिहिताः शरीरे। यजुः—३४—५५। अत्रासत ऋषय सप्त साकं (अथर्व—१०—२६—८) इति निगमः।

अहो अतीव विस्मयकरी एषा देवराजयज्वनोविचेष्टा। के नेकशा इति अवदन् यत् "सप्त युञ्जन्ति रथमेक चक्र"—मेतस्य मन्त्रांशस्य किमयमेव अर्थो यत् सप्त ऋषयः—सप्त आदित्यरश्मय इति ? मन्त्रस्तु खलु—

सप्त युञ्जन्ति रथमेक चक्रम् एकोअश्वो वहति सप्तनामा।

त्रिनाभि चक्र मजर मनर्वं यत्र इमा विश्वा भुवना अधितस्थुः॥

२—१६४ सू—१म।

अस्मिन् मन्त्रे एवं किमस्ति यत् "सप्त ऋषयः" इति पदेन सप्त सूर्य्यरश्मयः अवबोधिता इति। अहो नितरामेव "गोजामिलन" मेतत् देवराजयज्वनः। अथ—तेन ऋग्वेदस्य यदपरौ द्वौ मन्त्रौ उपस्थापितौ, ताभ्यामपि एतत् न सिद्धं भवति यत् "सप्तऋषयः" पद मेतत् मरीच्यादीन् सप्तर्षीन् विना सूर्य्यरश्मीन् अवबोधयतीति। तौ च द्वौ मन्त्रौ इमौ—

विश्वकर्म्मा विमना आद् विहायाः धाता विधाता परमोत संदृक्।

तेषा मिष्टानि समिषा मदन्ति यत्र सप्तऋषीन् पर एक माहुः॥२।८२।१०म।

तिर्य्यग्-विलश्चमस ऊर्द्ध्वबुध्न स्तस्मिन् यशो निहितं विश्वरूपम्।

तदासत ऋषयः सप्त साकं ये अस्य गोपा महतोबभूवुः॥७।९ सू,२ख अथर्व।

उद्धृतेन मन्त्रद्वयेन एवं न अवबोध्यते यत् सप्तऋषयः सूर्य्यरश्मयः,परन्तु एते सप्तऋषयः खलु मरीच्यादयः सप्त प्रजापतय इति। द्वितीये मन्त्रे स्थितम्"ऋषयः, सप्त" एतत् वाक्य मपि इदमेव बोधयति यत् स्वर्गे देवानां कश्चित् चमस आसीत् तस्य पार्श्वदेशे जल निर्गमविलम्। ऊर्द्ध्वदेशे बुध्नो मूलं जलपातन स्थानं। तं चमसं निर्म्माय—ऋषयः प्रभूतं यश आपुः। सप्त ऋषय स्तस्य महत-श्चमसस्य गोपा रक्षकाः। कथं ? यतो दैत्यदानवास्तं चमसं येन न विनाशयितुं समर्था भवन्ति।

वस्तुतस्तु ये "सप्तऋषयः" सावधानाः सप्तसदमरक्षन्, चमसस्यापि गोपा आसन्, ते "सूर्यरश्मय" इति न। अतएव एतं निगमे रमासक्तिके दैवराजस्य विदुषो न किमपि सिद्धमभूत्।

अथ शरीरं सूर्यः, इति च न कोऽपि मानवो वक्तुमुत्सहेत निर्लज्जादन्य इति। प्रतिहिताः प्रत्येकं हिता इति च न। सप्तसदं संवत्सरम् इति च न सप्तापः सप्त आपनाः सप्तव्यापना इति च न। "आपनाः" "व्यापना" एते किंजन्तवः? अस्वप्नजौ सत्रसदौ देवौ वाय्वादित्यौ इति च न। तथा सप्तऋषयः षट् इन्द्रियाणि विद्या सप्तमी इति च व्याख्यान मतीव हास्यजनकम्। एवं उवटमहीधरौ च यास्कनिरुक्तेरनु-गमनं कृत्वा बहु नाट्यमनाटयतां, तत् सर्वं बाहुल्यभयात् परित्यक्त मिति। वस्तुतस्तु सप्त ऋषयः, मरीच्यादयः सप्त ऋषयः, स्वर्गे तेषां सप्त सदः सदनं सदनानि आसन्, दैत्यदानवा खेत् तानि भस्मीकुर्वन्ति, तद्भयात् ते सततं सावधाना स्तानि अरक्षन्। स्वर्गे सप्तर्षीणां सप्त गृहा आसन्, इत्यत्र किं प्रमाणम्?

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे।

पृथिव्याः सप्त धामभिः॥ १६-२२सू-१म

विष्णु रिन्द्रानुजः सप्तधामभिरुपलक्षिताया यतः पृथिव्या उत्तमपृथिव्या आदिस्वर्गात् इलावृतवर्षात् विचक्रमे त्रिपादविक्रमणपूर्वकं भारत माजगाम देवा इन्द्रादयः सर्वं अतः अस्मात् तस्मात् स्वर्गात् नः अस्मान् अवन्तु रक्षन्तु।

बुद्धं, परन्तु स्वर्गे तेषां कस्मात् भयकारण मासीत्? दैत्यदानवेभ्य इति। न केवलं ते सप्तर्षय एव स्वस्वगृहरक्षणाय अप्रमादा अभूवन्, एवं ते पानीयजलधनभाण्डारादीनामपि रक्षणाय सतत मवहिता आसन्। उक्तञ्च अथर्ववेदेषु—

यस्य त्रयस्त्रिंशद् देवा निधिं रक्षन्ति सर्वदा।

निधिं तमद्य को वेद यं देवा अभिरक्षथ॥ ७७२सू-१०म का:

अतएव अनुमीयते प्रतीयते च यत् बहवो देवा गृहचमसवत् धनसंरक्षणेऽपि नियुक्ता बभूवुः। तथाहि—

व्रजं कृणुध्वं स हि वो नृपाणो, वर्म सीव्यध्वं बहुला पृथूनि।

पुरः कृणुध्वमायसीरधृष्टा मा वः सुस्रोत् चमसो दृंहता तम्॥ ८-१०१सू-१०म

हे योद्धृगणाः यूयं गोष्ठं विरचयत, यत्र पानीयं जलं रचितं स्यात्। वर्म्मसीवनं कुरुत, तानि वर्म्माणि बहुसंख्यकानि स्थूलानि च भवेयुः। भवनानि च एवं विरचयत, यत् तानि लौहमयानि अतएव अधृष्याणि च भवेयुः। तथा युष्माकं जलपात्रञ्च एवं भवतु, यथा तस्मात् पानीयं न प्रस्रुतं स्यात्, तत्पात्रञ्च दृढ़ं भवेत्। तथाहि—

अस्माक मत्र पितर स्ते आसन् सप्तऋषयः।८।४२।४म।

देवा एतस्यामवदन्त पूर्वे सप्तऋषयस्तपसे ये निषेदुः।४।१०८।१०म।

अतएव एते सप्तऋषयः खलु मरीच्यादयः सप्तपितरः, नतु सूर्य्य-रश्मय इति। सप्त सदः सप्त भवनानि; सप्त आपः "आपना व्यापना जर्फरीतुर्फरी" वा न, परन्तु ते सप्त मरुतइति, यदा सर्वे देवा निद्रासुख मनुबभूवुस्तदा सप्त आपः आपः अन्तरीक्षं लक्षणया सप्त अन्तरीक्षवासिनः सप्त अपोगस्थानवासिनः (सात आफगान इति भाषा) प्रहरिणो बभूवुः। सत्रसदौ देवौ च इन्द्राविष्णू इति।

प्रकृतार्थवाहिनी……सप्तऋषयः मरीच्यादयः सप्तपितरः स्वर्गं अप्रमादं साव-धानं यथा स्यात् तथा शरीरे प्रतिष्ठिता देहे अवस्थिताः अनलसाः सन्तः सप्तसदं सप्तसदनानि सप्त गृहान् दैत्यदानवभयादिति शेषः रक्षन्ति अरक्षन्। अथ सप्त सप्तसंख्यका आपः अन्तरीक्षवासिनः अपोगस्थानवासिनः सप्त आफगानसेनाः स्वपतः निद्रां गच्छतो निद्रितान् लोकं लोकान् ईयुः आपुः, यदा सर्वे निद्रिताः सुप्तस्तदा ते प्रहरिकार्य्यं चक्रुरिति। न केवलमेतत् एतेनापि इन्द्रादीनां मनांसि आशङ्कारहितानि न अभवन्, सत्रसदौ सत्रमेव सदो गृहं (Shed) ययोस्तौ सततं यज्ञानुष्ठानपरायणौ शतक्रतुयज्ञपुरुषौ इन्द्राविष्णू अपि जागृतः जागरूकौ भवतः अभूता मिति *।

* अथ सत्यव्रतसामश्रमिणा पूज्यपादेन अस्य मन्त्रस्य एव मनुवादः कृतः।

सप्तर्षिर स्तुति—शरीरे सप्तऋषि प्रतिष्ठित रहियाछेन। ताँहारा सदा सर्वक्षण प्रमादशून्य हइया रक्षा करितेछेन। किन्तु जीवेर सुषुप्तिकाले ताँहाराओ लोक (२) प्राप्त हयेन। तादृश समय कोन सदास्थायी सत्यस्वरूप देवद्वयमात्र जाग्रत थाकेन १।

१। एस्थले महीधर बलेन त्वक्, चक्षुः, श्रवण, रसना, घ्राण, मन ओ बुद्धि। २। कोन् लोक? ताहा स्पष्ट नाइ। एइ लोक शब्दे कि बुझिते हइबे, ताहाओ टीकाकार कोनओ भाष्य व्याख्या करेन नाइ। यजुर्वेदानुवाद।

स्थलान्तरे अस्ति—स्वरादित्योभवति, पृश्निरादित्यो भवति, नाक आदित्यो भवति, गौरादित्यो भवति, विष्टप् आदित्योभवति । ५८२पृ-प्रथम ख निरुक्त ।

तत्र यास्कः······स्वरादित्यो भवति—सु अरणः, सु ईरणः स्वृतो रसान् स्वृतोभासं ज्योतिषां स्वृतो भासेति वैतेन द्यौः व्याख्याता ।

व्याख्येयं न खलु समीचीना सरला वा । कथं यास्केन इत्थं वृथा वाग्-जालविस्तारः कृतः ? पौराणिकाणामानुगत्यात् यास्कादयो वेदार्थं न बुबुधिरे, ते न तैः केवलं वृथा जल्पितम् । वस्तुतस्तु "स्वरादित्यो भवति" इत्यस्याः श्रुते रयमेव प्रकृतार्थः—आदित्यः अदितिनिन्दनः सूर्य्यः (न तु भास्करः) स स्वः आदिस्वर्गस्य शास्ता आसीत्, तेन उक्तं स्वरादित्योभवति । स्वरादिस्वर्गो द्यौ रिति, तस्य आदित्यस्य अदितिनन्दनस्य स्वः स्वर्गो भवति इत्यर्थः । न तु द्यौरादित्यो न वा स्व रादित्य इति ।

पृश्निः आदित्यो भवति········प्राश्नुत एनं वर्ण इति नैरुक्ताः । संस्पृष्टा रसान् संस्पृष्टा भासं ज्योतिषां संस्पृष्टो भासेति वा अथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च । ५८२ पृ

एषापि निरुक्ति रत्याविला इति । द्वे पृश्नी आस्ताम् । प्रथमा पृश्निरन्तरीक्षं भुवर्लोकः, द्वितीया पृश्निः द्यौः (स्वः), केचित् प्रमादात् आदिस्वर्गं द्यामपि दिव्यं नभः, दिव्या पृश्नि रिति अमन्यन्त । तेन इयं क्लिष्टा श्रुतिर्विरचिता—"पृश्नि-रादित्यो भवति । अदितिनन्दन आदित्यः सूर्य्यो द्योः दिव्यपृश्नेरपि शास्ता आसीत् (देवानां परमं जनित्रं यत् सूर्य्य इति श्रुतेः) तेन उक्तं "पृश्निरादित्यो भवति", अर्थात् आदित्यस्य पृश्निः स्यात् । परन्तु, यास्कः खलु पृश्निं गगनं,द्याश्च गगनं मत्वा एतत् सर्वं वृथा व्याख्यानं कृतवान् । विष्टप् दिव्, त्रिदिवस्य एकदेशः तपोलोको वा, अदितिनन्दनः सूर्य्यः तस्यापि शास्ता आसीत् । तेन उक्तं विष्टप आदित्य इति । अतएव यास्कव्याख्याजालं प्रमाददुष्ट मिति । तथाच्च—वृत्रो मेघ इति नैरुक्ताः, त्वाष्ट्रः असुरः इति ऐतिहासिकाः । ५८८ पृ-प्रथम ख ।

कथं निरुक्तकारा वृत्रं मेघमवदन्, तन्न वयम् जानीमहे । यस्य हन्ता-

---

सामश्रमी महाशयस्तु महीधरदुर्गाचार्य्ययोः कर्म्मे एव दोषारोपणं कृतवान् न पुनर्यास्कस्य । वस्तुतस्तु सोपि यास्कदुर्गाचार्य्यमहीधरव्याख्यासु न दृष्टिमाप, वयमपि एतेषां कस्यापि भाष्यानुवादेषु न प्रीति माप्निम इति

सुरस्य कनीयान् वलासुरः, यस्य माता इन्द्रात् पुत्रस्य प्राणरक्षार्थं वृत्रस्य शरीरोपरि शयिता अभवत्, यस्य वधे इन्द्रस्य ब्रह्महत्या-पापं बभूव, सः खलु मर्त्यदेव आसीत्, तमेव कथं वेदज्ञा निराकारा जड़पदार्थं स्थिरीकृतवन्तः, तत् तएव जानन्ति। कश्चित्तु इत्थमपि व्याख्यातवन्तो यत् पर्वतोऽपि पाषाणमयो मेघः, इत्थं व्याख्या अतीव प्रमाददुष्टा इति। वस्तुतस्तु, वृत्रः खलु तुष्टुरपत्य मिति। वृत्रो मेघः, पर्वतो मेघो, वराहो मेघ, एतत् सर्वं बालविचेष्टाविशेष इति। तथाहि—

पञ्चजना मम होत्रं जुषध्वम्। ६५०पृ ।१मस्त

तत्र यास्कः······गन्धर्वाः पितरो देवा असुरा रक्षांसि इत्येके। चत्वारो वर्णा निषादः पञ्चमः, इति औपमन्यवः।

व्याख्येयं च नितरां प्रमादबहुलेति। गन्धर्वाः, पितर, (पितृलोकवासिनो वैवस्वतमन्वादयः) देवाश्च परस्परं बन्धुभावापन्नाः। तैः सह असुराणां रक्षसां वा समवायः कुत्र? किं देवमनुष्या असुराणां रक्षसां च उपासका आसन्? यदा सर्वे आगन्तुका पञ्चनदभूमौ कृतनिवासास्तदा चातुर्वर्ण्यं निषादो वा कुत्र? किं देवमनुष्या शूद्राणां निषादाना मपि पूजका आसन्? वस्तुतस्तु, पितृलोकात् ये सप्तविप्राः भारतमागताः पञ्चनदप्रदेशे उपनिविविशुः, तेषां मध्ये वायुवरुणौ काले पारस्यापोगस्थानं गतौ, ये शिष्टा आसन् तएव अत्र "पञ्चजनाः", तेषां वासभूमय एव पञ्चक्षितयः पञ्चनदप्रदेशा इति। तान् पूर्वपुरुषान् उद्दिश्य अयं मन्त्रो विरचित इति। तथाहि—

तिस्र एव देवता इति नैरुक्ताः अग्निः पृथिवीस्थानो, वायुर्वेन्द्रो वा अन्तरिक्षस्थानः सूर्यो द्युस्थानः। २८ पृ-२य खण्ड निरुक्तं।

अनेन यास्कस्तु, खलु अन्यासां देवतानामस्तित्व मस्वीकरोति। न केवल मेतदेव, स पुनरग्निं वह्निरिति, वायुं प्रभञ्जन इति, इन्द्रं कल्पित वर्षणदेवता इति, अन्तरीक्षं गगन मिति, सूर्यो भास्कर इति दिवं गगन मिति अमन्यत। स देवाना मस्तित्वेऽपि नितरां सन्देह मनाटयत्। यथा—

अथ आकारचिन्तनं देवतानां पुरुषविधाः स्यु रित्येके चेतनावत् हि स्तुतयो भवन्ति तथाभिधानानि। अथापि पौरुषविधिकैरङ्गैः संस्तूयन्ते।
२६ पृ-२य खण्ड।

तत्र दुर्गाचार्य्यः.........देवास्तत एव उभयभावित्वात् किमाकारवत्त्वं स्वभावो देवतायाः, अथवा निराकारवत्त्व मिति सतत्त्वपरिज्ञानाय चिन्त्यते ।

अपुरुषविधाः स्युरित्यपरमपि तु यत् दृश्यते । ४२ पृ

तत्र दुर्गाचार्य्यः—तदाहुः न एतदस्ति यत् देवासुरम् इति । ४३पृ

यदि देवासुराः कल्पनासागरस्य फेनबुद्बुदा एव भवन्ति, तर्हि कथं वेदे "देवानां नु वयं जाना प्रवोचाम विपन्यया" इत्यादयो मन्त्राः सन्ति ? कथं वा भारते देवोपासना प्रचलिता, कथं वा देवासुरयुद्धमभवत्, कथं वा असुर निक्षिप्तवाणेन दशरथस्य भावपदार्थस्य हस्ते क्षत मभूत् ! अतएव भ्रष्ट मेतत् सर्वं यास्कनिर्वचनमिति । वायुस्तु प्रकृतस्य भौमान्तरीक्षस्य अधिपतिः, इन्द्रश्च कल्पितस्य दिव्यान्तरीक्षस्य अधिपति रासीत् । वायुश्च इन्द्रश्च अभिन्नौ इति न, तयोः पार्थक्येन देवा चत्वारोभवन्ति ।

अथातो द्युस्थाना देवताः तासाम् अश्विनौ प्रथमागामिनौ भवतः । अश्विनौ यत् व्यश्नुवाते सर्व्वं रसेन अन्यो ज्योतिषा अन्यः । अश्वैः अश्विनौ इति और्णनाभः । तत् कौ अश्विनौ ? द्यावापृथिव्यौ इत्येके, अहोरात्रौ इत्येके, सूर्य्याचन्द्रमसौ इत्येके, राजानौ पुण्यकृतौ इति ऐतिहासिकाः । तयोः कालः ऊर्द्ध्वम् अर्द्ध रात्रात् प्रकाशीभावस्य अनुविष्टम्भ मनुतमो भागो हि मध्यमो ज्योतिर्भागः आदित्य स्तयोरेषा भवति । २५३पृ २ख

अनेन अनुमीयते अश्विनौ किं ? तत्र तुच्छं यास्केन । यदा वेदवेदान्तब्राह्मणोपनिषद्रामायणमहाभारतपुराणतन्त्रादिषु एवं विद्यते "त्या दैव्या भिषजा अश्विना । ८।१८।८म । अश्विनौ वै देवानां भिषजौ ताभ्यामेव अस्मै भेषजं करोति इति श्रुतेः । अश्विनौ हि देवाना मध्वर्य्यू आस्तां ।१५३पृ कृष्णयजुः । तौ च छिन्नपादायै विश्पलायै लौहपादं दत्तवन्तौ,यौ च बहून् दैत्यदानवोत्पीड़ितान् देवान् विपद्भ्यः अरक्षताम्,यौ आयुर्वेदाना मपि उपदेष्टारौ,तौ एव चेतनावन्तौ अश्विनौ अचेतनै "द्यावापृथिव्यौ" "नक्षत्रविशेषौ" वा, इति अतीव हास्यजनकसंवादः । अनेन इदमपि स्फुटीकृतं भवेत् यत् यास्कः खलु द्यावापृथिव्यो रपि स्वरूपं न ज्ञातवान् आसीत् ! अहो यदि एवम्भूतस्यापि यास्कस्य प्रमादभारमन्थरं निरुक्तं वेदार्थावबोधनाय उपयुक्तं स्यात् तर्हि कथं तस्मिन् युगे वेदाः कृषकगीति रिति उपेक्षिता भवगीताश्च न स्युः । अथ तौ "अहोरात्रौ",तौ चन्द्रसूर्य्यौ, तौ नक्षत्रविशेषौ

मध्यरात्रात् अनन्तरं तयो रुदयकालः, तौ प्रातःसन्ध्या सायंसन्ध्या च पाश्चात्या एवं वदन्ति, परन्तु एतत् सर्वं नितरां बालविचेष्टाविशेष एव । अतो यास्कस्य यास्कानुवर्त्तिपाश्चात्यानां भारतवासिनाञ्च वेदव्याख्या कथं कथमपि न ग्रहणयोग्य मिति कथने न कोपि प्रत्यवाय इति विदुषां परामर्शः । वस्तुतस्तु यास्कादयो निरुक्तकारा वेदार्थाना मवबोधाय न किमपि समर्था अभवन्, अतएव तेषां मतं परित्यज्य मिति । अथेदानीं ब्राह्मणग्रन्थानां व्याख्याया गौरवलाघवं विचार्य्यते ।

मूलम्……यज्ञेन यज्ञ मयजन्त देवाः ।१६।९० सू । १०म

ऐतरेयब्राह्मणम्………यत् देवा अग्निना अग्निम् अयजन्त ।७३पृ

यास्कनिर्वचनम्………अग्निना अग्निम् अयजन्त देवाः अग्निः पशुरासीत् तम् आलभन्त । तेन अयजन्त इति च ब्राह्मणम् । ४०५पृ—२य ख

सायणभाष्यम्………देवा व्यवहर्त्तारो यजमाना यज्ञेन निर्मथ्य अग्निना यज्ञं होमसाधन माहवनीय मयजन्त पूजितवन्तः । अनुष्ठानाय संयोजितवन्तः इत्यर्थः ।५०।१६४।१म

देवाः प्रजापतिप्राणरूपाः यज्ञेन यथोक्तेन मानसेन सङ्कल्पेन यज्ञं यथोक्त यज्ञस्वरूपं प्रजापतिम् अयजन्त पूजितवन्तः ।१६—९०सू—१०म

दयानन्दभाष्यम्—यज्ञेन अग्न्यादिदिव्यपदार्थसमूहेन यज्ञं धर्मार्थकाममोक्षव्यवहारम् अयजन्त यजन्ति सङ्गच्छन्ते ।

मुइरकृतानुवादः—The gods sacrificed to Agni (fire) with fire.

रमेशचन्द्रदत्तानुवादः……देवतारा यज्ञद्वारा यज्ञ सम्पादन करिलेन । १६।९०।१०म । देवगण यज्ञद्वारा यज्ञ करियाछेन । ५०—१६४—१म ।

यज्ञशब्देन अग्निरपि अवबोध्यते इति कस्मात् अधिगतं, तन्न केनापि प्रदर्शितम् । सूक्तवाक्यं प्रथममादित् अग्नि मादित् हविरजनयन्त देवाः । स एषां यज्ञो अभवत् तनूपाः तं द्यौर्वेद तं पृथिवी तमापः । (८।८८।१०म) अस्य मन्त्रस्य व्याख्यायामेव सायणेन उक्तं—यज्ञो यष्टव्यः इति, तद् भवितु मर्हति । परन्तु तथापि यज्ञशब्देन अग्निर्न खलु बोध्यते । अतएव एतेषां भाष्यव्याख्यानम् असमीचीनमिति वक्तुं शक्यते । वस्तुतस्तु अत्र प्रथमप्रयुक्तेन यज्ञशब्देन आदिस्वर्ग एव अवबोधितः स्यात्, द्वितीयेन यज्ञशब्देन यष्टव्य एव अग्निरवबोधित इति । यज्ञः—आदिस्वर्गः—इत्यत्र किं प्रमाणम् ? उच्यते तदाह:—

पृच्छामि त्वा परमन्तं पृथिव्याः, पृच्छामि यत्र भुवनस्य नाभिः । ३४

इयं वेदिः परो अन्तः पृथिव्याः, अयं यज्ञो भुवनस्य नाभिः ।३५।१६४।१म

अनेनैव बोध्यते यज्ञः शब्दः खलु कस्यचित् जनपदस्य अवबोधको भवति, यत्र चतुर्द्दशभुवनानां सर्वेषां जनानां नाभिरुत्पत्तिर्बभूव। अत्रापि—सायण व्याख्यानम्—अयं यज्ञो भुवनस्य भूतजातस्य नाभिः संनहनं, तत्र एव वृष्ट्यादि सर्व्वफलोत्पत्तेः सर्व्वप्राणिनां बन्धकत्वात्। परन्तु एतत् व्याख्यानमपि नितरां व्याहत मेव। अस्यैव सायणस्य मन्त्रान्तरेण व्याख्यातं नाभिरुत्पत्ति रुत्पत्तिस्थानं वा।"सरण्यू च नौ,आवयो र्नाभिरुत्पत्तिस्थानं—४।१०सू—१०म। सा नो नाभिः, इयं मे नाभिः ।१८।१८—६१सू—१०म। द्यौर्नः पिता जनिता नाभिरत्र"। ३३।१६४सू १म। अत्र अस्यां द्यवि नः अस्माकं नाभिरुत्पत्तिर्बभूव। यज्ञः खलु कश्चित् जनपद एव इत्यत्र किं प्रमाणं ? निघण्टुरेव तत् कथयति—अध्वरं अन्तरीक्षं (१८पृ)। वस्तुतस्तु अध्वरं यज्ञः सः अन्तरीक्षं न,परन्तु देवयजन-भूमिः स्वर्ग इला एव। यथा अग्निशब्दः अनलोऽभूत् तथैव यज्ञः—अध्वर मभूत्। अयमेव जनपदो यज्ञः सागरगर्भे समुत्पन्न स्तत्र प्रमाणम्—

• कंस्वित् गर्भं प्रथमं दध्रे आपः। ५।८२।१०म

यश्चिदापो महिना पर्य्यपश्यत् दक्षं दधाना जनयन्ति यज्ञम् ।८।१२१।१०म

आपो जलराशयो यत् प्रथमं गर्भं दध्रे दधिरे, महासागरगर्भे यः प्रथमो द्वीपोजातः, स एव यज्ञो यज्ञजनपदः,तत्रैव सर्वादौ हिरण्यगर्भः अग्निः प्रादुर्भूत इति। (७।१२१।१०म।) ऋतस्य यज्ञस्य नाभित्वात् आदि स्वर्गो द्यौरेव यज्ञ इति कथ्यते। अतएव अस्य मन्त्रपादस्य अयमेव प्रकृतार्थः—प्रकृतार्थवाहिनो—देवाः साध्यदेवा अथर्वसूर्य्येन्द्राद्य यज्ञेन यज्ञे (व्यत्ययबहुलमिति विभक्तिकारकव्यत्ययः) यज्ञजनपदे द्यवि आदिस्वर्गे स्वर्गीये अन्तरीक्षे (यदि निघण्टुवाक्यं सत्यं स्यात्) यज्ञं यजनीयं यष्टव्यम् अग्निं वह्निम् अयजन्त अर्चितवन्तः अपूजयन्।

अनुवाद……साध्य ओ इन्द्रादि देवगण यज्ञजनपद वा आदिस्वर्गे यजनीय यष्टव्य वह्निर अर्च्चना करियाछिलेन।

मूलम्……त्वामग्ने पुष्करादधि अथर्वा निरमन्थत। मूर्द्ध्नो विश्वस्य वाघतः॥

१३—१६सू—६म

ऐतरेयब्राह्मणम्……त्वामग्ने पुष्करादधि इति तृचमाग्नेयं गायत्र मन्वाहाग्नौ

मथ्यमाने त्वया एव एनं तद्देवतया स्वेन छन्दसा समर्द्धयति अथर्वा निरमन्थत इति रूपसमृद्ध मेतत् वै यज्ञस्य समृद्ध' यत् रूपसमृद्ध' यत् कर्म्म क्रियमाणम् ऋग् अभिवदति। ६७४। हस्ताभ्यामेनं मन्थन्ति शिशु' जातमिति शिशुरिव वा एष प्रथमो जातो यदग्निः।६८४

सायणभाष्यम्······हे अग्ने अथर्वा एतत् संज्ञऋषिः त्वां पुष्करादधि पुष्करपर्णे निरमन्थत अरण्योः सकाशात् अजनयत्। कीदृशात् पुष्करात् मूर्ध्नो मूर्द्धवत् धारकात् विश्वस्य सर्वस्य जगतो वाहकात पुष्करपर्णे हि प्रजापतिः भूमि मप्रथयत्—"तत् पुष्करपर्णे अप्रथयत् इति श्रुतेः। भूमिश्च सर्वजगत आधारभूता इति पुष्करपर्णस्य सर्वजगद्धारकत्वं। अत्र पुष्कर शब्देन पुष्करपर्ण' मभिधीयते। इत्येतच्च तैत्तिरीयके विस्पष्ट माम्नातं त्वामग्ने पुष्करादधि इत्याह पुष्करपर्णे हि एन मुपश्रुत मविन्दत् इति।

दयानन्दः... . त्वाम् अग्ने पुष्करात् अन्तरिक्षात् अधि उपरि अथर्वा अहिंसकः निः अमन्थत मन्थन्ति मूर्ध्न उपरि वर्त्तमानस्य विश्वस्य सर्वस्य जगतः वाघतः मेधाविनः। अन्वयः—हे अग्ने विद्वन् यथा वाघतो विश्वस्य मूर्द्धः पुष्करात् अधि अग्नि' निरमन्थत तथा अथर्वा अहं त्वां प्रदीपयामि।

दत्तानुवाद······ हे अग्नि अथर्वा ऋषि शिरोवत् विश्वेर धारणकारी पुष्कर हइते मन्थन करिया तोमाके निःसारित करियाछेन।

एतत् व्याख्याभाष्यानुवादादिकं समीचीनं न। पुष्करं किं ? अथर्वा कः, वाघतः किं, कथं "विश्वस्य मूर्द्धः" ऋषिणा इत्युक्तं, तदपि भाष्यकारादिभिर्न चिन्तितं। वस्तुतस्तु "पुष्करं" द्यौरादिस्वर्गो, न तु पद्मपत्रादिक मिति। तत्तु पुष्करं इला इलावृतवर्ष मिति यावत्, तत्तु पुष्करं मानवानामादिजन्मभूमिरतः तत् विश्वस्य भूमण्डलस्य सर्वेषां मूर्द्धा मस्तकस्वरूप मिति। उक्तञ्च—

नि त्वा दधे वरे आ पृथिव्याः, इलायास्पदे सुदिनत्वे अह्नाम्। ४-२१सू-१म

हे अग्ने ! अह्नां सुदिनत्वे यदा अस्माकं सुदिन मासीत् वयं च स्वर्गे आस्म, तदा अहं त्वां पृथिव्या वरे पृथिवीमध्ये श्रेष्ठे इलायास्पदे पुष्करे आदि-स्वर्गे आदधे संस्थापितवान्। अत्रैव ऋषिः तमेव पुष्करं विश्वस्य मूर्द्धान मवदत्। पुष्करम् आदिस्वर्गः। कथं पुष्करं स्वर्गं इति ? पुष्करम् पद्मं, तदेव आदिस्वर्गो द्यौः, तत प्रभवत्वात् सुरज्येष्ठो ब्रह्मा "पद्मजन्मा"—

"अब्जयोनिः" इति। उक्तञ्च गोपथेन ब्राह्मणेन—

ब्रह्म हवै ब्रह्माणं पुष्करे ससृजे। ७पृ, ब्रह्म परमेश्वरः ब्रह्माणं सुरज्येष्ठं धातारं पुष्करे आदिसर्गे सृष्टवान् (एकोऽभून्नलिनात्)। न ब्राह्मणग्रन्था अमुष्य ऋङ्मन्त्रस्य किमपि विशदव्याख्यानं कृतवन्तो न पुनः सायणादयश्च।

प्रकृतार्थवाहिनी·········हे अग्ने हे वह्ने! वाघतो मेधावी (इति निघण्टुः) अथर्वा अथर्वा ऋषिः सुरज्येष्ठब्रह्मणो ज्येष्ठः पुत्रः त्वां विश्वस्य जगतो भूमण्डलस्य इति यावत् मूर्द्धः शिरसः मस्तकस्वरूपात् पुष्करात् पुष्करजनपदा दधि उपरि पुष्करजनपदे निरमन्थत अरणिमन्थनेन उत्पादितवान्।

अनुवादः·········हे अग्ने मेधावी अथर्वा ऋषि तोमाके पृथिवीर सकल जनपदेर मस्तकस्वरूप पुष्कर वा इलावृतवर्षे अरणीसंघर्षणद्वारा उत्पादन करियाछेन।

खे रथस्य खेऽनसः खेयुगस्य शतक्रतो।
अपालामिन्द्र त्रिः पूत्वी अकृणोः सूर्य्यत्वचम्॥७।८०।८म

शाट्यायनब्राह्मणम्—तां खेरथस्य अधि अवृहत् सा गोधा अभवत्, तां खेनसोऽत्यवृहत् सा संश्लिष्टका अभवत्, तदेषा अभ्यनूच्यते खेरथस्य खेनस इति।

सायणभाष्यम्·········अनया अपालां सूर्य्यसदृशप्रभाम् अकरोत् इत्याह। हे शतक्रतो! हे शतसङ्ख्याकयज्ञ! बहुविधप्रज्ञ वा हे इन्द्र! रथस्य स्वकीयस्य खे पृथुतरे छिद्रे, तथा अनसः शकटस्य खे तदपेक्षया अल्पे छिद्रे, युगस्य खे च अल्पतरे सूक्ष्मे छिद्रे रथशकटयुगानां छिद्रेषु त्वग्दोषपरिहारार्थ त्रिः त्रिवारं निष्कर्षेण पूत्वी पूत्वा शोधयित्वा ततः अपालाम् एतन्नामिकाम् अत्रिसुतां ब्रह्मवादिनीं सूर्य्यत्वचं सूर्य्यसमानत्वच मकृणोः अकरोः कल्याणतमरूप भाजमकरो रित्यर्थः। शाट्यायनब्राह्मणे स्पष्टमभिहितं * * * तस्यै ह यत् कल्यानतमं रूपाणां तद्रूपमास इति। त्वग्दोषापनयनाय अक्षादिद्वारेषु अतिकर्षणमिति यस्त्वग्दोषदूषितः सन् एतत् सूक्तं पठति, तस्य त्वग्दोष मपगमय्य सूर्य्य सदृशकान्तिमिन्द्रः करोरीति सूक्तं प्रशस्यते।

दत्तजानुवाद·········हे शतक्रतु! तुमि रथेर छिद्रे, शकटेर छिद्रे एवं युगेर छिद्रे तिनवार निष्कर्षणद्वारा शोधनकरतः अपालाके सूर्य्यसमान चर्म्मविशिष्ट करियाछिले। ७।८०।८म। रमेशदत्त—Viii. 91. 7

Ludwig :—In the hole of the chariot, in the hole of a cart and in the hole of the yoke, O Satakratu, thou hast, O Indra, purifying Apala thrice made her body shining like the Suns.

Grassman :—Thou, O Indra, didst, O strong one, pull Apala through three holes, that of the wheel, the cart and yoke, and her skin thereupon became bright as the Sun.

खे रथस्य इत्यादि—एतत् सर्वं भाष्यानुवादादिकं ममूलक मसमीचीनञ्च। यथा स्वर्णकाराः लोहकाराश्च सच्छिद्रलोहफलकस्य छिद्रमार्गेण स्वर्णरौप्यताम्र लोहस्थूलसूत्रं आकृष्य तत्सूत्रं सूक्ष्मं कुर्व्वते, तथा इन्द्रस्तस्य रथशकटयुगच्छिद्र-योगेन अपालां आकृष्य तां नीरोगामकुर्वन्, सा गोधा च अभवत् अयमतीव हास्यजनकसिद्धान्त इति! कथं ब्राह्मणग्रन्थ इत्थं वृथावाग्जालविस्तारं कृतवान् कथं वा पाश्चात्या अपि सायणभाष्यं स्वीचक्रुस्तद्वयं बोद्धुं न शक्नुमः। वस्तुतस्तु, देवराज इन्द्रः पुष्पकारोहणेन भारतमागत्य, त्रिवारं औषधप्रयोगेण अपालां चर्म्मरोगविमुक्ता मकरोदिति।

प्रकृतार्थवादिनो……हे शतक्रतो! शतमख इन्द्र! खेरथस्य खेरथः खे शून्ये रथो यस्य, खे अनः शकटं यस्य स खेऽनाः खेशकटः खेयुगस्य खेयुगः खे शून्ये युगं रथाङ्गविशेषो यस्य सः, (व्यत्ययो बहुलमिति सूत्रेण विभक्तिकारकव्यत्ययः) त्वं पुष्पकरथारोहणेन त्रिः पूत्वी त्रिवारं पूत्वा औषध-प्रयोगेण शोधयित्वा अपालाम्, अपालानाम्नीं ब्रह्मवादिनीं तस्या चर्म्मरोगं दूरीकृत्य, सूर्य्यत्वचं सूर्य्यवत् तप्तकाञ्चनवर्णाम् अकृणोः अकरोः कृतवानसि।

अनुवाद……हे शतमख इन्द्र तुमि पुष्पकरथे आरोहणपूर्व्वक शून्यपथे भारते आगमन करिया तिनवार औषध प्रयोगद्वारा ब्रह्मवादिनी अपाला देवीर चर्म्मरोग दूर करिया ताँहाके सूर्य्येर न्याय तप्तकाञ्चनवर्णा करियाछ।

समुद्रादर्णवादधि संवत्सरो अजायत।
अहोरात्राणि विदधत् विश्वस्य मिषतो वशी॥ २।१९०।१०म

अत्र हलायुधः……अस्य अघमर्षणस्य व्याख्यानमाचरितुं हृत्कम्पो जायते। यतः सर्ववेदसारभूतः अत्यन्तगुप्तश्च अयं मन्त्रः। अस्य यत् पाठमात्रञ्च अर्थ बोधसौगम्यं नास्ति, ब्राह्मणनिरुक्तादिकञ्च नास्त्येव। इत्थ मेतदीय व्याख्याना-

नुगुणं क्रमपि उपाय मप्राप्य यदेतस्य स्वरूपोपलम्भमात्रे ण व्याख्यानमाचरणी-यं तदतीव साहसम् ।

अथ तत्ज्ञतव्याख्या······महाप्रलयसमये केवलं परं ब्रह्ममात्रमासीत् इत्यर्थः । ततस्तदनन्तरं महाप्रलयावस्थाया मेव रात्रिरजायत, रात्रिश्च समुत्पन्ना, सकल मन्धकारमयमासीत्। तथाच स्मृतिः—

आसीदिदं तमोभूत मप्रज्ञात मलक्षणम् ।

तदनन्तरं महाप्रलयावसानसमये सृष्ट्यारम्भे तपसोऽदृष्टवलात् समुद्रः अजायत किम्भूतः समुद्रः ? अर्णवः, अर्णः पानीयं तदस्यास्तीति अर्णसः सलोपश्च इति वप्रत्ययः सलोपश्च । अर्णवः पानीययुक्तः समुद्रः समजायत इत्यर्थः । प्रथमतः—सकलसंसारसृष्टिनिमित्तजलराशिरुत्पन्न इत्यर्थः ।

तत स्तदनन्तरं समुद्रात् अर्णवात् धाता स्रष्टा अजायत, किम्भूतो धाता ? मिषतः अप्रकटीभूतो विश्वस्य वशी प्रभुः महाप्रलये विलुप्तस्य अस्य त्रैलोक्यस्य निर्माणे प्रभु रित्यर्थः । स धाता यथापूर्वं यथाक्रमं सूर्य्याचन्द्रमसौ अकल्पयत् निर्म्मितवान् । किम्भूतौ सूर्य्याचन्द्रमसौ ? अहोरात्राणि विदधत् अहोरात्रान् कुर्वाणौ सूर्य्य एव दिवसं करोति, चन्द्र एव रात्रिं करोति । ततः सूर्य्यचन्द्रयो रुत्पत्त्यनन्तरं संवत्सरः अजायत समुत्पन्नः । १०३।१०५पृ ब्राह्मणसर्वस्वम् ।

सायणभाष्यम्······अर्णवात् समुद्रात् सृष्टात् अधि ऊर्द्धं संवत्सरः संवत्सरोपलक्षितः सर्वः कालः अजायत, श्रूयते हि—"सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्त्ताः काष्ठाश्च" इति । स च ईश्वरः अहोरात्राणि एतदुपलक्षितानि सर्वाणि भूतजातानि विदधत् कुर्वन् सृजन् । मिषतो निमेषादियुक्तस्य विश्वस्य सर्वस्य प्राणिजातस्य वशी स्वामी भूत्वा वर्त्तते ।

दत्तजानुवाद······जलपूर्ण समुद्र हइते संवत्सर जन्मिलेन । तिनि दिन रात्रि सृष्टि करितेछेन । तावत् लोके देखितेछे ।

एतद्व्याख्या कदम्बक मतीव अकिञ्चित्करं प्रमाददुष्टञ्च । अस्मिन् अघमर्षण मन्त्रत्रये समुद्रसृष्टेः प्रसङ्गोऽपि नास्ति जलपूर्णे समुद्रगर्भे स्थलपूर्णे समुद्रगर्भे वा स्वयंधाता द्वादशमासात्मकः पूर्णसंवत्सरो वा समुत्पद्यते एष तु अतीव बालकजनसुलभः सिद्धान्तः । कालोऽनन्तः अभावपदार्थश्च तस्य उत्पत्तिरपि नास्ति;

विनाशोपि च नास्त्येव, यदा प्रथमं सूर्य्योदयो बभूव, तदैव अह्नः आरम्भ शस्य सूर्य्यस्य अस्तगमनेन रात्रेः समागम इति । तौ अपि अहोरात्रौ जन्यपदार्थौ न। वस्तुतस्तु मन्त्रोक्तानि अहोरात्राणि नक्तन्दिवं न, भूतजातानि अपि न परन्तु एतौ द्वौ देवजनपदौ, संवत्सरश्च कश्चित् जनपद एव। "मिषतः" —निमेषादियुक्तस्य इदमपि न। विदधत् कुर्वन् सृजन् वा इदमपि न। संवत्सरः कश्चित् जनपदः—इत्यत्र किं प्रमाणम्? अत्र वेदा एव प्रमाणं उक्तञ्च प्रश्नोपनिषदि द्वौ संवत्सरौ चान्द्रमसौ जनपदौ, अहोरात्रौ जनपदौ अदितिनन्दनसूर्य्यस्य। गीतायामपि तयो रहोरात्रजनपदयोः समुल्लेखः अभवत् (२४।२५-८अ), ऐतरेयब्राह्मण मपि इति उक्तवत्—

अहर्देवा अश्रयन्त रात्री मसुराः । ४५पृ

एतौ एव जनपदौ मिलित्वा तपोलोकस्य देहप्रतिष्ठा अभवत्। तथा तैत्तिरीयब्राह्मण मपि निर्दिशति—"संवत्सरः खलु वै देवानां पूः"। ११६ पृ। तथाहि कृष्णयजुः—

संवत्सरः खलु वै देवाना मायतनम्
तस्मात् वै आयतनात् देवा असुरान् अजयन् । ८८ पृ

एवं "मिषतः" पदमपि "पश्यतः" इत्यर्थे एव प्रयुक्तं बभूव। यदुक्तं कुमारसम्भवमहाभारतयोः—

जातवेदोमुखात् मायी मिषता माच्छिनत्ति नः। ४८।२स

ईरथे यत्र कर्णेन धर्म्मराजो युधिष्ठिरः ।
संशयं गमितो युद्धे मिषतां सर्वधन्विनाम् ॥ २७४-२श-आदिपर्व

तत्र नीलकण्ठः—मिषतां पश्यता मिति। अतएव अस्य ऋङ्मन्त्रस्य प्रकृतार्थः सायणेन न प्रकटीकृत इति।

प्रकृतार्थवाहिनी·········अर्णवात् जलपूर्णात् समुद्रात् उत्तरमहासागरादधि उपरि तस्मिन् सागरगर्भे संवत्सरः संवत्सरनामा कश्चित् जनपदः अजायत उत्पन्नः स एव रम्यकवर्षो दक्षिणसाइबिरिया इति। वशी स्वाधीनः स्वेच्छया यत् किमपि कर्त्तुं प्रभुः परमेश्वरः तस्मिन्नेव सागरगर्भे मिषतः पश्यतो विश्वस्य सर्वस्य सर्वेषामेव प्रत्यक्ष महोरात्राणि अहोरात्रौ

अहर्जनपदं रात्रिजनपदञ्च विदधत् व्यदधत् । अकाराभावश्छान्दसः असृजत उत्पादयामास इति ।

सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवञ्च पृथिवीञ्च अन्तरिक्ष मथो स्वः ॥ ३-१९०-१०म

एष सूर्य्यो दिवाकरो न, परन्तु अदितिनन्दनविशेषः, स हि सावर्णिमनोः पिता तथा स एव सामवेदमन्त्रसमाहर्त्ता इति । यज्ञानुष्ठानप्रभृतितत्कर्ष-साधनाय तं देवा पृष्ठे समारोप्य दिवं नीतवन्तः । उक्तञ्च—

ये ऋतेन सूर्य्यम् आरोहयन् दिवि ।२।६२।१०म

ये देवाः सूर्य्यं सावर्णिमनोः पितरम् ऋतेन यज्ञाय दिवि द्युलोके अहोरात्र जनपदे आरोहयन् । केन प्रकारेण ?—

असौ आदित्यः अस्मिन् लोके आसीत्, तं देवाः पृष्ठैः परिगृह्य सुवर्गं लोक मगमयन् । ४५८ पृ । कृष्णयजुः ७।३।१०

चन्द्रश्च अयमत्रिनन्दनः कुरुयवनानां पूर्वपुरुषः । ब्रह्मा तस्मै अपि उत्तरसंवत्सरस्य (महर्लोकस्य) नूतनराजत्वं दत्तवान् । उक्तञ्च विष्णुपु:—

नक्षत्रग्रहविप्राणां वीरुधाञ्चाप्यशेषतः ।
सोमं राज्येऽदधात् ब्रह्मा यज्ञानां तपसामपि ॥२।२२।१अं

इदमपि स्वः-पदं दिवो विशेषणं न, एषापि खलु सायणस्य महती भ्रान्तिरेव । वस्तुतस्तु स्वः—आदिसर्गो द्यौ रिलावृतवर्षम् । पृथिवी भूर्भारतवर्षम् । अन्तरीक्षं—भुवर्लोकः (तुरुष्कपारस्यापोगस्थानं) दिव्—महस्तपःसत्यलोकात्मको महाजनपद (साइबिरिया) इति ।

प्रकृतार्थवाहिनी·········धाता सुरज्येष्ठो ब्रह्मा दिवि उत्पन्नायाम् सत्यां सूर्य्याचन्द्रमसौ सूर्य्यं स्वभ्रातरं चन्द्रमसं चन्द्रञ्च अत्रिनन्दनं पूर्ववत् समकल्पयत्, यथा पूर्वं तयोर्भैरतानुदेशे द्वौ जनपदौ आस्ताम्, तथा दिवि च धाता तौ सूर्य्यचन्द्रौ अहोरात्रजनपदे तथा संवत्सरजनपदे च अभिषिक्तवान् । अथ इत्थं दिवोद्युलोकस्य नूतनोत्पत्तौ, दिव् च पृथिवी च, अन्तरीक्षञ्च तथा स्वश्च इति लोकचतुष्टयं बभूव । उक्तञ्च—

भूराद्यान् चतुरोलोकान् पूर्ववत् समकल्पयत् । विष्णु । ४८। ४अ ।१अं

प्राचीनवंशं करोति देवमनुष्या दिशो व्यभजन्त। प्राचीं देवा दक्षिणां पितरः, प्रतिचीं मनुष्या उदीचीं रुद्राः। २६० पृ कृष्णयजुः।

श्रुतिरियं कस्मिन् वेदे वर्त्तते तत्र परिज्ञायते पूर्वं तावत् कृष्णयजुषा एतस्य व्याख्या कृता। ततः सायणभट्टभास्करौ अपि कामपि व्याख्यां कृतवन्तौ, परन्तु सा व्याख्या एतेषा मतीव प्रमाददुष्टा इति।

कृष्णयजुर्व्याख्या·········यत् प्राचीनवंशं करोति देवलोकमेव तत् यजमान उपावर्त्तते परिश्रयति। अन्तर्हितो हि देवलोको मनुष्यलोकात्, न अस्मात् लोकात् स्वेतव्य मिव इत्याहुः। कोहि तत् वेद, यदि अमुष्मिन् लोके अस्ति वा न वा इति दिक्षु अतीकाशान् करोति।

तैत्तिरीयसंहिता एव कृष्णयजुरिति नाम्ना प्रसिद्धा। एतत्तु यजुर्वेदस्य ब्राह्मण मिति। परन्तु ब्राह्मणप्रणेता मूलमन्त्रस्य किमपि न बुबुधे। "प्राचीन-वंशं"—किं ? देवमनुष्याः अत्र के ? कएव च देवाः प्राचीं दिशं गताः, पितरः के ? दक्षिणां दिशं किं ? प्रतीचीं किं ? मनुष्याः के ? उदीचीं किं ? रुद्राः के ? कथं ते सर्वे देवा नानादिक्षु गताः कस्मात् गताः, तत् किमपि न व्यक्ती कृतम्। वस्तुतस्तु यः स्वयमेव बोद्धुमशक्तः स कथं परान् बोधयितुं समर्थः स्यात्।

सायणभाष्यम्······तत्र प्रथमानुवाके क्षौरादिभिः संस्कृत्य यजमानस्य प्राचीनवंशाख्यशालाप्रवेशः अभिधीयते। "आप उन्दन्तु इत्यादयः क्षौरमन्त्राः। क्षौरात् प्रागेव शाला निर्म्मातव्या। ततो बौधायनो दीक्षासाधनद्रव्यसम्पा-दनपूर्वकं शालानिर्म्माण माह। अग्निष्टोमेन यक्ष्यमाणो भवति स उपकल्पयते कृष्णाजिनञ्च कृष्णविषाणञ्च वासश्च मेखलाञ्च इति। आपस्तम्बोऽपि सोमेन यक्ष्यमाणो ब्राह्मणार्षेयान् ऋत्विजो वृणीते। इत्युपक्रम्य वरणं देवयजनाध्यवसानं दीक्षणीयेष्टिञ्च अभिधाय इदमाह—"प्राचीनवंशं करोति। पुरस्तात् उन्नतं पश्चात् निनतं सर्वतः परिश्रित मिति। एतदेव अभिप्रेत्य वपनविधेः पूर्वं शालां विधत्ते, "प्राचीनवंशं करोति * * * उदीचीं रुद्राः"। प्रागायातः पृष्ठवंशो यस्य गृहविशेषस्य स प्राचीनवंशः। केचित्तु यस्य देवयजनस्य इति विग्रहं कृत्वमेव यजनविधिम् एव माहुः। देवयजनैकदेशरूपगृहसंबद्धो वंशो देवयजनसम्बद्धो भवति। वंशस्य प्रागग्रत्वेन तद्गृहं यजमानो देवलोकं करोति गृहस्य

कुशस्थानीय मावरण विधत्ते परिश्रयति। अन्तर्हितो हि देवलोकात् स्वर्गस्य मनुष्यं रहस्यत्वात् अत्रापि तदर्थं परिश्रयणम्।

एषा सायणव्याख्यापि अतीव वृथावाग्जालडम्बरा प्रमाददुष्टा च। मूलमन्त्रस्तु नितरां प्रसादगुणोपेतः प्राञ्जलश्च पचान्तरे व्याख्या त्वतीव कुज्झटिका समाच्छन्ना। स्वयं वाग्वादिनो अपि एतां बोद्धुं न समर्था भवेत्। कुतोऽत्र वंशखण्डं? कुतो वा यज्ञशाला? कुतः चौरकार्य्यं! कुतो वा कुशविधानं? वस्तुतस्तु सायणेन सायणशिष्येण वा एतस्य न किमपि तात्पर्यं बुद्धमिति।

भट्टभास्करभाष्यम्……अथ प्राचीनवंशत्वं विशिष्टफलहेतुत्वेन स्तोतुमाह देवाश्च मनुष्याश्च दिशः प्रागादिका व्यभजन्त विभज्य परिगृहीतवन्तः विविधं वा अभजन्त। के काम्? इत्याह प्राचीं देवाः।

भट्टभास्करोपि मन्त्रस्य प्रकृततात्पर्य्यं किमपि न बुबुधे। परन्तु स तु मन्त्रस्थपदानां प्रतिशब्दं विन्यस्य विदायं गृहीतवान् (रेहाइ लब्धवान्)।

वस्तुतस्तु यदा देवमनुष्या दैत्यदानवगणैः कर्त्तृभिः स्वर्गभ्रष्टा अभवन्, (Paradise lost) तदा ते चतुर्दिक्षु गत्वा आर्य्यादि (हिन्दु) प्राचीनवंशानां प्रतिष्ठां (पत्तन) कृतवन्तः। के ते देवाः? के वा ते मनुष्याः? ब्रह्मेन्द्रवैवस्वतमन्वादयो देवाः, वरुणादयो मातृमनोर्नन्दना मनुष्याः। के कां दिशं गतवन्तः? तदुक्तं देवाः प्राचीं पूर्वां दिशां द्वितीयब्रह्मलोकं (Barma) गताः, पितरः पितृलोकादिस्वर्गवासिवैवस्वतमन्वादयः दक्षिणां दिश मिदं भारतवर्षं, मनुष्या मातृमनोर्नन्दना वरुणवायुद्युतालादयश्च प्रतीचीं पश्चिमां दिशं पारस्यादिकं, तथा रुद्रा रुद्रवंशीयदेवा उदीचीं उत्तरां दिशं द्युलोकं (साइविरियादेशं) जग्मुरिति। उक्तञ्च—

दिवि रुद्रासो अधिचक्रिरे सदः। २।८५सू, १म

तर्हि कथं ब्राह्मणसायणादीना मीदृक् भ्रान्तिः सञ्जाता? देवाः पारलौकिकाः स्वर्गाः पारलौकिकाः मनुष्या वयं मूलत एव भारतवासिनः,ते देवमनुष्या कथमत्र समवेताः स्थानान्तरं गता वा? पितरस्तु मृतपितापितामहादयः तएव च वा न कथं दक्षिणां दिशं यमालयं गच्छेयुः एतत् सर्वं स्थिरीकृत्य एते भाष्यकाराः प्रमाद मभजन्। युधिष्ठिरः पदव्रजेन सकुक्कुरः स्वर्गं गतः, अर्जुनोपि मनुष्यः पञ्च वत्स-

रान् स्वर्गे स्थित्वा इन्द्रात् अस्त्रविद्यां लेभे। भरद्वाजादयो भिषजः पूर्वनिवासं स्वर्गं गत्वा (पश्य चरकग्रन्थस्य ५०३ पृष्ठं) इन्द्रात् रसायनशास्त्रं समग्रमायुर्वेदञ्च लेभिरे। भारतीयौ नहुषययाती अपि स्वर्गं गत्वा इन्द्रत्वं चक्रतुः, सगरोपि मनुष्यः स्वर्गं गत्वा भार्गवात् आग्नेयास्त्रं लेभे, पश्चान्तरे वेदाचार्य्यः सायणः स्वयमेव वक्ति स्वर्गो मनुष्ये रहस्य इति !!! कथं स्वर्गादेव अर्ज्जुनः ससैन्यो राजसूयकरं जग्राह ? वानरा वा पदव्रजेन ब्रह्मलोकं गताः ? अहो कीयानेव प्रमादः खलु भारतीयभाष्यकाराणा मिति।

प्रजापतिर्लोकान् अभ्यतपत् तेषा मभितप्तानां रसान् प्रावृहत् अग्निं पृथिव्या वायुमन्तरिक्षात् आदित्यं दिवः। अग्नेर्ऋचः, वायोर्यजूंषि सामानि आदित्यात्। भूरिति ऋग्भ्यः, भुवरिति यजुर्भ्यः स्वरिति सामभ्यः।

छान्दोग्य ३००पृ महेशपाल।

एतासां श्रुतीनां शङ्करेण या व्याख्या कृता सा अतीव हास्यजनिका इति। स तु अतीव कष्टेन प्रतिशब्दान् सन्नियोज्य विदार्य (रेशाइ) लब्धवान्। परन्तु अयं प्रजापतिः कः ? अग्निः कः ? वायुः कः, आदित्यः कः ? पृथिवी का ? अन्तरीक्षं किं ? दिव् च किं, तत् किमपि न व्यक्तीचकारः। भूः किं ? भुवः किं ? स्वः किं ? कतमोवेदः कस्मात् लब्धः,कस्य वेदस्य का व्याहृतिरुत्पत्तिस्थानं तत् किमपि शङ्करेण न पर्य्यालोचितं चिन्तितं वा

जयपुरराजपण्डितोऽपि श्रीमन्मधुसूदनोपाध्याय (ओझा) विद्यावाचस्पति र्मां व्यामोहयितुं यत् किमपि अस्या व्याख्यानं कृतवान्। परन्तु तद्धेयम्।

वस्तुतस्तु अयं प्रजापतिः सुरज्येष्ठो ब्रह्मा, सतु कश्यपस्य ज्येष्ठः पुत्रो धाता, तस्य निदेशात् महर्षिरग्निः पृथिव्या भारतवर्षात् भूर्लोकात् ऋग्वेदं महर्षिर्वायुः अन्तरीक्षात् भुवर्लोकात् तुरुष्कपारस्यापोगस्थानात् यजुर्वेदं महर्षिः सूर्य्यदेवः स्वर्गात् द्योः सामवेदं संगृहीतवान्। एता एव श्रुतीरनूद्य भगवता मनुना उक्तम्—

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थं मृग् यजुःसामलक्षणम्॥ २३-१अ

परन्तु मेधातिथिकुल्लूकादयो भारतीयभाष्यकारा एतस्य वचनस्य यां यां व्याख्यां कृतवन्तः, सा सा व्याख्या अतीव दोषसमाघ्राता इति।

तत्र मेधातिथिः—तिस्र एव देवता अग्निप्रभृतय इति नैरुक्ताः, सत्यपि अभिधाननानात्वे । अतस्तेन दर्शनेन उच्यते—एताभ्य स्तिसृभ्यो यज्ञसिद्ध्यर्थं याग-सम्प्रदानत्वात् तासां चतुर्थी। त्रयमृग्यजुःसामलक्षणं ब्रह्म वेदाख्यं दुदोह। अग्न्यादिभ्यो दुदोह अनारयत् अभावयत् । कथं पुनः अग्न्यादिभ्योवर्णात्मा शब्दो मन्त्रवाक्यानि ब्राह्मणवाक्यानि च भवेयुः ? किं न उपपद्यते कः शक्नोति दृष्ट्वा असतो र्थंतु मर्हति ? किं च दृष्टप्रमाणविरोधी प्रागुक्तः अर्थः,उच्यमानोमनसः परितोष-माधत्ते प्रामाणिकानां परिहृतोविरोधः । स्वरूपपरत्वाश्रयणेन एषा मागमानाम्. ऋग्वेद एव अग्नेरजायत, यजुर्वेदोवायोः सामवेद आदित्यादिति। अग्न्यादयोऽपि देवता ऐश्वर्य्यभाजो, निरतिशयशक्तिश्च प्रजापतिः, तत्र का नाम अनुपपत्तिः ? अर्थवादा श्चैते तत्र द्वितीयं कर्म्म आत्मा एव प्रजापतिः आत्मानं दुदोह। दोहनञ्च अभ्यापनं परसंक्रान्तिसामान्येन ।

तत्रापि आग्नेयमन्त्रा आदौ ऋग्वेदे, अतः अग्ने रजायत, इत्युच्यते।

यजुर्वेदेऽपि इषे त्वा ऊर्जे त्वा इति—इट् अन्नं तस्याभ्यस्थानत्वात् वायुना वर्षदानेन क्रियते। ऊर्क् प्राणः स वायुरेव । अत आदितो वायुकार्य्यसम्बन्धात् वायोरित्युपमा । अथवा अध्वर्य्यवमार्त्विज्यं बहुप्रकारा चेष्टाश्च सर्वा वायोरित्यनेन सामान्येन वायोर्जन्म यजुर्वेदस्य अनधिकारस्य सामगीत्ययोग्यत्वात् उत्तमाध्ययनानि सामानि, उत्तमस्थानश्च आदित्य इति ।

२। सर्वज्ञनारायणः······त्रयं ब्रह्म वेदत्रयं दुदोह अन्तर्हितमाकृष्टवान् ।

३। कुल्लूकः······ब्रह्म ऋग्यजुःसामसंज्ञं वेदत्रयं अग्निवायुरविभ्यः आकृष्टवान्, सनातनं नित्यं, वेदापौरुषेयत्वपक्ष एव मनोरभिमतः। पूर्वकल्पे ये वेदाः त एव परमात्ममूर्त्तेर्ब्रह्मणः सर्वज्ञस्य स्मृत्यारूढ़ा, स्तानेव कल्पादौ अग्निवायुरविभ्य आचकर्ष। श्रौतश्चायमर्थो न शङ्कनीयः। तथाच श्रुतिः—

अग्नेर्ऋग्वेदः, वायोर्यजुर्वेदः, आदित्यात् सामवेद इति।

४। गोविन्दराजः······ऋग्यजुःसामाख्यं ब्रह्मत्रयं सनातनं नित्य मपि कल्पादौ देव्या शक्त्या अग्निवायुरविभ्य आकृष्टवान् । यज्ञसिद्धार्थम् आगमत्वाच-नातिशक्य मेतत् । तथाच—ऋग्वेद एव अग्नेरजायत, इत्यादि ब्राह्मणम् ।

५। राघवानन्दः······ अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः आदित्यात् सामवेद इति श्रुतिः। ब्रह्म वेदं सनातनं नित्यं विमृष्टशक्रमराहित्यात्—

यथापूर्वमकल्पयत् इति श्रुतिः ।

सुप्तप्रबुद्धस्य इव आविर्भावाच्च । यज्ञसिद्धार्थम् आध्वर्य्यवौद्गात्रादिभेदेनैव यज्ञः सिध्यति इति दुदोह आदित्यादिद्वारा आविश्चकार । अन्यथा वेदस्य कर्तानन्त्य प्रसङ्गात् ।

६ । नन्दनः......ब्रह्म वेदाभिमानिनीं देवतां दुदोह प्रादुष्कृतवान् । तदुक्तं बह्वृच ब्राह्मणे

ऋग्वेद एव अग्ने रजायत,यजुर्वेदो वायोः सामवेद आदित्यादिति ।

७ । रामचन्द्रः......सनातनं ब्रह्मत्रयं वेदत्रयम् अग्निवायुरविभ्यो दुदोह यज्ञसिद्धयर्थं, कीदृशं ब्रह्म ? ऋग्यजुःसामलक्षणं । अग्नेः सकाशात् ऋग्वेदः, वायोः सकाशात् यजुर्वेदः, रवेः सकाशात् सामवेद इति । निर्ममे निर्म्मितवान् इति सिद्धम् ।

८ । गङ्गाधरकविरत्नः......अग्नीत्यादिभिः चतुर्भिः श्लोकैः एकवाक्यं तत् यथोच्यते । इमा वक्ष्यमाणाः स्थूलाः प्रजाः स्रष्टुमिच्छन् इमाम् ऋग्वेदसृष्टिं ससर्ज । अग्निः तृतीयं महाभूतं वायुः चतुर्थमहाभूतं, रवि रस्य नारायणस्य आदित्यस्य पञ्चामृतं मण्डलम् ऋग्यजुःसामलक्षणं त्रयं ब्रह्म सनातनम् ऋग्वेदं यजुर्वेदं सामवेदञ्च इति त्रयीम् ।

अग्नेः ऋग्वेदं दुदोह, वायोर्यजुर्वेदं रवेः सामवेदं यज्ञसिद्धयर्थम् ।

9. Muller & Buller—

Rig-Veda from fire, Yajur-Veda from Air ; Sam-Veda from Sun.

अस्तो महतामधिक्षेपोहि नितरां प्रत्यवायकरः । परन्तु एते व्याख्याकाराः प्राच्याः पाश्चात्याश्च यादृशीं व्याख्याः कृतवन्तः, तास्तु मनसि अत्यर्थामेव पीड़ां जनयन्ति । क एते अग्न्यादयः, कश्च "दुदोह" इति क्रियापदस्य कर्त्ता, कस्यापि व्याख्याकर्तुर्मनसि न तत् प्रबुद्धं । एष श्लोकः, छान्दोग्यश्रुतेरेव अनुवादः, परन्तु तदपि न कस्यचित् चेतसि जागरित मासीत् । वह्नेः, प्रभञ्जनात्, दिवाकरात् वा कथं शब्दमयाः कवितामयाश्च वेदाः आगच्छन्ति,तदपि न केनापि चिन्तितम् अन्धविश्वासवशात् । सृष्टे रनन्तरं महाप्रलयादिकं नाभूत्, तत्तु वेदविरुद्धमित्यपि कस्यचित् मनसि न प्रबुद्धञ्च । महाप्रलये सति चेत् वायुग्निरव्यादीनामपि विध्वंसः स्यात् तर्हि आधाराभावात् आधेया एते वेदाः कुत्र आसन् ? केचिदन्या

एवमपि प्रलपन्ति यत् वेदाः अग्न्यादीना मभिमानिन्यां देवतायां जनिषत्, परन्तु यदा ते व्याख्याकाराः शङ्करादयो मूलमन्त्राणामवबोधे असमर्थाः अभवन् तदैव ते मिथ्या अभिमानिनीं देवतां मिथ्या अधिष्ठात्रीं देवताञ्च रङ्गभूमौ अवतारयन्ति खलु, वस्तुतस्तु अभिमानिनी देवता अधिष्ठात्री देवता च सर्वथैव आकाशप्रसूनं इति । अथ केचित् चातुष्पाठिक मैथिला एवमपि उक्तवन्तः यत् वेदादयः महाप्रलयावसाने अग्न्यादा सूक्ष्मावस्थायां सुप्तवत् लीना आसन्, परन्तु एतत् सर्वं बुद्धिविवेकविरुद्धं वाग्जालमात्र मेव । अथ यदि सर्वादौ अग्ने रुपासनामन्त्रस्य विद्यमानत्वात् ऋग्वेदः अग्नेः समागत इति वक्तुमिच्छति मेधातिथि स्तर्हि कथं सामवेदोऽपि अग्ने र्जात इति न स्थिरसिद्धान्तः स्यात् ? यत स्तत्रापि आदौ अग्ने राह्वानमन्त्रो विद्यते—

अग्न आयाहि वीतये गृणानोहव्यदातये ।

वस्तुतस्तु एषः अग्निः कश्चित् ऋषिरेव, स तु बहूनामेव ब्राह्मणानां पूर्वपितामह इति । उक्तञ्च—

आग्नेया वै ब्राह्मणा इति श्रुतिः ।

न केवलं श्रुतिरियं परन्तु शिष्यः शङ्करोपि छान्दोग्यभाष्ये एव उक्तवान्—

"द्युलोकात् अग्निभ्यो वयं क्रमेण जाता अग्निस्वरूपाः । ३५२ महीशपाल एवं वायुरपि त्वष्टुर्जामाता (त्वष्टुर्जामातरं वायुं ।२२।२६।८म ।) तथाहि—भगवान् मनुः—

अत्र गाथा वायुगीताः कीर्त्तयन्ति पुराविदः ।
यथा बीजं न वप्तव्यं पुंसा परपरिग्रहे ॥ ४२—८म

एवं रवि रपि अदितिनन्दन आदित्यः सूर्य्यः ब्रह्मानुजविशेषः, स तु सावर्णिमनोः पिता—

सावर्णिः सूर्य्यतनयो यो मनुः कथ्यतेऽष्टमः । चण्डी

अतएव अग्निवायुरवयो महाभूतानि न, परन्तु त्रयो महर्षय एव, ते ब्रह्मण आदेशात् वेदमन्त्रान् समाजहुरिति । उक्तञ्च आर्षैः—

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वं मनुज्ञाता स्वयम्भुवा ॥
ऐतरेयतैत्तिरीयभाष्ये सायणः ।

एते एव महर्षयः अग्निवायुसूर्य्याः, परन्तु न ते महाभूतानि वह्नि-प्रभञ्जनदिवाकरादीनि। तथाहि—

ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः।

सामवेदः स्मृतः पित्र्यस्तस्मात् तस्याशुचिर्ध्वनिः॥ १२४।४म

१। तत्र मेधातिथिभाष्यम्······सामगीतध्वनौ ऋग्यजुषस्य अनध्याय उक्तः। तत्र अयमर्थवादः देवा देवता अस्य "देवदैवत्यो", देवतास्तुतिपर इत्यर्थः। ऋचः प्रायेण स्तुतिप्रधानाः। अत उक्तं देवदैवत्य इति। मनुष्याणां कर्म्म प्रधानत्वात् यजुर्वेदे च कर्म्मणां बाहुल्योपदेशात् एतेन साम्येन यजुर्वेदो "मानुष" इत्युच्यते। मानुषशब्दो मनुष्यजातिवचनः। अभेदाध्यासात् यजुर्वेदो "मानुष" इत्युक्तम्। *"पित्र्यः" पितृभ्योहितः। पितरो वा देवता अस्य इति। यथा कथञ्चित् पितृशब्दसम्बन्धेन श्रूयते। त्रयोलोकाः तेषां त्रय एव अधिष्ठातारः, दिवो देवताः, भूमेर्मनुष्याः, अन्तरिक्षस्य पितर एवं त्रयोवेदाः। द्वयोर्द्वे व मनुष्यसम्बन्धोक्तत्वात् पारिशेष्यात् "पित्र्यः" सामवेदः।

२। सर्व्वज्ञनारायणः······देवा अधिष्ठात्री देवता यस्य इति देवदैवत्यः। तस्मात् पितृसम्बन्धिनां देवसम्बन्धिनां च अपेक्षया अशुचित्वस्य अस्य कर्म्मादिषु दृष्टत्वात्।

३। कुल्लूकः······ऋग्वेदो देव एव देवता अस्य इति "देवदैवत्यः"। यजुर्वेदः मानुषो मानुषदेवताकत्वात् प्रायेण मानुषकर्म्मोपदेशात् वा मानुषः। सामवेदः पितृदेवकत्वात् पित्र्यः। पितृकर्म्म कृत्वा जलोपस्पर्शनं स्मरन्ति।

४। गोविन्दराजः······देवा देवता यस्य असौ देवदैवत्य ऋग्वेदः। मनुष्यदेवताकत्वात् यजुर्वेदो मानुषः। सामवेदः पितृदेवताकः स्मृतः पित्र्य कर्म्म कृत्वा आचमन्त्यन्ते।

५। राघवानन्दः······देवा देवता अस्य इति "देवदैवत्यः"। अशुचि-रिति अशुचिरिव पितृपक्षपातित्वात् नतु अशुचिरेव वेदध्वनेरशुचित्वाभावात् वचनात् पितृदेवकत्वात् ऋग्यजुषी न अध्येतव्ये इति भावः।

६। नन्दनः······सामध्वनौ ऋग्यजुषोः अनध्याये अर्थवाद माह ऋग्वेद इति पितृकर्म्मानुष्ठायिनः अपामुपस्पर्शनस्मरणात्। श्राद्धकर्त्तृप्रतिग्रहीत्रोः

अध्ययननिषेधाच्च पितृस्य अशुचित्वं सुव्यक्तं सामवेदस्यापि पितरः, तस्मात् तस्य ध्वनिरशुचिः ।

७। गङ्गाधरकविरत्नः……मानुषो देवता अस्य इति मानुषो यजुर्वेदः ।

8. Buller—Sam Veda is sacred to the manes.

एतानि सर्वाणि व्याख्यानानि अतीव भ्रष्टानि, न केनापि एतद्व्याख्यानानां प्रकृततात्पर्य्यं बोद्धुं शक्यते । एतैः केवलं गोजामिलनार्थं नितरां वृथा वाग्जाल-विस्तारः कृतः । देवा एव इन्द्रादयः देवता आराध्या यत्र स "देवदैवत्यः" इति तु सम्यगेव । परन्तु "मानुष" स्तथा "पित्रः" एताभ्यां विशेषणाभ्यां किं प्रकटीकृतं भगवता मनुना, तच्च व्याख्याकारैर्नुक्तमिति । वस्तुतस्तु अन्तरीक्षे मातृ-मनोर्नन्दनोवरुणः, अन्ये च वाय्वादयो गत्वा उपनिविविशुस्तेन अन्तरीक्षस्य "मानुष"मिति विशेषणं ।"मानुषः"मानुषाणां लोकः,तत्र मनुष्याणां लोके अन्तरीक्षे भुवर्लोके मानुषे भव इति "मानुषः । तथा—पितरि पितृलोके स्वर्लोके (स्वः) द्यवि भवः इति "पित्र्यः" । "स्वरिति सामभ्य" इति श्रुतेः । सामवेदस्य पितृलोकप्रभवत्वात् । उक्तञ्च "देवलोको वै साम" । कृष्णयजुः

तर्हि किं भारतवर्षं मनुष्यलोको न ? पूर्वं भारतवर्षं देवमनुष्यैरेव अध्युषित-मासीत्, ततः मातृमनोर्नन्दना द्वितीयवरुणवाय्वादयो भुवर्लोकं गताः, तेन तस्य "मानुष" इति विशेषणं बभुव, तेन अन्तरीक्ष मेव मनुष्यलोक इति । पश्चात् यदा भारतीया देवा देवत्वहीना अभवन्, तदा तेपि मनुष्या अभवन् भारतमपि मनुष्य-लोकत्वं गतमिति । का पुनर्माता मनुः ? पुमांसश्चतुर्द्दश मनव आसन्, परन्तु मनुनाम्नी काचित् नारी अपि दक्षकन्या आसीत्, तामपि काश्यपः उदवहत् । तस्या अपत्यानि "मानवा" इति । उक्तञ्च तत् रामायणे—

प्रजापतेर्हि दक्षस्य बभूवुरिति विश्रुताः ।
षष्टिर्दुहितरो राम यशस्विन्यो महायशः ॥ ११
काश्यपः प्रतिजग्राह तासां मष्टौ सुमध्यमाः ।
अदितिञ्च दितिञ्चैव दनु मपि च कालकां ।
ताम्रां क्रोधवशां चैव मनुञ्चाप्यनलामपि ॥ १२

मनुर्मनुष्यान् जनयत् कश्यपस्य महात्मनः ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्च मनुजर्षभ ॥ २८।१४ सर्ग आरण्यकाण्ड ।

कश्यपात् तत्पत्नयां मनौ केचित् ब्राह्मणाः,केचित् क्षत्रियाः (ननु वैवस्वतमन्वादयः ते तु अदितिनन्दनाः) केचित् वैश्याः,केचित् शूद्राश्च समुत्पन्नाः। तथाहि—

जातः परेण धर्म्मणा यत् सवृद्भिः सहाभुवः।

पिता यत् कश्यपस्याग्निः श्रद्धा माता मनुः कविः॥ ५१४ सामवेदः

हे अग्ने त्वं परेण धर्म्मणा अरणीसंघर्षणेन जातः उत्पन्नः सन् यत् यस्मात् सवृद्भिः ऋत्विग्भिः सह अभूवो वर्त्तसे, पिता कश्यपः, श्रद्धा सूर्य्यकन्या यद्वा श्रद्धा श्रद्धया उपलक्षिता माता मनुश्च यत् यस्य अग्निः अग्ने: तव कविः स्तोता स्तोत्री च आसीत्।

अत्र सायणस्तु—"यत् यस्य अग्नेः कश्यपः पिता श्रद्धा देवी माता च मनुश्च कविः क्रान्तकर्म्मा मेधावी वा मनुर्वैवस्वतः स्तोता आसीत्"। इत्थं व्याचख्यौ परन्तु यदा कश्यपस्य "पिता" विशेषणं वर्त्तते, तदा माता इति विशेषण मपि मनुपदस्य इति अनुमातुं युज्यते रामायणप्रमाणात्। ऋग्वेदेऽपि "मनुजातं घृतप्रुषम्" इति विशेषणद्वारेण मातृमनुप्रभवः कश्चित् मनुष्यो देवः अवबोधितः स्यात्। तथाहि पाणिनिः—

मनोर्जातौ अञ्यतौ षुक् च।४।१।१६१

तत्र काशिका……मनुशब्दात् अञ् यत् इत्येतौ प्रत्ययौ भवतः। तत् सन्नियोगेन षुगागमः। समुदायेन चेत् जातिर्गम्यते। मानुषः। मनुष्यः। कथं पितृनाम्ना पुत्रस्य नाम न भवेत्? कश्यपस्य अपत्यं काश्यपः, गर्गस्य अपत्यं गार्ग्यं इति प्रमाणात्? अतएव पुं मनोरपत्यानि मानवः, मानुषः, मनुष्यश्च इति कथं न भवेत्। मैवं, एवं चेत् तर्हि कथं

आदित्याः, दानवाः, दनुजा, दैत्याश्च—

"मानवा"—इति विशेषणेन उपलक्षिताः न स्युः? ते तु सर्व एव स्वायम्भुव मनोरपत्यानि। वस्तुतस्तु मनोरियं मानवी प्रजा। एष मनुः पुमान् एव परन्तु मानवः, मानुषः, मनुष्यश्च एतानि नामानि स्त्रीमनुशब्दात् अपत्यार्थे सिद्धानि एव। कथं? तदुक्तम्—

दिवौकसां सर्ग एष प्रोच्यते मातृनामभिः। वायुपुराणं।

पूर्वं तावत् प्राक्तने वैदिकयुगे परिणयपद्धतिर्नासीत् अतः सन्तानाः खलु मातृनाम्ना परिचिता अभवन्, अथ—विवाहप्रथायां प्रवर्त्तितायामपि कियत्-

कालं यावन सैव प्रथा प्रचरद्रूपा आसीत्, तेन कश्यपस्य पितुः सन्ताना अपि मातृनाम्ना विशेषिता इति। तत्कथं महाभारते विष्णुपुराणे हरिवंशादौ च मनुनाम्नी काचित् दक्षकन्या कश्यपपत्नीनां मध्ये न उक्ता ? उक्ता आसीदेव, परन्तु यदा देवा उपासग्रास्तथा भारतमागता देवाश्च मनुष्यसंसर्गात् देवत्वहीना मनुष्यत्वं गताः तदा सर्वे कुसंस्काराभ्धाश्च ऋषयः ऋषिकल्पा वा पण्डिता अचिन्तयन्, ऐहिका मनुष्याः कथं पारलौकिकदेवानां वैमात्रेया भवेयुः ? अनेन हेतुना तैः महाभारतपुराणयो "मनु"रिति पाठं कर्त्तित्वा "मुनि"रिति मिथ्या पाठः परिकल्पितः । यथा—

मरीचेः कश्यपः पुत्रः कश्यपात्तु इमाः प्रजाः ।
प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश ॥ ११
अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ।
क्रोधा प्राधा च विश्वा च विनता कपिला "मुनिः" ॥ १२
कद्रूश्च मनुजव्याघ्र दक्षकन्यैव भारत ॥ १३।६५अ, आदिपर्व
अदितिर्दितिर्दनुः काला अरिष्टा सुरसा तथा ॥ १२
सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा ।
कद्रू"र्मुनि"श्च धर्मज्ञ तदपत्यानि मे शृणु॥ १२६।१५अ।१ अंश विष्णुपुराण ।

परन्तु विष्णुपुराणप्रणेता मुनिनाम्न्याः कश्यपपत्न्याः सन्तानानां कमपि नाम निर्द्देशं न अकरोत् । महाभारतप्रणेता (पाठपरिवर्त्तयिता) एव मुक्तवान्—

भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा ।
गोपतिर्धृतराष्ट्रश्च सूर्य्यवर्चाश्च सप्तमः ॥ ४२
सत्यवागर्कपर्णश्च प्रयुतश्चापि विश्रुतः ।
भीमश्चित्ररथश्चैव विख्यातः सर्व्ववित् वशी ॥ ४३
तथा शालिशिरा राजन् पर्जन्यश्च चतुर्द्दशः ।
कलिः पञ्चदश स्तेषां नारदश्चैव षोड़शः ।
इत्येते देवगन्धर्वा मौनेयाः परिकीर्त्तिताः ॥ ४८।६५ अ, आदि

परन्तु "मौनेयाः" इति संज्ञा नितरामिव अश्रुतपूर्वा इति। वस्तुतस्तु अत्रापि केनापि सनातनहिन्दुना "मानव्याः" इति पाठं कर्त्तित्वा खलु "मौनेया" इति

कृत: ! वस्तुतस्तु मूलतो महाभारतस्य एव पाठ: खलु प्राक् "मनु"रेव आसीत् इति गम्यते वाक्यान्तरात्—

अनवद्यां मनुवंशामसुरां मार्गणप्रियाम् ।४५।६५अ । आदिपर्व

अत्र—"अनवद्या" इति विशेषणात् मनोः खलु स्त्रीत्वं संसूच्यते एव। एतस्य श्लोकार्द्धस्य अन्ये अपि पाठा: लिपिकरप्रमादात् दूषिता अभवन्। एते एव शास्त्रदूषका विष्णुपुराणहरिवंशयोरपि "मनु" रिति पाठं कर्त्तित्वा "मुनि"रिति पाठं कृतवन्त इति। न केवल मेतत्, मनुसंहितायाः संस्करणकर्त्ता भृगु रपि "स्वयं अन्यः कश्चित् वा प्रक्षिप्तकारको देवानां प्रकरणे मनुष्यनामग्रहणं न कृत्वा मनुष्यं व्याघ्रभल्लूकादीनां प्रकरणे गृहीतवान्। यथा—

किन्नरान् वानरान् मत्स्यान् विविधांश्च विहङ्गमान्।
पशून् मृगान् मनुष्यांश्च व्यालांश्चोभयतोदत: ॥ ३८।१अ—मनु

तर्हि किं मनुष्याः कश्यपसन्ताना न ? अवश्यमेव, अन्यथा कथं तेषां मध्ये काश्यपगोत्रं समागतं ? कथं वा कश्यपात्मजवैवस्वतमनुवंश्या रामादयश्च मनुष्यमध्ये परिगणिता ! यम: किं वैवस्वतमनोः वैमात्रेयो भ्राता इति न ?

भवतु यावत् एवं भाष्यटीकाव्याख्यानादिषु महतीं भ्रान्तिं बहून् प्रमादांश्च संलक्ष्य अस्माभि: साम्प्रतम् ऋग्वेदस्य प्रकृतार्थवाहिनीति नाम काचित् अभिनव व्याख्या क्रियते। गीताब्रह्मसूत्रादीना मपि भाष्यादिकम् अतीव प्रमाददुष्टं अभूत्। तत् सर्वं सारस्वतकाण्डे प्रदर्शितं भवेत्। किं बहुना द्यावापृथिव्यौ किं तदपि ब्राह्मणनिरुक्तभाष्यकाराणां न परिज्ञात मासीत्।

सन्ति वेदेषु अन्येषु च ग्रन्थेषु बह्वर्थका बहुशब्दा एव। यथा"पृथिवी"इति शब्दो भूमण्डलमवबोधयति, तथा अयमेव शब्द: क्वचित् पृथोः पृथुल जनपदं भारतवर्षं मवबोधयेत् क्वचिद्वा अन्तरीक्षं क्वचित् वा उत्तमा पृथिवी इलावृतवर्षमपि अनेन अवबोधित मिति। तथा सवितृशब्द: क्वचित् जड़सूर्य्यस्य अवबोधक:, क्वचित् वा जगत्प्रसवितुर्भगवत: संसूचक: क्वचिद्वा शब्दोऽयं अदितिनन्दन विशेषस्य अवबोधक एव। एवं सूर्य्यशब्दोपि क्वचित् दिवाकरबोधक:, क्वचित् वा अदितिनन्दनविशेषस्य संसूचक: य: खलु सावर्णिमनो र्जनक: सामवेदमन्त्रसमाहर्त्ता च इति। क्वचित् अग्निशब्द: वह्निपर: क्वचित् वा नराग्निपरो य: खलु ऋग्वेदस्य मन्त्रसमाहर्त्ता बहूनां ब्राह्मणाना

मपि प्रपितामहश्च इति। क्वचित् वायुशब्दः प्रभञ्जनपरः क्वचित् वा यजुर्वेदस्य मन्त्रसमाहर्त्तृविशेषः, यः खलु त्वष्टुर्जामाता इति। क्वचित् गोशब्दः गोनामकं पशुविशेष मसूचयत्, कुत्रचिद्वा तेनैव गोसंज्ञाभाजः केचित् देववंशीया नराः खगापुत्रा अवबोधिता इति। "गावो वै सत्र मासते ति" ऐ, ब्रा। येषां नेतृत्वं गत्वा शिवः शङ्करो वृषभध्वज इति आख्यां भेजे। एवं सर्पशब्देन क्वचित् वायुभुज आशीविषा अवबोधिताः, कुत्रचिद्वा सर्पाख्य-मानवाः कद्रुतनयाः संसूचिता इति। अतएव—

गावो वै सत्र मासत, वनस्पतयो वै सत्र मासत सर्पा वै सत्र मासत।

इत्यादिषु स्थलेषु प्रयुक्तौ गोसर्पशब्दौ नरसम्प्रदायविशेषौ सूचयतो नतु गाव आशीविषान् वा। तथा वनस्पतिशब्देन च यथा वटाश्वत्थादिमहावृक्षा अवबोध्यन्ते, तथा वनाना मधिपतयश्च देवमनुष्या अवबोधिताः स्युरिति। अतएव सायणेन यदुक्तं—

ननु वेदे क्वचित् एवं श्रूयते वनस्पतयः सत्र मासत, सर्पाः सत्र मासत, तत्र वनस्पतीना मचेतनत्वात् सर्पाणाञ्च चेतनत्वेऽपि विद्याराहित्यात् न तदनु-ष्ठानं सम्भवति। १८ पृ सायणस्य उपोद्घातप्रकरणम्।

तत्र कथमपि समीचीन मभूत्। आशीविषा विद्याहीना अत्र कोवितर्की वितण्डा वा? परन्तु सर्पाख्या नरा विद्याहीना न। दृश्यते च महाभारते—

पुत्रोऽयं मम सर्प्यां जातो महातपस्वी स्वाध्यायसम्पन्नः। १६-१म

पौष्यपर्व आदिपर्व।

एवं गोशब्देनापि बहवो देवमनुष्या खगानन्दना संसूचिता इति। उक्तञ्च सामवेदे ऋग्वेदे च।—

प्रहंसासस्तृपला वग्नु मच्छा मादस्तं वृषगणा अयासुः। ६०२ साम

तत्र सायणः—"हंसासः" शत्रुभिर्हन्यमाना हंसा इव आचरन्तो वा "वृषगणा" एतन्नामका ऋषयः।

एते हंसाख्यदेवा एव ब्रह्माधीना आसन्, अतस्तस्य नाम "हंसवाहन" इति। न तु हंसा एव वाहनं यस्य, तथा एते वृषभाख्या देवाएव शिव-नेतृत्वाधीना आसन्, (न तु शिवो वृषबलीवर्दारूढ़ इति) तेन शिवस्य

विशेषणं "वृषभध्वज" इति। अतएव "गावो वै सत्र मासत" अस्याः श्रुते र्यद् व्याख्यानं कृतं ब्राह्मणग्रन्थसायणहाउगादिभि स्तद् भ्रष्टमिति।

ऐतरेयव्याख्या······गवा मयनेन यन्ति गावो वै आदित्या × × गावो वै सत्र मासत—शफान् शृङ्गाणि सिषासत्यः, तासां दशमे मासि शफाः शृङ्गाणि अजायन्त। ता अब्रुवन् यस्मै कामाय अदीक्षामहि आपाम तमुत्तिष्ठाम इति। ता या उदतिष्ठन् ता एताः शृङ्गिण्यः—इति। ४८२ पृ। १८

सायणभाष्यम्······पुरा कदाचित् गवामभिमानिन्यो देवताः स्वकीयानां गोदेहानां पादगतान् शफान् शिरोगतानि शृङ्गाणि च सिषासत्यः प्राप्तुमिच्छन्त्यः सत्र मन्वतिष्ठन्। तासां दशमे मासि तदुभयं सम्पन्नं। ततस्ता गावः परस्पर मिद मब्रुवन्—यस्मै कामाय वय मदीक्षामहि सत्रदीक्षा मास्थवत्यः तं कामम् आपाम वयं प्राप्तवत्यः।

हाउगानुवादः······The cows held this sacrificial session, being hornless (and) desiring to obtain horns. Their session lasted (for) ten months; then when the horns grew (up), they said 'we have gained, let us rise, we have obtained the desire for which we sat (commenced the session).'' P. 196

कुहनाभिमतम्—kuhn thought that these cows should be understood as the red clouds of the morning. Arc. Home P. *202*

रामेन्द्रसुन्दरत्रिवेदी······गोगणेर अयन अनुष्ठित हय। आदित्यस्वरूप।—पुराकाले गो सकल शफ (खुर) ओ शृङ्ग पाइवार जन्य सत्रेर अनुष्ठान करियाछिल। दशम मासे ताहादेर शफ ओ शृङ्ग पाइयाछिल। ताहारा वलियाछिल, ये कामनाय आमरा (सत्रे) दीक्षा ग्रहण करियाछिलाम, ताहा पाइयाछि। एखन एइ सत्र हइते उठिया याइ, एइ वलिया याहारा उठिया गियाछिल, ताहारा शृङ्गधारी। २६२पृ

वस्तुतस्तु एते गावः शृङ्गपुच्छधारिण्यः पशवो न, परन्तु एते स्वगानन्दनाः काश्यपात्मजा नरदेवाः। त एव मनुष्या देवा यज्ञानुष्ठान माचरितवन्तः। परन्तु बहुदिनानि व्याप्य वेदाध्ययनाध्यापनाविहीनाः सन्तः भारतीयब्राह्मणग्रन्थ प्रणेतारस्तु श्रुतेः प्रकृतार्थावबोधे असमर्था यत् किमपि विप्रलपनं चक्रुरिति।

सायणोऽपि गड्डलिकाप्रवाहवत् तदनुसृतवान् । कुतः अभिमानिन्योदेवताः कुतो वा अधिष्ठात्री देवता भोः ? यदा भाष्यकाराः शङ्करादयः श्रुतेर्मन्त्रस्य प्रकृतमर्म्मबोधे असमर्था स्तदैव ते मिथ्याभिमानिन्याः देवतायाः प्रसङ्ग मवतारितवन्तो यत् किमपि व्याख्यातुं प्रभवाथ, परन्तु ब्राह्मणस्तु स्वयं वङ्गवासी एम ए उपाधिधारी रामेन्द्रसुन्दरः कथं चतुष्पाठीपठनसुलभभ्रान्तमतेः सायणस्य व्याख्याया अनुचकार, इत्येव महान् संक्षोभो मां चपलयति खलु । महामतिस्तिलकोऽप्यगमहोदयश्च इदं रूपकं (Mythology) अनुमेनाते, तत्र । अथ आदित्यानां वैमात्रेया गावो लोहितमेघ इत्यपि न ।

अथ बहवः सायणशिष्या वेदानां व्याख्याकारका आसन्, तेनैव बहुषु स्थलेषु व्याख्याविरोधः सञ्जात इति । "एव" शब्दः खलु आयुधार्थपरः । परन्तु एकेनैव सायणेन तस्य "वाहन" प्रभृतयो बहवो मिथ्या अर्थाश्च लिखिताः । एवम् "अप्तुरः" पदस्यापि अर्थकथने एक एव सायणो नानामूर्त्तिरभवत् ।

अथ भाषातत्त्वविद्यायाः (knowledge of Philology) अभावादपि सायणादयो व्याख्याविधौ प्रमादं गता इति ! यथा—

मूलम्······इन्द्रायाहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥ १।३ सू।१म

१ । उवटभाष्यम्······हे इन्द्र आगच्छ, धिया स्वकीयया बुद्ध्या इषितः प्रेषितः अनन्यप्रेषित इत्यभिप्रायः । विप्रजूतः जूतिर्गतिः प्रीतिर्वा । मेधावी अनुगतः सुतावतः अभिषुतवतः यजमानस्य कर्म । किमिति आगन्तव्यमिति चेत् उप समीपे ब्रह्माणि हवींषि वर्त्तन्ते उप पुरोडाशान् ऋत्विजो वर्त्तन्ते इत्यर्थः । वाघतः इति ऋत्विङ्नामसु पठितम् ।

२ । तत्र सायणभाष्यम्······हे इन्द्र ! त्वम् आयाहि, अस्मिन् कर्मणि आगच्छ । किमर्थं ? वाघत ऋत्विजो ब्रह्माणि वेदरूपाणि स्तोत्राणि उप एतुम् । कीदृशस्त्वम् ? धिया अस्मदीयया प्रज्ञया इषितः प्राप्तः अस्मद्भक्त्या प्रेरित इत्यर्थः । विप्रजूतः यथा यजमानभक्त्या प्रेरित स्तथा अन्यैरपि विप्रैर्मेधाविभिः प्रेरितः । कीदृशस्य ?—वाघतः सुतावतः अभिषुतसोमयुक्तस्य ।

३ । महीधरभाष्यम्·········हे इन्द्र ! धिया अनुबुद्ध्या इषितः प्रेरितः सन्

आयाहि अननाप्रेरित आगच्छ इत्यर्थः। कीदृशस्त्वं ? विप्रजूतः जुगतो विप्रैः मेधाविभि रनुगतः सेवितः। किमिति आगन्तव्य मिति चेत् सुतावतः छान्दसोदीर्घः, सुतवतः सोम मभिषुतवतो यजमानस्य ब्रह्माणि हवींषि उप हविषां समीपे वाघतः ऋत्विजो वर्त्तन्ते, इति शेषः। ऋत्विजो हविरादाय स्थिता वर्त्तन्ते इति आयाहि इत्यर्थः।

४। दयानन्दभाष्यम्······इन्द्र परमेश्वर आयाहि प्राप्तोभव, धिया प्रकृष्टज्ञान युक्तया बुद्ध्या उत्तमकर्म्मणा वा, इषितः प्रापयितव्यो विप्रजूतः—विप्रैर्मेधाविभि र्विद्वद्भिर्ज्ञातः।

५। रमानाथघोषसरस्वतीभाष्यम् ···हे इन्द्र त्वं धिया अस्मद्भक्त्या इषितः प्रेरितोविप्रैः मेधाविभिर्ऋत्विग्भिर्जूतः प्रेरितश्च सन् सुतावतः सुतवतः संस्कृतसोमविशिष्टस्य वाघत ऋत्विजो ब्रह्माणि वेदमन्त्ररूपाणि स्तोत्राणि उप उपेतुम् अस्मिन् यज्ञे आयाहि आगच्छ।

६। दत्तजानुवादः·····हे इन्द्र आमादिगेर भक्तिद्वारा आकृष्ट हइया मेधावी दिगेर द्वारा आहूत हइया अभिषवकारी ऋत्विकेर स्तोत्र ग्रहण करिते आइस।

७। स्वाभिमतम्—अत्र "इषितः" तथा "विप्रजूतः" इति पदद्वयस्य सायणादिभिर्यत् प्रेषितः, विप्रप्रेरितश्च इति व्याख्यानं कृतं, तन्न समीचीनं बभूव। यतः उपास्यो देवो न प्रेरितः स्यात्। वस्तुतस्तु इषितो वाञ्छित इष्टः,तथा "विप्रजूतः" विप्रैराहूत इत्येवार्थो भवेत्। भाषाविकारात् "हूत" इति पदं "जूतः" अभवत्। भाषाया विकारकाले प्रायेण हकारो दकारश्च जकारो भवति। यथा—

वाहु······वाजु, अहम्······अजेम् (Zend), विद्या······विज्जा (नाटकादौ)

पादसा······पाजसा (बृहदारण्यके) विद्युत्······विजुली (बङ्गभाषायां)।

अतएव "विप्रजूतः" इति पदस्य प्रकृतावस्था "विप्रहूतः" प्रकृतार्थश्च विप्राहूत इति। तथाहि—

युवं श्वेतं पेदवे इन्द्रजूतम् अहिहन मश्विनाऽदत्त मश्वम्। ८।११८।१ म

तत्र सायणः······इन्द्रजूतं इन्द्रेण युवाभ्यां गमितं दत्तमित्यर्थः।

दयानन्दभाष्यम्······युवं श्वेतं पेदवे गमनागमनाय इन्द्रजूतं सभाध्यक्षेण प्रेरितम्।

वस्तुतस्तु एतत् जूतम् इति पदं जुधातोर्निष्ठाप्रत्ययेन सिद्धं जुतं गतं प्राप्तं इन्द्रागतमिति यावत् दीर्घत्वं छान्दसम् ।

अथ "वाघतः" पदमेतत् केन प्रकारेण सिद्धं, तदपि सामाजिकैः खलु परिचिन्तनीय मिति । निघण्टुकारस्तु एतत् निरदिशत्—

विप्रः, कविः, मनीषो, "वाघतः" इति चतुर्विंशति मेधाविनामानि । २७६पृ

तत्र देवराजयज्वा……वहेः संयत्तृम्यद्वहत् (उ २।८८) इति प्रत्ययः उपधावृद्धिः, हकारस्य घकारश्च निपात्यते । निवहति यज्ञ्यार्थान् । "विप्रो शमी तरणित्वे न वाघतः" (४-११०सू । १म) इति निगमः । तथाहि—

भारताः, कुरवः, वाघतः, सबाधः, देवयवः ।

इति अष्टौ ऋत्विङ् नामानि । २८६पृ निघण्टु ।

तत्र देवराजयज्वा……व्याख्यातं मेधाविनामसु (२८१ पृ), वहन्ति हवींषि । "उ प ब्रह्माणि वाघतः" । (५।२सू—१म) इति निगमः ।

परन्तु अनेन एवं किमपि न सिध्यति यत् अयं शब्दः "वाघत्" इत्यं हसन्त इति । सायणस्तु "मूर्द्ध्नो विश्वस्य वाघतः" (१३।२६।६म), इत्यत्रापि "वाघतः" इति पदं "अथर्वा"इति पदस्य विशेषणं न कृत्वा स"वाघतः वाहकात् पुष्करात्" इत्येवार्थं कृतवान्, परन्तु तदपि न साधीय इति ।

वस्तुतस्तु यथा सामवेदे "वीतये" पदं "पीतये" पदात्, कयादः शब्दः क्रव्याद शब्दात् समायातः, तद्वत् एव "वाघत" शब्दोऽपि "वाग्धत" इति शब्दात् अपभ्रंशेन समागत इति । वाचं हन्ति गच्छति (हन लौ हिंसागत्योः) इति "वाग् घत" । ततः पुंसि प्रथमाया एकवचने "वाग् घतः" इति, ततः अपभ्रंशेन "वाघतः" इति पदं सिद्धं बभूव । अर्थस्तु वाचंगमः—पण्डितो वाग्मीश इति । वस्तुतस्तु स्वर्गाः पारलौकिका देवाः पारलौकिकाः वयमपि मूलतो भारत वासिनः, वेदचतुष्टयं केवलं भारतीयं, वेदा अभ्रान्ता उपनिषदोपि अभ्रान्ता ब्राह्मणग्रन्था अभ्रान्ताः ते च वेदाश्च, किं बहुना बहुप्रमादभूमियास्कनिरुक्तमपि अभ्रान्तं,केवलं यज्ञसिद्धये एव वेदमन्त्राः प्रणीताः सर्वेषामेव मन्त्राणां विनियोगा देवताश्च सन्ति, एतया भ्रान्त्या न केऽपि भाष्यकारा वेदानां मन्वादिसंहितानां ब्रह्मसूत्रादीनां गीतायाश्च वा प्रकृतार्थनिर्णयने समर्था अभवन् । अथ पाश्चात्या अपि अशेषशेमुषीशालिनो यास्कानुवर्त्तनात् स्वैराश्च वेदव्याख्याने प्रमादं गताः ।

अतोऽस्माभिः प्रकृतार्थवाहिनीति नाम ऋग्वेदव्याख्या प्रणीयते। परन्तु बह्वर्थ व्ययसापेक्षत्वात् धनिनामपि पात्रापात्रविचाररहित्यात् सहृदयताभावाच्च न मे आशेयं फलवती स्यादिति।

विदेशे देशे वा यति यति हि सन्तीह धनिनः।
तथाविद्वद्गोष्ठी भवतु मम सिद्धौ सकरुणा।
भवेत् याने स्तीर्णः शिशुरपि महोर्म्यां निपतितः,
कर्णोमेघाम्बूनां परिणमति बीजं महिरुहे॥

भौगोलिकप्रकरणम्।

यास्कोवटसायणमहीधरदयानन्दशङ्करमेधातिथिप्रभृतयो भाष्यकाराः पाश्चात्त्याश्च वैदिकग्रन्थेषु प्रयुक्तानां भौगोलिकशब्दानां प्रकृतार्थावबोधे समर्था न अभवन्। न केवलं ते अर्वाचीना, बह्वोवैदिकर्षयश्च तत्र बोधवैकल्यं प्रादर्शयन्। तेन बहुषु वेदमन्त्रेषु दिव्यवोरेकत्वं दृश्यते, तेषां पारलौकिकत्वं गगनत्वञ्च लक्ष्यते। द्यावापृथिव्यौ किं? अन्तरीक्षं किं, तदपि मत्पूर्व्ववर्त्तिभिः कैरपि भाष्यकारैः कोषकारैश्च न चिन्तितमिति। किं बहुना कश्चित् ऋषिरपि प्राक्तनो यजुर्वेदे इत्थमाचिक्षेप—

को अस्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम् ॥५८।२३अ

एतेन इदमेव आयातं यत्, यदा एष मन्त्रो विरचित स्तदा मानवानामादि निकेतनं (नाभिः) किं? द्यावापृथिवी शब्देन अन्तरीक्षशब्देन च किं किं स्थानमवबोधितं स्यात्, तत्र केनापि परिज्ञातमिति। अतो निरपराधा भाष्यकारा वेदपुराणानां प्रामादिकप्रयोगदर्शनात् अन्तरीक्षं गगनमेवं मेनिरे, द्यावापृथिव्योरपि व्याख्यानकाले ते केवलं द्यावापृथिवी रोदसी, रोदसी द्यावापृथिवी, इत्यं शाब्दमाश्रित्य विदायं (वस्तु,तस्तु, रेहाइ) जग्टहुरिति। अतो वयं तदयवनिकाया उत्तोलनार्थं भौगोलिकतत्त्वं किमपि वैदिकं ब्रूमः।

स्वः—स्वर्लोकः ।

"भूर्भुवः स्वः" त्रिभुवनम् । तत्र स्वरेव आदिस्वर्ग आदिनिकेतनं नाभिरिति, तदेव सर्वेभ्यो जनपदेभ्यश्च प्राचीन मिति । तस्य आदिनामधेयकं "यज्ञ" (अध्वर) इति । तदुत्पत्ति माह ऋग्वेदः—

परो दिवा पर एना पृथिव्या, परो देवेभिरसुरैर्यदस्ति ।

कंस्वित् गर्भं प्रथमं दध्रे आपो, यत्र देवाः समपश्यन्त विश्वे ॥५।८२।१०म

आपः अनन्तजलराशयः, प्रथमं सर्वादौ कंस्वित् कमपि गर्भं गर्भप्रसूतसन्तानवत् कमपि जनपदं दध्रे दधिरे। सर्वादौ समुद्रगर्भे कश्चित् जनपदः स्थले परिणतो बभूव। स गर्भं आदिजनपदो दिवा द्युलोकेन सह पृथिव्या भारतवर्षेण च सह तुलनया परः श्रेष्ठो, देवेभिः देवैः असुरैश्च सह तुलनया परः प्रधानः अस्ति भवति। देवाः स्वायम्भुवमनुदक्षमरीचिकश्यप-भृगुब्रह्मेन्द्रशिवविष्णु प्रभृतयो यत्र यस्मिन् आदिजनपदे विश्वे विश्वान् (विभक्तिकारकव्यत्ययः) सर्वान् मनुष्यपशुपक्षिप्रभृतीन् प्राणिनः समपश्यन्त दृष्टवन्तः । पूर्व्वं तावत् तस्मिन् आदिनिकेतने सर्वे एव आसन्,जनपदान्तराभावात् तत्रैव जन्मग्रहणाच्च । तथाहि—

आपो ह यत् बृहती विश्वमायन् गर्भं दधानाः । ७

यत् या बृहती वृहत्य आपो जलराशयो विश्वं समग्रभूमण्डलं आयन् व्याप्नुवन्, ता आपो गर्भं कश्चित् जनपदं दधाना धृतवत्यः । अनन्तसमुद्रगर्भे सर्वादौ एकोजनपदः समुत्पन्नः इति । तस्य जनपदस्य नामधेयकं किं ? तदुक्तम्—

आपो महिना दक्षं दधाना जनयन्तीर्यज्ञम् ।८।१२१।१०म

ता आपो जलराशयो महिना निजमहिम्ना दक्षं शक्तिं दधानाः धारयन्त्यः सत्यः यज्ञं यज्ञनामानं जनपदं जनयन्तीः जनयन्त्यः अजनयन् इति ।

स एव यज्ञो जनपदो मानवानां नाभिरादिसूतिकागार इति । उक्तञ्च—

यो यज्ञो विश्वतस्तन्तुभिस्ततः ।१।१३०।१०म

यो यज्ञो जनपदो विश्वतः सर्वासु दिक्षु तन्तुभिः तन्तून् प्रजा औपनिवेशिकान् ततः विस्तारितवान् । उक्तञ्च—

ये विश्वा भुवना अभिप्रतस्थुः १५।६५।१०म

ये तन्तवो देवा नाना भुवनानि प्रति प्रतस्थुर्गतवन्त इति । तथाहि—

पृच्छामि यत्र भुवनस्य नाभिः । ३४।१६४।१म—६२।२३अ यजुर्वेदः ।
कश्चित् ऋषिरन्यं पृच्छति यत्र यस्मिन् स्थाने भुवनस्य समग्रभूमण्डलस्य सर्वासां नरनारीणां नाभिरुत्पत्ति र्बभूव, तत्स्थानं किम् ?

अयं यज्ञो भुवनस्य नाभिः ।३५।१६४।१म ।६२—२३अ यजुः ।

स पृष्ट ऋषिरुवाच—अयमस्माभिरध्युषितो यज्ञोजनपदो भुवनस्य जगतां सर्वेषां नाभिराद्युत्पत्तिस्थानम् ।

नाभिशब्देन उत्पत्ति रुत्पत्तिस्थानञ्च अवबोधितं स्यात् किमत्र प्रमाणं ?

नाभिशब्दस्य मुख्यार्थो नाभिदेश (नाइ, Navei) यथा देहमध्यस्थले नाभिर्वर्त्तते, तथा मानवानामाद्युत्पत्तिस्थानं यज्ञश्च मङ्गा अपि अन्येषाम् अष्टवर्षाणां मध्यस्थले वर्त्तते, तेन अस्य नामान्तरं नाभिरिति । यज्ञ उत्पत्ति-स्थानं यज्ञे उत्पत्तिरभूत्, अस्य नाभिशब्दस्यापि द्वौ अर्थौ विद्येते ।

१ । उत्पत्त्यर्थः······सनाभयः—समानो नाभि रुत्पत्ति र्येषां ते । दिवि मे नाभा (४।७८।८म) । अमी ये सप्तरश्मयस्तत्र मे नाभिः (८।१०५।१म) ।

२ । उत्पत्तिस्थानार्थः······इयं मे नाभिः (१८।६१।१०म) सा नो नाभिः (१८।६१।१०) । अमृतस्य नाभिः (१५।८०।८म) ।

तत्कथं सायणो नाभिः"नहनं," "बन्धिका,""भौमरसः"—इत्यादिकं विप्रल-पितवान् ? पारलौकिकः स्वर्गः कथं भौममानवानां जन्मभूमिर्भवेत् इत्याशङ्कया तैर्यत् किमपि विप्रलपितमिति । परन्तु सायणस्यैव कश्चित् चक्षुष्मान् शिष्यो नाभिशब्दस्य प्रकृतार्थं प्रकटितवान्—

सा नो नाभिः परमं जामि तन्नौ ।४।१०।१०म

तत्र सायणः—सा प्रसिद्धा योषा नौ आवयो र्नाभिरुत्पत्तिस्थानम् ।

कथमादिनिकेतनस्य नामधेयं यज्ञ इति बभूव ? सर्वादौ आदिस्वर्गे यज्ञानुष्ठानं प्रवर्त्तितं स्यात् तेन देवयजनभूमेस्तस्या यज्ञ इति नाम(ऋतस्य मातरा द्यावापृथिवी) । आदिनिकेतनस्य इदमेव यज्ञनाम प्राथमिकमिति । ततो यज्ञोऽयं केन केन नाम्ना प्रख्यातो बभूव ?

कालक्रमेण अस्य यज्ञस्य द्यौः, स्वः, व्योम, आकाशं, पुष्करं, गौः, नाकः, इला (इलावृतवर्षं), मङ्गः, इत्येवमादीनि नामानि अभवन् ।

यज्ञस्यैव स्वरिति नाम बभूव, किमत्र प्रमाणम्. अस्मिन् महामतिर्महीधरो यजुर्व्याख्याया मिमां श्रुति मध्याहृतवान्, (११।२ अ भाष्ये)—

"यज्ञो वै स्वः अहर्देवाः सूर्य्यः" इति श्रुतिः (१।१।२।२२) ।

स्वर्गहेतुत्वादपि स्वःशब्देन यज्ञः । २१पृ ।

अतएव अनेन प्रमाणेन स्वर्यज्ञयोरभिन्नत्वं सम्पाद्यते। अथ यज्ञोनाभिः (आद्युत्पत्तिस्थानं), द्यौरपि नाभिरतस्तयोरपि साम्यमिति। उक्तञ्च—

द्यौर्नः पिता जनिता नाभिरत्र ।३३।१६४।१म

अतएव यज्ञेन सह द्योः साम्यं संलक्ष्यते। अथ द्यौरपि पिता (सर्वेषां जनयितृत्वात् पितृत्वम् इति प्रश्नोपनिषद्भाष्ये शिष्यः शङ्करः) पक्षान्तरे स्वरपि पिता इति वेदचतुष्टयं कथयति—

आयं गौः पृश्निरक्रमीत् असदत् मातरं पुरः। पितरञ्च प्रयन् स्वः॥१।१८८।१०म

अयं पुरोवर्त्ती गौर्दिवाकरः पुरः पूर्वं मातरं पृथिवीं भारतवर्षमिति यावत् असदत् अगच्छत्,तत्र पूर्वम् उदेति स्म, पश्चात् पृश्निः पृश्निम् अन्तरीक्षम् अक्रमीत् अगच्छत् तत्र पदविक्षेपं कृतवान्, ततः पितरं पितृभूमिं मानवानामादिनिकेतनं स्वश्च आदिस्वर्गं द्यां च प्रयन् गच्छन् वर्त्तते इति शेषः ।

एतेन दिवाकरस्य त्रिभुवनभ्रमणं व्यज्यते। कथं ? यदा एष मन्त्रो विरचितो बभूव, तदा "भूर्भुवः स्वः" इति लोकत्रयं विना लोकान्तरं नासीत् ।

अथ स्वर्देवलोकः, यज्ञोपि देवलोक इति तैत्तिरीयब्राह्मणवचनात् प्रतीयते यथा—

एतत् खलु वै देवानामपराजित मायतनं यत् यज्ञः । ८४५पृ

अतएव यदा यज्ञोनाभिः, द्यौरपि नाभिः, द्यौरपि पिता, स्वरपि पिता, स्वरपि देवलोकः, यज्ञोपि देवलोकः, तदा कथं तेषां यज्ञद्योस्वर्लोकानां साम्यं न भवेत् ।

कथं यज्ञस्य नाभित्वं परिकल्पितं ? एतत् न खलु, कल्पितं, परन्तु परमार्थत एव यज्ञो जनपदो आदिमानवस्य अग्निरुत्पत्तिस्थानमिति गम्यते आप्तवाक्यात् । उक्तञ्च—यज्ञो वे विशः । ५०७ यजुः । तथाहि—

आपो ह यद् बृहती विश्वमायन्, गर्भं दधाना जनयन्तीरग्निम् ।

ततो देवानां समवर्त्ततासुरेकः,कस्मै देवाय हविषा विधेम ॥७।१२१।१०म

यत् या हृहती हृहत्य आप: अनन्तजलराशय: ता विश्वं समग्रं भूमण्डल मायन् व्याप्नुवन्, ता गर्भं यज्ञजनपदं दधाना जनयन्त्य: तत्र अपि आदिमानव मग्निं जनयन्तीः जनयन्त्य:, उत्पादयामासुरिति। तत स्तदनन्तरम् एक: स: अग्निरादिमानवो देवानां स्वायम्भुवमनुदक्षधर्म्ममरीचिभृगुनारदब्रह्मविष्णुशिवेन्द्रादीनाम् असु: प्राणा निदानमिति यावत् समवर्त्तत बभूव। तस्मात् आदिमानवादग्ने: सर्वे देवादयोजाता इति भाव:। वयं कस्मै देवाय हविषा हविर्द्रव्येण विधेम पूजयाम।

अग्निरादिमानव: कथमेतदुक्तम् ? आदिमानवस्य पिता माता च नासीत्। नामापि किञ्चित् नासीत् तदानीन्तनानां नामरक्षणबुद्धेरभावात्। पश्चात् ऋषय: केऽपि निरङ्कुशा: स्वयमेव तस्य—

हिरण्यगर्भ:, लोकपितामहो ब्रह्मा, विराट् अग्निश्च,

एतानि नामानि परिकल्पितवन्त इति। १।१२१।१०म।८।१ष मनु:।५।८०।१०म। ७।१२१।१०म। तथाहि हृहदारण्यकम्—

आपो वै अर्क:, यदपां शर आसीत्, तत् समहन्यत। सा पृथिवी अभवत्, तस्याम् अश्राम्यत्, तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्त्तत अग्नि:। ४२पृ।

तत्र शङ्करभाष्यम्……तस्य श्रान्तस्य सन्तप्तस्य खिन्नस्य तेजोरस: सारो निरवर्त्तत प्रजापतिशरीरात् निष्क्रान्त इत्यर्थ:। कोऽसौ निष्क्रान्त: ? अग्नि:, स: अण्डस्य अन्तर्विराट् प्रजापति: प्रथमज:। कार्य्यकारणसंघातवान् जात: "स वै शरीरी प्रथम" इति स्मरणात् (वायुपुराणम्)।

वृत्रं यज्ञो द्यौ:, स्वश्च, अभिन्नमिति। परन्तु कथं द्यवा सह इलाहतस्य साम्यं संगच्छते ?

द्यौरिलाहतवर्षम्।

कथं द्यौरिला अभिन्ना, तत् प्रदर्श्यते। पूर्वं तावत् प्रदर्शितं—

द्यौर्न: पिता जनिता नाभिरत्र।३३।१६४।१म

द्यौरेव अस्माकं पिता पितृलोक: (Father land) जनिता जनयिता जनयित्री, अस्माकं पूर्वपितामहानां वैवस्वतमन्वत्रिप्रभृतीनां तत्रैव नाभिरुत्पत्तिरभूत्,पश्चात् इदमपि आयाति यत् इला इलाहतवर्षमपि नाभिरिति। उक्तञ्च यजुषि— (१।२८ष)।

होता यक्षत् समिधा इन्द्रमिड़स्पदे नाभा पृथिव्या अधि। ६२३पृ-तै-ब्रा:।

इलाया स्त्वापदे वयं नाभा पृथिव्या अधि। जातवेदो निधोमहि ।४।२८।२म

अग्निर्नाभा पृथिव्या जातः पदे इलायाः। ६।१।१०म

अतएव इलायाः पदं इलावृतवर्षं * खलु पृथिव्या नाभा नाभिरिति यावत्।

अभि न इला यूथस्य माता ।१८।४१।५म। इला इलावृतवर्षं यूथस्य आदि मनुष्ययूथस्य आदिहस्तियूथस्य, आदिसिंहयूथस्य, आदिपक्षियूथस्य च माता मातृभूमिरिति। अतएव पृथिव्या नाभिः पिता द्यौः, पिता स्वः, नाभिः रिला स्वर्यञ्च परस्पर मभिन्ना इति। तथाहि—वायुपुराणम्—

वेद्यर्द्धं दक्षिणे त्रीणि त्रीणि वर्षाणि चोत्तरे।२२
तयोर्मध्ये तु विज्ञेयं मेरुमध्य मिलावृतम्॥ २२
तत्र देवगणाः सर्वे गन्धर्वोरगराक्षसाः।
शैलराजे प्रदृश्यन्ते शुभाश्चाप्सरसां गणाः। ५५

इला उत्तरवेदी (एतद्वै इलायास्पदं यत् उत्तरवेदी नाभिः ऐतरेयब्राह्मणम्। ११८पृ), पृथिव्याः शेषोत्तरसीमा, तस्या उत्तरस्यां दिशि रम्यकहिरण्मयोत्तर कुरुवर्षाणि, दक्षिणस्यां दिशि हरिवर्षकिम्पुरुषवर्षभारतवर्षाणि; तयोर्वेदद्वययो र्मध्ये अवस्थितोजनपद इलावृतवर्षमिति। तस्य इलावृतवर्षस्य च मध्ये मेरुर्नाम पर्वतो विद्यते, स च मेरुपर्वतो देवादीनां निवास स्थ इति। तथाहि—

स तु मेरुः परिवृतो भुवनैर्भूतभावनः।
चत्वारो यस्य देशा वै नानापार्श्वेष्वधिष्ठिताः॥ ५६।२४श्रे

स तु भूतभावनो मेरुपर्वतो भुवनैः परितोनववर्षैः परिवृतो वेष्टितः। यस्य उदीच्याम् उत्तरकुरवः, दक्षिणस्यां भारतवर्षं, पूर्वस्यां भद्राश्ववर्षं, प्रतीच्यां केतुमालवर्षं, स तु नाभिवत् सर्वेषां मध्ये अवस्थितः। अतएव मेरुपर्वत-सनाथ मिलावृतवर्षमपि नाभिरिति प्रणीयते वायुना। उक्तञ्च—

स तु मेरुर्भूतभावनः

स मेरु-पर्वतो भूतानां मनुष्यपशुपक्षिप्रभृतीनां प्राणिनां भावनः (भावयति

* महाराजस्य आग्नीध्रस्य नवपुत्राः, तत्र "इलावृतः" इति नाम कश्चिदासीत्। तदधीनं वर्षम् इलावृतवर्षमिति। इला तु इलावृतवर्ष-शब्दस्य नामैकदेश इति। "इलावृत" शब्द एव विकारेण ग्रीकभाषायां Elysion एवं लाटिन भाषायां Elysium इति आकारं प्राप्तवान्।

उत्पादयति इति भावनः) उत्पादक इति। अतएव इलाव्रतवर्षमेव सर्वेषामादि निकेतन मित्यपि गम्यते। तथाहि—कृष्णयजुः—

सं पश्यामि प्रजा अहम् इड़प्रजसीमानवीः।

पशवो वै उत्तरवेदी। ४१८पृ—पशवो वै इड़ा। १५५।४०१पृ

सर्वाः प्रजाः मनुप्रभवाः सर्वे पशवो ग्राम्याः सप्त मनुष्यादयः आरण्याश्च सप्त सिंह भल्लुकादयः, इड़ा इलाव्रतवर्ष प्रभवा इति।

अतएव अनेन द्योरिलाव्रतवर्षस्य च अभिन्नत्वं प्रतीयते, आद्युत्पत्तिस्थानत्वात्। तथाहि—

अग्निरमृतो भवति एनं द्यौर्जनयत्। दिवस्परि प्रथमं जज्ञे अग्निः ८।१४५सू।१०म ऋषिरेष प्रमादादेव "दिवस्परि" इति विरचितवान्। वस्तुतस्तु यदा आदिस्वर्गे द्यवि अथर्वणा अग्निरुत्पादितो यज्ञानुष्ठानञ्च प्रवर्त्तितमभूत्, तदा दिवः उत्पत्तिरपि नाभूत्। तदा उत्तरवेदी इला एव पृथिव्या उत्तरसीमा आसीत् उक्तञ्च—

स समुद्र उत्तरतः प्राज्वलत्, भूम्यन्तेन, एष वाव स समुद्रः। यश्चात्वालः एष उ वैव स भूम्यन्तः, यद्वेद्यन्तः। २६८पृ। सुवर्गो वै लोकः काष्ठा। २४१पृ तैः ब्राः (यदा सुवर्ग आदिस्वर्ग आसीत्)। एतावती वै पृथिवी यावती वेदी। इति श्रुतिः। इड़ायै वै एषा विभक्तिः।३४८पृ। कृष्णयजुः।

वेदी इलाव्रतवर्ष यत्पर्य्यन्तं प्रसारिता ऽऽसीत्, तत्पर्य्यन्तमेव पृथिवी, तदेव पृथिव्याः शेषसीमा, सुवर्गः स्वरेव द्यौः पराकाष्ठा शेषसीमा आसीत्। द्यावा पृथिव्यौ ऋतस्य यज्ञस्य मातरौ न तु दिव्। अनेनापि दिवः अर्वाचीनत्वं गम्यते। अतएव दिवस्परि इति न "द्योष्परि" इत्येव भवेत्

अर्थात् द्यौरादिस्वर्गः अग्निम् अजनयत्, तत्रैव अथर्वा प्रथमम् अरणी संघर्षणेन, अग्निमुदपादयदिति, पक्षान्तरे च दृश्यते—

अग्ने इला समिध्यसे।२।२४।२म। इलायाः पुत्रो अजनिष्ट (अग्निः)।२।२८।३म अग्निर्नाभा पृथिव्या जातः पदे इलायाः।६।१।१०म। अग्निः प्रथम इलस्पदे समिद्धः।१।१०।२म

एकत्र ऋषिर्वदति अग्निः सर्वादौ द्यवि प्रज्वालितः, ऋषिरन्यत्र कथयति

अग्निः सर्व्वादो इलः पट्टे प्रज्वालितः। स इलायाः पुत्रश्च, अतएव द्योरिव इला इलावृतवर्षं वा इति ।

इलावृतवर्षमेव मङ्गः (मङ्गलिया)

महर्षिवायुना उक्तं—"मेरुमध्यम् इलावृतम्" इलावृतवर्षस्य मध्ये एव मेरुपर्वतोविद्यते। पक्षान्तरे वर्त्तमानमङ्गदेशस्य अभ्यन्तरभागेऽपि कश्चित् "आलटाइ" इति नाम पर्वतो विराजमान इति ।

"आलटाइ"

इत्येष शब्दः कस्मात् समायातः ? वयं मन्यामहे "इलास्थायी" इति शब्दस्य अपभ्रंशादेव "आलटाई" शब्दः प्रसूत इति। अतएव आलटाइ इति पर्व्वत एव मेरुपर्वत इति अनुमातुं शक्यते ।

अथ यथा इलावृतवर्षम् अष्टवर्षैः परिवृतं, तथा मङ्गदेशोपि सर्वेषां जनपदानां मध्ये अवस्थित इति मङ्गेन सह इलावृतस्य साम्यं सङ्गच्छते। तथाहि—

इलावृतवर्षं मेरुपर्वतश्च देवनिवास आसीत्? एष मङ्गदेशोऽपि देव निवास आसीत्। यदाह भीष्मपर्व—

मङ्गा ब्राह्मणभूयिष्ठाः स्वकर्म्मनिरता नृप। २६-११अ। भीष्मपर्व।

मङ्गा मङ्गदेशो (मङ्गलिया) ब्राह्मणभूयिष्ठा बहु-ब्राह्मणानां वासस्थानं, पक्षान्तरे ब्राह्मणा एव देवाः। यथा—

आग्नेयो वै ब्राह्मणः, सौम्यो वै ब्राह्मणः। ३००पृ। तैः ब्राः। अग्ने महानसि ब्राह्मणभारत। ८७६। एते खलु वावा आदित्या यद् ब्राह्मणाः। ५६पृ। दैव्यो वै वर्णो ब्राह्मणः। १०८। ब्राह्मणा वै सर्वा देवताः। १८५ तैः ब्राः। "एते वै देवाः प्रत्यक्षं यद् ब्राह्मणा" इति श्रुतिः। १२७ पृ छान्दोग्य। तथाहि पोककः—

That devas are Brahmanas, for such is the ordinary acception of the title, India in greece P. 162.

अतएव देवापरनामभिर्ब्राह्मणैरेव अध्युषितो मङ्गजनपद एव देवनिवास इलावृतवर्षं मिति गम्यते ।

अथ पुष्करशब्दः

पुष्करशब्दोपि आदिस्वर्गस्य अवबोधक इति कथ मनुमीयते? शास्त्र प्रमाणात्। यथा—

त्वामग्ने पुष्करादधि अथर्वा निरमन्थत।

मूर्द्ध्नो विश्वस्य वाघतः ॥१३।१६।६म

हे अग्ने वाघतो मेधावी—अथर्वा सुरज्येष्ठब्रह्मणो ज्येष्ठः पुत्रोऽथर्वा ऋषिः त्वां विश्वस्य सर्वस्य जगतो मूर्द्ध्नो मस्तकस्वरूपात् पुष्करादधि पुष्करजनपदस्य उपरि निरमन्थत अरणीसंघर्षणेन उत्पादितवान्।

अथर्वा एव प्रथमाग्निप्रज्वालकः, स एव प्रथमो यज्ञकर्त्ता, अतएव अनेनैव वयमनुमातुं शक्यामहे यत् द्यौः, इला, एव स पुष्करजनपदस्य अभिन्ना एव।

अथ पुष्करं पद्मं, ब्रह्मापि सुरज्येष्ठः पद्मजन्मा, अब्जयोनि रिति। गोपथ ब्राह्मणमपि उक्तवत्—

ब्रह्म ब्रह्माणं पुष्करे ससृजे। ७ष्ट

अतएव पुष्करजनपदस्य आदिस्वर्गत्वं स्वीकर्त्तुं युज्यते प्रसङ्गप्रभावात्। उक्तञ्च—योगियाज्ञवल्क्येन—

तपसा सुसन्तप्तस्य आदिस्वर्गात् स्वयम्भुवः।

ओङ्कारपूर्वा गायत्री निर्जगाम ततो मुखात् ॥७६ष्ट ब्राह्मणसर्वस्वम्।

अतएव पुष्कर एव एष आदिस्वर्गः। तथाहि—भास्कराचार्य्यैः—

निषधनीलसुगन्धसुमाल्यकैः, अलमिलावृत मावृत मावभौ।

अमरकेलिकुलायसमाकुलं रुचिरकाञ्चनचित्रमहीतलम् ॥ २०

इह हि मेरुगिरिः किल मध्यगः, कनकरत्नमयस्त्रिदशालयः।

द्रुहिणजन्मकुपद्मजकर्णिका, इति च पुराणविदोऽसमवर्णयन् ॥ २१

सिद्धान्तशिरोमणिभुवनकोषः।

अत आचार्य्यः खलु इलावृतवर्षमेव कु (पृथिवी) पद्मं, तथा तन्मध्यगं मेरुपर्वतमेव कर्णिका इति अवोचत्। अतएव ब्रह्मा खलु आदिस्वर्गेलावृतवर्ष प्रभव इति प्रमीयते। तथाहि वायुपुराणम्—

ब्रह्मणः पद्मयोनित्वं रुद्रत्वं शङ्करस्य च। १।२१ अ

अव्यक्तात् पृथिवीपद्मं मेरुपर्वतकर्णिकम्। ३७

तस्मिन् पद्मे समुत्पन्नोदेवदेव श्चतुर्म्मुखः ॥ ४१।२४अ

अत्रापि वायुना इलावृतवर्ष मेव (द्यौरेव) पृथिवीपद्मशब्देन संसूचितमिति। (द्यौरिला उत्तमा पृथिवी इति ऋग्वेदः। ८।१०८।१म), तत्र मेरुपर्वत स्तस्य पद्मस्य कर्णिका, ब्रह्मा तत्प्रभवः, अतएव स पद्मजन्मा (पुष्करजन्मा) इति। अतएव पुष्कर एव द्यौरादि स्वर्ग इति गम्यते। अनेनैव निघण्टुकारः, पुष्कर शब्दं स्वर्गीयान्तरीक्षपर्य्याये गृहीतवान्।

अथ व्योमशब्दः

यद्यपि निघण्टुकारो भ्रान्त्या व्योमशब्दमपि अन्तरीक्षपर्य्याये गृहीतवान् तथापि एतज्ज्ञेयं यत् व्योमशब्दः खलु आदिस्वर्गावबोधक इति। दृश्यते च—

स प्रथमे व्योमनि देवानां सदनेऽवृधः। सुपारः सुश्रवस्तमः समप्सु जित्॥

सामवेद।४११पृ। २।१३।८म।

तत्र सायणः——स इन्द्रः प्रथमे प्रथिते विस्तीर्णे मुख्ये वा व्योमनि विशेषेण रक्षके देवानां सदने सीदन्ति अस्मिन् इति सदनं स्थानं स्वर्गाख्यं तत्र स्थितः सन् वृधो यजमानानां वर्द्धयिता भवति, तथा सुपारः सुष्ठु पारयिता प्रारब्धस्य सम्यक् परिसमापयिता, सुश्रवस्तमः अतिशयेन शोभनं श्रवः अन्नं यशो वा यस्य,स तथोक्तः। समप्सुजित् सम्यक् अप्सु उदकेषु प्राप्येषु सत्सु तद् विघातिनोवृत्रादेर्जेता। यद्वा—आप इत्यन्तरिक्षनाम अन्तरिक्षे वर्त्तमानाना मसुराणां जेता।

दत्तजानुवादः······इन्द्र प्रथम व्योम प्रदेशे देवसदने (यजमानेर) वर्द्धयिता। तिनि कार्य्य परिसमाप्त करेन, अत्यन्त यशोयुक्त एवं जललाभार्थ जय करेन।

सुभिमतम्······व्याख्येयं नितरां वृथावाग्जालडम्बरा।—यदि व्योम अन्तरीक्षं गगनं स्यात्, तर्हि कथं सायणो न तदनुसरणं कृतवान्? व्योम विशेषेण रक्षक मिति तु नितरा मेव असम्बन्धप्रलाप इति। सायणव्याख्या अन्ते मधुरा।

प्रकृतार्थवाहिनी······हे इन्द्र स त्वं प्रथमे आदौ व्योमनि स्वर्गे आदिस्वर्गे श्चवि देवानां देवतानां कश्यपादीनां सदने गृहे अवृधः जन्मग्रहणानन्तरं वृद्धिं प्राप्तः (वृध् + इ लुङ) भवसि। त्वं च इन्द्रः सुपारः—सुष्ठु विपदुद्धारकर्त्ता,

अप्सु अन्तरीक्षेषु संजित् सम्यक् जेता असुराणामिति शेषः, अतएव स सुश्रवस्तमः त्वं सुयशस्तमः सुयशा इति।

अनुवाद……हे इन्द्र तुमि आदिस्वर्ग आदि व्योमे देवगृहे जन्मग्रहणानन्तर बड़ हइयाछ। तुमि सकलेर विपदुद्धारकर्त्ता, तुमि अन्तरीक्षे वृत्रादि असुरगणके जय करिया अतीव यशस्वी हइयाछ। तथाहि—

त्रिरस्मै सप्त धेनवो दुदुह्रे सत्यामाशिरं पूर्व्ये व्योमनि।

चत्वारि अन्या भुवनानि निर्णिजे चारूणि चक्रे यदृतैरवर्द्धत ॥१।७०।८म

तत्र सायणः १। अस्मै पवमानाय पूर्व्ये पूर्वैः कृते व्योमनि विविधम् ओम अवनं गमनं देवाना मत्र इति व्योम यज्ञः, तस्मिन् स्थिताय; २। यद्वा प्रत्न व्योमनि अन्तरिक्षे वर्त्तमानाय त्रिः सप्त एकविंशतिसंख्याका धेनवः प्रीणयित्री गावः सत्यां यथार्थभूताम् आशिरम् आश्रयणसाधनं क्षीरादि दुदुह्रे दुहन्ति; ३। यद्वा त्रिः सप्त द्वादशमासाः पञ्च ऋतवः त्रय इमे लोकाः, असौ आदित्य एकविंश इति (ऐ ब्रा १।३०) एतैः सर्वैः सह गोषु पय उत्पाद्यते तत् गावो दुहन्त इति। तानि चतुःसंख्यकानि चारूणि कल्याणानि उदकानि निर्णिजे निर्णेजनाय परिशोधनाय परिपोषणाय वा चक्रे, कदा करोति यत् यदा अय मृते यंज्ञै रवर्द्धत वर्द्धितवान् तदा करोति।

दत्तजानुवादः……यत्काले सोमरस यज्ञदिगेर सहित वृद्धि पाइलेन, तत्काले ताहार जन्य पूर्व परम्परागत यज्ञमध्ये एकुशटी धेनु, एकुशटी गाभी दुग्धदोहन करियादिल। तिनि चारिटी जलपात्र शोधनेर निमित्त, प्रवेश पूर्वक जलपात्रगुलिके सुशोभित करिलेन।

स्वाभिमतम्……अस्य भाष्यानुवादस्य पदार्थग्रहे स्वयं पद्मजस्यापि न समर्थो बभूव, किं पुनर्वयम्? कथमत्र व्योम—विशेषेण रक्षकं नाभूत्, परन्तु यज्ञोऽभूत्? व्योम यज्ञः, इति तु भूषण्डीकाकस्य प्रपितामहस्यापि कर्णे न प्राविशत्। वस्तुतस्तु शान्तिभङ्गापराधात् भाष्यकारस्य सायणशिष्यस्य अनुवादकस्य च दण्डो भवितु मर्हति।

प्रकृतार्थग्राहिनीः……अस्मै सोमरसाय सोमरसस्य तीव्रतानिरसनाय यथा पूर्व्ये व्योमनि आदिसृष्टे द्यवि त्रिःसप्त एकविंशतिसंख्यका धेनवो गावः (धेनुः स्यात् नवसूतिका) सत्यां (छान्दसोऽयं प्रयोगः) शैत्यं शैत्याय सोम-

रसस्य तीव्रतानिरसनाय तेन दुग्धदधिप्रभृति मिश्रितं स्यात्, तदेव आशिर-मिति, दुदुह्रे दुदुहिरे (गौणकर्म्मणि प्रथमा), तथा चत्वारि चतुःसंख्यकानि अन्या अन्यानि भुवनानि लोकाः, महः, तपः, सत्यं जनश्च एते जनपदा अपि निर्णिजे सोमशोधनाय निर्गंजनाय तत्तद्देशवासिनो यजमानाः अपि तद्वत् चारूणि चारु कर्म्म दुग्धदोहनरूपं चक्रे चक्रुरिति । यत् यतः एतेन ऋतैः ऋता यज्ञा अवर्द्धत अवर्द्धन्त, वृद्धिं प्राप्ता इति ।

ये प्रकार सोमरसेर तीव्रताविनाशजन्य आदिस्वर्गे एकुशटी धेनुर आशिर वा दुग्ध दोहित हइत, तद्रूप महः, तपः, सत्य ओ जनलोकेओ एकुशटी गाभी दोहन करिया सोमशोधनेर जन्य आशिर गृहीत हइत। एइ उत्तम कार्य्य करार जन्य क्रमे यज्ञ वृद्धिप्राप्त हइल।

अतएव व्योमशब्दस्य प्रकृतार्थं आदिस्वर्गो नतु विशेषेण रक्षणं, यज्ञो वा। तस्मात् आदिस्वर्गात् उत्तरकुरून् गत्वा ब्रह्मा तस्य सत्यलोकस्य नाम परम व्योम इति कृतवान्। अतएव "परम व्योम" परमं शून्यं न, परन्तु ब्रह्मलोक एव। दृश्यते च अथर्ववेदे—उत्तमं नाकं परमं व्योम । २७पृ, ३ख ।

नाकः आदिस्वर्गः, व्योम आदिस्वर्गः तत्र ब्रह्मेन्द्रादीनां जन्म अभूत्, न पुनः शून्ये गगने। अथ य उत्तमोनाकः उत्तमः स्वर्गः, तदेव परमं व्योम उत्कृष्टः स्वर्ग इति, तत् परमे स्थाने तिष्ठतीति परमेष्ठी सुरज्येष्ठ इति ।

अथ आकाशशब्दः ।

आकाशं शून्यम्, आकाशं गगनं, शब्दगुण माकाशम्, एतत् सर्वं भ्रष्टातिभ्रष्ट मेव। वस्तुतस्तु आकाशम् आदिस्वर्गः, आकाशं त्रिनाकाश्च इति। चेत् आकाशं शून्यं स्यात्, तर्हि कथ मस्माक मेषा काशीकलिकातातलवाहिनी किम्पुरुषवर्ष (तिब्बत) प्रभवा भागीरथी—

आकाशगङ्गा, वियद्गङ्गा
स्वर्णदी, सुरदीर्घिका वा

कथ्यते ? अहो महान् व्यामोहोऽयं पौराणिकानां मध्ययुगस्य आचार्य्याणाञ्च। आकाशवाणी शून्यवाणी न, परन्तु स्वर्गीयवाणी एव। वस्तुतस्तु यथा भौमी द्यौः—गगनं, पारलौकिकस्थानञ्च प्रमादात् अभवत्, तथैव प्रमादादेव आकाशं शून्यत्वं गतमिति। तत् कथं छान्दोग्ये एवं दृश्यते ?—

"अस्य लोकस्य का गतिः ? आकाश इति होवाच । सर्वाणि ह वै इमानि भूतानि आकाशादेव समुत्पद्यन्ते । आकाशं प्रति अस्तं यन्ति, आकाशो वै एभ्यो ज्यायान्, आकाशः परायणम् । ६२पृ महेशपालसंस्क ।

तत्र शङ्करभाष्यम्......इतरः अनुज्ञात आह अस्य लोकस्य का गतिरिति ? आकाश इति ह उवाच प्रवाहणः । आकाश इति च पर आत्मा, आकाशो वै नाम इत्याकाशशब्दश्रुतेः ।

अतएव ज्ञायते अस्य आकाशशब्दस्य अर्थः "परब्रह्म" इति शङ्करेण अवधारितम् । "आकाशो वै ब्रह्म" इत्यं श्रुतिरपि काचित् श्रूयते । परन्तु एषा श्रुतिरपि प्रमादात् समागता । किं कश्चित् वेदादिशास्त्रात् कस्मादपि कोषात् वा अस्य निगमं प्रदर्शयितुं समर्थः स्यात् ? न कथं कोषादौ ब्रह्म-परब्रह्म ईश्वरादिभिः शब्दैः सह परमेश्वरार्थवाची आकाश-शब्दोऽपि न दृश्यते । वस्तुतस्तु शङ्करेण श्रुतेरपि अस्याः प्रकृतार्थो न बुबुधे ।

प्रकृतार्थवाहिनी......यथा यजुर्वेदे इत्थं प्रश्नोवर्त्तते—"कास्वित् आसीत् पूर्वचित्तिः", "पृच्छामि यत्र भुवनस्य नाभिः" (ऋग्यजुषोः) अस्माकं पूर्वनिकेतनं किम् आसीत्, तदुत्तरे उक्तञ्च—द्यौरादिस्वर्ग एव पूर्वचित्तिः पूर्वकित्तिरासीत् । यत्र यस्मिन् जनपदे भुवनस्य भूमण्डलस्य नरनारीणां नाभिः आद्युत्पत्तिर्बभूव, तत्स्थानं किं ? अयं यज्ञो यज्ञजनपदो भुवनस्य नाभिः, तथा अत्रापि शालावत्येन पृष्टं—हे प्रवाहण अस्य लोकस्य भूमण्डलस्य सर्वेषां जनानां आगतिः आगमनं का कस्मात् स्थानात् ? सर्वे भारतीया कस्मात् जनपदात् भारतमागताः, वस्तुतस्तु तस्य जनपदस्य नामधेयकं विस्मृतं बभूव, तेनैव शालावत्येन तत् पृष्टमिति ।

प्रवाहण उवाच......अरे शालावत्य ! "आकाश" इति । वयं सर्वे आकाशजनपदादेव अस्मिन् भारतवर्षे समागताः । कथम् ?

इमानि परिदृश्यमानानि सर्वाणि भूतानि सर्वे प्राणिनः मनुष्यपशुपक्षि प्रभृतयः आकाशात् जनपदात् समुत्पन्ना स्ततः कालेन अत्रागता इति ।

आकाशो हि एव एभ्य ज्यायान् आकाशः परायणम् ।

स आकाशजनपद एभ्यः अन्येभ्यः सर्वेभ्यो जनपदेभ्यो ज्यायान् वर्षीयान्

प्राचीनतम इति । स आकाश एव परायणं श्रेष्ठम् अयनं श्रेष्ठतमो जनपद इति ।

आकाशं प्रति अस्तं यन्ति

कथ मेतत् वाक्यं परित्यक्तम् ? प्रक्षिप्त मेतत्, यथा प्रमादात् भौमी द्यौः पारलौकिकी अभवत्, वृष्टिवर्षणकारि गगनमपि बभूव, तथा भौम माकाश-मपि प्रमादात् गगनत्वम् ईश्वरत्वञ्च गतवत् । मानवाः जीवनान्ते कुत्र गच्छन्ति तत्र केनापि परिज्ञातं, परन्तु केचित् अन्धा भ्रान्ता मन्यन्ते, मरणान्ते मानवा ब्रह्मणि लीना भवन्ति, तेषां केनापि ऋषिणा—"आकाशं प्रति अस्तं यन्ति" वाक्य मेतत् प्रक्षिप्तम्, अत्र प्रवेशित मिति । तथाहि—

अयं वाव स यो ऽ य मन्तःपुरुष आकाशो यो वै सोऽन्तःपुरुष आकाशः ।१८४

अन्तःपुरुषो हृदि निहितं ब्रह्म आकाश इत्य मपि अन्धभक्तिवशात् पूर्ण-प्रमादाच्च विकृतमिति । तथाहि—

स य एतमेवं विद्वान् आदित्यं ब्रह्म इत्युपास्ते । २३८पृ

यत भक्ताः "सर्वं खल्विदं ब्रह्म" इति मन्यन्ते, यत्र विद्वानपि दिवाकरम् "आदित्य" वदति, तमेव जड़सूर्य्यं ब्रह्मज्ञानेन उपास्ते, तत्त्वा न कथं आकाश-मपि ब्रह्म इति वदेयुः ? तथाहि—

आकाशो वाव तेजसो भूयान्, आकाशे वै सूर्य्या-चन्द्रमसौ उभौ, विद्युन्नक्षत्राणि अग्निः ; आकाशेन आह्वयति, आकाशेन शृणोति, आकाशेन प्रतिशृणोति आकाशे रमते, आकाशे न रमते, आकाशे जायते, आकाशम् अभिजायते, आकाशम् उपास्व इति । स य आकाशं ब्रह्म इत्युपास्ते । ५४०—४१पृ

एतैर्वाक्यकदम्बकैः प्रतीयते अस्मिन् समये सर्वे सामाजिका गगनमपि आकाशम् इति स्थिरीचक्रुः । आकाशमेव ब्रह्म, इत्यपि मेनिरे,परन्तु ते च—

आकाशे जायते

इदमपि न विस्मृतवन्तः । यतः सर्वाणि भूतानि सर्वादौ आकाशजनपदे एव जज्ञिरे । पश्चात् यदा "वयं आकाशजनपदात् भारतमागताः" इति व्यस्मरन्, तदैव आकाशं ब्रह्मत्वं गतं,पश्चात् गगनत्वमपि गतमिति । यद्यपि एकस्यैव शब्दस्य बह्वर्थाः सन्ति, तथापि "आकाशं ब्रह्म" इत्य मभिमतं प्रमादादेव समागत मिति निगमाभावात् अनुमातुं शक्यते । आकाशमादि-निकेतनम् आकाशं

जनपदविशेष:, इत्यत्र अस्ति कश्चित् निगम: ? अस्त्येव। यथा—

स इममेव आत्मानं द्वेधा अपातयत्, तत: पतिश्च पत्नीच अभवतां तस्मादिदम् अर्द्धवृगल मिव स्व:, इति ह स्माह याज्ञवल्क्य:, तस्मादय माकाश: स्त्रिया अपूर्य्यत एव, तां समभवत्, ततो मनुष्या अजायन्त। बृहदारण्यक। १३७९

तत्र शङ्करभाष्यम्……स एव च विराट् तथाभूत: स ह एतावान् आस इति।

अनेन किं सिध्यति ? यत् आदिमानवो विराट् आकाशे जनपदे स्त्रिय मुपागच्छत्, ततस्तस्य पुत्रपौत्रादय: सन्ताना अभवन् ततस्तैर्मनुष्यै: (स्त्रिया इति उपलक्षणं, तस्या: सन्तानसन्ततिभि:) आकाश: अपूर्य्यत पूर्णोबभूव।

अतएव यथा यज्ञजनपद: खलु आदिमानवस्य विराट्पुरुषस्य अग्ने जन्मभूमि:, तथा आकाशमपि जनपद स्तस्यैव विराजो जन्मभूमिरिति। अतएव तत् आकाशं भूमि र्नतु गगनमिति। गगने मनुष्याणां सञ्चारसम्भावनाभावात्। अतएव वृद्धपराशरेण उक्तं—

पितॄणां स्थान माकाशं दक्षिणा दिक् तथैव च।

आकाशं जनपद: · पितॄणान् अस्माकं पूर्वपितामहानां स्थानं निकेतनं, तत्तु दक्षिणस्यां दिशि वर्त्तते।

तर्हि किं लङ्काया अपि दक्षिणे भागे आकाशमेतत् वर्त्तते ? न हि नहि, लङ्काया दक्षिणे "सुदारुण: पितृलोको" वर्त्तते, एषातु अभिनवरामायणस्य भ्रान्तिरेव। वस्तुतस्तु अयं पितृभूमि: खलु द्युलोकस्य (महस्तप:सत्यलोकानां) दक्षिणे- भागे मेरुपर्वतस्य वा दक्षिणांशे वर्त्तते इति।

अथ यदा हरिवर्षकिम्पुरुषवर्षयो रपि उत्पत्ति रभूत्, तदा द्योरेव देव मनुष्या स्तत्र तत्र गत्वा उपनिविविशुरिति। तेन द्यौ:, (मङ्गलिया), हरिवर्षं (तातार), किम्पुरुषवर्षं (तिब्बत) च एते त्रयोजनपदा अपि द्योत्वं पितृलोकत्वं नाकत्वम् आकाशत्वञ्च गता इति। अत: किम्पुरुषवर्षस्थ-विष्णुपाद-सरोवरात् प्रसृता विष्णुपदी भागीरथी अपि—

आकाशगङ्गा दियद्गङ्गा स्वर्णदी सुरदीर्घिका

इति नाम्ना प्रसिद्धिं गता इति। पूर्वं तावत् केवलं द्यौरेव पिता, द्यौरेव

नाकः, द्यौरेव आकाश मासीत्, पश्चात् द्यौः, हरिवर्षं, किम्पुरुषवर्षञ्च पितृ-लोकाकाशादिशब्देन समलङ्कृता अभूवन् । तेन उक्तम्—

तिस्रोद्यावः सवितुः द्वौ उपस्था एका यमस्य भुवने विराषाट् ।६।३५।१म

तिस्रोद्यावः द्यौः त्रिसंख्यका ; अतएव द्यौः—द्यौः, हरिवर्षं द्यौः, किम्पुरुषवर्षञ्च द्यौः । द्वौ अन्ये द्वे द्यावौ हरिवर्ष किम्पुरुषवर्षौ सवितुः सूर्य्यस्य लोकस्य प्रथमाया द्यो (द्यौरादित्यो भवति, देवानां हि परमं जनित्रं यत् सूर्य्यः, इति च श्रुतेः) रादिस्वर्गस्य उपस्था समीपस्थे, एका द्यौः यमस्य भुवने भुवनम् आदिस्वर्गः आदिपितृलोकः ; "यमः पितॄणां राजा" इति श्रुतेः । सा एव द्यौः विराषाट् (कपोलकल्पमेतत्)—विराट् षाट्—वैराजभवनम् । तथाहि—

तिस्रोमातॄः त्रीन् पितॄन् बिभ्रदेकः ऊर्द्ध्वस्तस्थौ ।१०।१६४।१म

तिस्रोमातरः······आर्य्यावर्त्त दक्षिणापथपूर्वोपद्वीपमयी भारतभूमिरिति । त्रयः पितरः—द्यौः, हरिवर्ष, किम्पुरुषवर्षश्च इति ; एकः सुरज्येष्ठो ब्रह्मा एतयोः पितृमातृलोकयोः शासनभारं बिभ्रत् गृह्णन् ऊर्द्ध्वः ऊर्द्ध्वे उत्तरस्यां दिशि ब्रह्मलोके तस्थौ गत्वा स्थितवान् ।

अतएव ज्ञायते एकदा द्यौः (मङ्गलिया) हरिवर्ष (तातार) किम्पुरुषवर्ष (तिब्बत) एतज्जनपदत्रितयं क्वचित् पितरः पितृलोकाः इति उक्तमभूत्, क्वचित् वा आकाशशब्देन नाकशब्देन वा (त्रिनाकाः) समलङ्कृतं बभूव । क्वचिद्वा विवक्षया द्वौ पितृलोकौ हरिवर्ष किम्पुरुषवर्षौ पितृलोकशब्देन संसूचितौ, क्वचिद्वा द्यौरेव आकाशशब्देन संसूचिता बभूव । अतएव छान्दोग्येन उक्तम्—

मासेभ्यः पितृलोकं पितृलोकादाकाशम् आकाशात् चन्द्रमसम्, एष सोमो राजा तद्देवाना मन्नं तं देवा भक्षयन्ति । ३६०पृ छान्दोग्य । महेशपालसंस्क ।

तत्र शङ्करभाष्यम्······मासेभ्यः पितृलोकं पितृलोकात् आकाशम् आकाशात् चन्द्रमसम् । कोऽसौ ? यस्तैः प्राप्यते चन्द्रमा य एष दृश्यते अन्तरिक्षे सोमो राजा ब्राह्मणानां तदन्नं देवानां तं चन्द्रमसं देवा इन्द्रादयो भक्षयन्ति । अतस्ते धूमादिना गत्वा चन्द्रभूताः कर्म्मिणो देवै र्भक्ष्यन्ते । ननु अनर्थाय इष्टादिकरणं यदि अन्नभूता देवैर्भक्ष्येरन् ? नैष दोषः । अन्नमित्युपकरण

मात्रस्य विवक्षितत्वात्। नहि ते कवलोत्क्षेपेण देवैर्भक्ष्यन्ते। किं तर्हि उपकरणमात्रं देवानां भवन्ति? ते स्त्रीपशुभृत्यादिवत्, दृष्टश्च अन्नशब्दः उपकरणेषु—स्त्रियः अन्नं, पशवः अन्नं, विशः अन्नं, राज्ञा मित्यादि। नच तेषां स्त्र्यादीनां पुरुषोपभोग्यत्वेऽपि उपभोगो नास्ति। तस्मात् कर्म्मिणो देवानामुपभोग्या अपि सन्तः सुखिनोदेवैः क्रीड़न्ति। शरीरञ्च तेषां सुखोपभोगयोग्यं चन्द्रमण्डले आपारमारभ्यते। तदुक्तं पुरस्तात् श्रद्धा शब्दा आपोद्युलोकाग्नौ हुताः सोमो राजा सम्भवतीति। ता आपः कर्म्मसमवायिन्यः इतरैश्च भूतैः अनुगता द्युलोकं प्राप्य चन्द्रत्व मापन्नाः शरीराद्यारम्भिका इष्टाद्युपासकानां भवन्ति। अन्त्यायाञ्च शरीराहुतौ अग्नौ हुताया मग्निना दह्यमाने शरीरे तदुत्था आपो धूमेन सह ऊर्द्ध्वं यजमानमावेष्ट्य चन्द्रमण्डलं प्राप्य कुशमृत्तिकास्थानीया वाह्यशरीरारम्भिका भवन्ति। २६०-६१ पृ छान्दोग्य।

अहो कीदृक् महती भ्रान्तिरियं शिष्यशङ्करस्य। दर्शनशास्त्र मधीत्य नक्तन्दिव मपि यदि सनातनहिन्दुभ्रातॄणामित्थं बुद्धिजाड्यं जायते, तर्हि किं तत्र वक्तव्यं स्यात्? भाष्यकारस्तु एष मूलश्रुतेः किमपि प्रकृतार्थं न प्रकटय्य केवल मकाण्डे वृथा प्रलपितवान्। मानवा मृताः चिताधूमेन सह गगनस्थं जड़चन्द्रं गच्छन्ति, तान् देवा भक्षयन्ति, इत्यम् उन्मत्तप्रलापाः कुतः समायाताः? मृतानां प्रेतलोकगमने कतिपयानां मासानां प्रयोजनं भवति? ते किं वृषवलीवर्द्दयानं समारुह्य प्रेतलोकं गच्छन्ति एकायोगेन वा? भारतीया इल्याजारेन्द्रादयः कथं कथ महो जड़चन्द्रलोकं गच्छन्ति, नकिं ते देवाः शोकदुःखाधारा जननमरणशीला नरा एव? अहो यस्मिन् देशे अद्यापि इत्थं भाष्यादिकं समाद्रियते, सभ्यजगति तेषां पुनरुत्थानं सर्वथैव सुदूरपराहत मिति। यः सोमो ब्राह्मणानां राजा, स किं पूर्वं ब्राह्मणभूयिष्ठस्य मङ्गदेशस्य एव अधिपतिर्नासीत्? "मङ्गा ब्राह्मणभूयिष्ठाः" भीष्मपर्व।

स एव कि मत्रिनन्दनः सोमः पूर्वं पितृभूमेर्मङ्गस्य आधिपत्यं कृत्वा पश्चात् उत्तरसंवत्सरस्य—महर्लोकस्य (दक्षिण-साइविरियाख्याया भूमेः) आधिपत्यं न प्राप? सच चन्द्रःपितृलोकस्य आधिपत्यं चकार,तेन किं श्रुतिरियं न विरचिता?

सोमाय पितृमते स्वाहा।

यमाय पितृमते स्वाहा।

यस्मिन् पितृलोके अयोध्याराजवैवस्वतमनोर्वर्षीयान् भ्राता यमो राजासीत्, न किं तस्मिन्नेव पितृलोके चन्द्रस्य बुधपिता राजा बभूव ? भो निर्लज्जाः शङ्करभक्ता अयं सोमो राजा गगनविहारी,उत मङ्गविहारी आसीत् ? कथं मत्स्यपुराण मित्थं निर्दिशति—

सोमः पितृणा मधिपः कथं शास्त्रविशारदः ।

तद्वंश्या ये च राजानो बभूवुः कीर्त्तिवर्द्धनाः ॥ १—२३ अध्याय

किं शङ्करनामान्धाः सनातनहिन्दवो वक्तु मुत्सहन्ते यत् अयं गगनविहारी चन्द्र एव शास्त्रविशारदः, कृष्णयुधिष्ठिरादीनां पूर्वपितामहश्च ? इत्थं बुद्धिविवेकपुष्टाङ्गाः भारतीया न कथं नित्यमेव परपादाहता भवेयुः !!!

प्रकृतार्थवाहिनी .....ये अन्तेवासिनो योगिनो वा चन्द्रस्य उत्तरसंवत्सरं गन्तुकामाः, ते भारतवर्षात् मासेभ्यः कतिपयमासैः पितृलोकं गौणपितृभूमिं गौणाकाशं किम्पुरुषवर्षं (तिब्बत) हरिवर्षञ्च (तातार) गच्छन्ति । तस्मात् गौणपितृलोकात् ते आकाशम् मुख्यपितृलोकम् मुख्यमाकाशजनपदञ्च (मङ्ग) गच्छन्ति । तस्माच्च कतिपयमासैः चन्द्रमसम् उत्तरसंवत्सरं महर्लोकं गच्छन्ति । स सोमो देवानां पितृलोकवासिना मिद्रादीनां राजा आसीत्, तत् उत्तरसंवत्सराख्यं स्थानं देवाना मन्नं तद्देशभवानि व्रीहियवादीनि ओषधादीनि देवा भक्षयन्ति । अतएव उक्तं—चन्द्र "ओषधीनाथ" इति । अत्रैव सुधा (सुरा) निर्म्मिता बभूव, अतएव चन्द्रः "सुधाकर" इति । भवतु यावत् पितृलोकः प्रेतलोको न, आकाशश्च गगनं न, परन्तु आदिव्योम आदिस्वर्गो द्यौरिति, यस्य नामान्तरं मङ्ग (मङ्गलिया) इति ।

एवं नाकोऽपि गगनं न,सोऽपि भौमस्वर्ग इति । तत्र द्यौरादिनाकः,हरिवर्षं किम्पुरुषवर्षञ्च गौणौ नाकौ । दृश्यते च—

ऊर्द्ध्वो गन्धर्वो अधि नाके अस्थात् ।१२।८५।८म

गन्धर्वो देवयोनिविशेषः ऊर्द्ध ऊर्द्धं उत्तरस्यां दिशि नाके अधि नाकोपरि स्वर्गोपरि अस्थात् अतिष्ठत् । तथाहि—

यत्र अनुकामं चरणं त्रिनाके त्रिदिवे, दिवो लोकाः, यत्र ज्योतिष्मन्तः, तत्र मा मम्तं कृधि ।८-११३-८म

यत्र यस्मिन् त्रिनाके त्रिदिवे च अनुकामं यथेच्छं चरणं विहरणं, यत्र त्रिनाके त्रिदिवे च लोका मानवाः ज्योतिष्मन्तः ज्ञानालोकसमुज्ज्वलाः, मां तत्र अमृतम् अमरं कुरु।

अतएव एष नाकोऽपि स्वर्गो,न पुन र्गगन मिति। द्योदिवाकाशादयश्च गगनं न।

भूः—पृथिवी।

भूः किं ? पृथिवी किं ? इत्यत्रापि भाष्यकारा बहून् प्रमादान् अवातारयन्। भू—भूम् इति शब्दद्वयं मूलतो भारतवर्षपरं, पृथिवीशब्दश्च भारतवर्षावबोधक इति। भूभूमशब्दयोः प्रयोग ऋग्वेदमध्ये न दृश्यते, परन्तु सामवेदे अथर्ववेदे च एतयोः प्रयोगः संलक्ष्यते। यथा—

इत एते उदारुहन् दिवस्पृष्ठानि आरुहन्।
प्र भूर्जयो यथा पथा द्यामङ्गिरसो ययुः॥

सामवेद ५२पृ। अथर्ववेद—८५पृ—४र्थ ख।

यथा यादृक् भूः भारतवर्षस्य जयो बभूव, इति शेषः, तथा तथैव अङ्गिरसः अङ्गिरोगोत्रीया देवाः (ब्राह्मणाः) पथा देवयानपथेन द्यां द्योलोकम् आदिस्वर्गं प्रययुः। तत एते अङ्गिरसः इतः अस्मात् द्योलोकात् आदिस्वर्गात् उदारुहन् ऊर्द्ध्वम् उत्तरां दिशम् आरुहन्, आरूढ़वन्तः। तस्यां दिशि कुत्र गताः? ते दिवस्पृष्ठानि द्युलोकस्य पृष्ठानि उपरिभागे आरुहन् गतवन्तः।

भूर्भुवः स्वः। ३७—३य यजुः

आभिर्महाव्याहृतिभिः त्रिभुवनम् अत्रबोधितमिति। पक्षान्तरे—

दिवश्च पृथिवीञ्च अन्तरिक्ष मथो स्वः। ३।१८०।१०म

एतन्मन्त्रस्यस्य पृथिवी, अन्तरिक्षं स्वश्च त्रैलोक्यं बोधयन्ति। अतएव पृथिवी—भूः, अन्तरीक्षं—भुवरिति। तथाहि—तैत्तिरीयोपनिषत्—

भूरिति वा अयं लोकः, भुव इति अन्तरिक्षं । सुव रित्यसौ लोकः । १७पृ—

अयं लोकः किं ? एतद् भारतवर्षम्, असौ लोकः सुदूरवर्त्ती स्वर्गलोक इति । यजुषि स्वर्गः सुवर्गः,—सुवश्च भवति ।—तथाहि—

भूरिति वै ऋचः, सुवरिति सामानि, भुव इति यजूंषि । १८पृ ।

ऋचः ऋग्वेदमन्त्राः भारते प्रणीताः, अतएव भारतवर्षं भूः । तथाहि—

भूरिति ऋग्भ्यः, । छान्दोग्य । अतएव भारतवर्षमेव "भू" रिति । अथ अस्मिन् एते प्रवादाश्च श्रूयन्ते—"भू-भारते" । तथाहि—

ये ब्राह्मणाख्या देवाः स्वर्गभ्रष्टा भारतं प्रविष्टा स्तएव "भूदेवा" "भूसुरा" महीदेवा इति । निघण्टुकारो "भू"शब्दं पृथिवीशब्दञ्च अन्तरीक्षपर्य्याये गृहीतवान् । कथं ? यतः तदन्तरीक्षं (तुरुष्क—पारस्य अपोगस्थान) भारतसाम्राज्यान्तर्गतमासीत् तेन हेतुना भारतार्थवाचिना भूपृथिवीशब्दाभ्यां तदपि परिचित मभूत् । अतएव भारतवर्षमेव भूरिति अनुमीयते निगमात् । एवं

भू, मही, भूमि, वसुन्धरा, भारती, नाभिवर्ष, अजनाभवर्ष, पृथिवी इत्येव-मादयः शब्दा अपि भारतवर्षपरा इति । तथाहि—

ये च मां न प्रपद्यन्ते शङ्करं वा नराधमाः ।
ब्राह्मणं वा महीदेवा तथा जीवन्ति ते नराः ॥ ५०८ पृ वृद्धगौतमः

अत्र "महीदेवाः" पदेन भूदेवाः संलक्षिता अतएव मही अपि भूर्भारतवर्षमिति । तथाहि—

इला, सरस्वती, मही ।८-१२-१म

तत्र सायणः……अत्र महीशब्दो महत्त्वगुणयुक्तां भारतीम् आचष्टे । तथाहि—

नाभ्या आसीत् अन्तरिक्षं शीर्ष्णो द्यौः पद्भ्यां भूमिः । १४।९०।१०म

अनेन त्रिभुवनोत्पत्ति माह ऋषि रिति । तत्र अन्तरीक्षं भुवः ; द्यौः—स्वः ; भूमिः—भूः—भारतवर्ष मिति ।

अथ पृथुराजस्य अधिकारकाले इयं भारतभूमिः "पृथिवी" "पृथ्वी"—इति शब्दाभ्यां समलङ्कृता ऽभूत् । उक्तञ्च—

पृथोरपीमां पृथिवीं भार्य्यां पूर्वविदोविदुः । ४४-९अ मनु

अतएव पृथिवीशब्दस्यापि मुख्यार्थो भारतवर्षमिति । पश्चात् भारताधीन

मन्तरीक्षं पृथिवीनाम्ना समलङ्कृतं बभूव। अथ कालेन द्यौरपि उत्तमा पृथिवी पदवाच्या अभूत्। यदाह ऋग्वेदः—

अवमस्यां पृथिव्यां मध्यमस्यां पृथिव्यां परमस्यां पृथिव्याम्।८।१०८।१म

अत्र अवमा पृथिवी भारतवर्षं, मध्यमा पृथिवी अन्तरीक्षं, परमा पृथिवी द्यौरिति। तथाहि—

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे।
पृथिव्याः सप्तधामभिः॥ १६—२२—१म।

मरीच्यादीनां सप्तर्षीणां सप्तधामभिः गृहैरुपलक्षितायाः यतः पृथिव्या द्यौरादिस्वर्गात् विष्णुः पादविक्षेपं कृतवान्, देवा अतः अस्मात् स्थानात् नः अस्मान् भारतवासिनः अवन्तु इति। तथाहि—

सूक्तवाकं प्रथममादित् अग्नि मादित् हविरजनयन्त देवाः।
स एषां यज्ञो अभवत् तनूपाः, तं द्यौर्वेद तं पृथिवी तमापः॥८।८८।१०म

तत्र द्यौरादिस्वर्गः—स्वः; पृथिवी—भूर्भारतवर्षम्; आपः—भुवः—अन्तरीक्षम्। तथाहि—

वज्रिन् ओजसा अहिं पृथिव्या निःशशाः।१।८०।१म

हे वज्रिन् इन्द्र त्वम् ओजसा बलेन अहिं वृत्रासुरं पृथिव्याः भारतवर्षात् निःशशा निःसारितवान्। अत्र सायणः—"सकाशात्" इति शब्दं वृथा अध्याहृतवान्। तथाहि—

यः सप्तसिन्धून् अदधात् पृथिव्यां। तैः ब्राः।

यो वरुणः पृथिव्यां भारतवर्षे सप्तसिन्धून् अदधात् धारयामास अधिचक्रे तथाहि—

आग्नेयमस्त्रं लब्ध्वा तु भार्गवात् सगरोनृपः।
जघान पृथिवीं गत्वा तालजङ्घान् सहैहयान्॥ वायुपुराणम्

सगरराजः—भृगुस्थात् भार्गवात् आग्नेयास्त्रं विन्दुकवज्रादिकं लब्ध्वा पृथिवीं भारतवर्षं गत्वा आगत्य सहैहयान् तालजङ्घान् क्षत्रियान् जघान। तथाहि कालिदासः—

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः॥ कुमार

अनेन भारतवर्षस्य उत्तरदिग्वर्त्ती हिमालयपर्वतः संलक्षितः, अतएव भारतवर्षं पृथिवीति । तथाहि—

पृथ्वी तावत् त्रिकोणा । रसमञ्जरी ।

अनेनापि पृथ्वीशब्देन कविः त्रिकोणां भारतभूमिम् अवाबोधयदिति । तथाहि—

पृथिवीमध्यरेखा च नर्म्मदा परिकीर्त्तिता । चरणव्यूहटीका ।

नर्म्मदा नदी पृथिवीमध्यरेखा, एषा, आर्य्यावर्त्तदक्षिणापथयोर्मध्ये स्थित्वा भारतवर्षं द्विधा विच्छिनत्ति । अतएव भारतवर्षमेव मुख्या पृथिवीति ।

द्यावापृथिवी "शब्देन द्यौः (स्वः), पृथिवी" (भारतवर्षञ्च) बोधेयते । एते शब्दा द्यावापृथिवीवाचकाः—

द्यावाभूमी रोदसी पितरा । ४।१२।१०म

तिस्रोद्याव स्तिस्रोभूमीः । ५।८७।७म

दयावाभूमी, द्यावाक्षमे । ६।३।२८ पाणिनिः ।

द्यावापृथिवी ।—ऐ

द्यावाक्षामा समीची । ५।८६।१म

नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी २।१०२।१म

अतएव भूमि, क्षमा, पृथिवी, क्षामा, एते च शब्दा भारतवर्षबोधका । एवं "गो" "क्ष्मा" च शब्दौ अपि भारतावबोधकौ इति ।

द्यावापृथिवी ।

द्यावापृथिवीशब्देन किमवबोधितं स्यात्, तन्न केनापि भाष्यकारेण यास्केन वा न विशदीकृतम् । द्यावापृथिवी रोदसी, रोदसी द्यावापृथिवी इतिकृत्य सर्वे भाष्यकाराः सामाजिकान् नितरामेव व्यामोहयन् । अहो तथापि एतेषां यास्कसायणादीनामपि भाष्यादिकं वेदवत् माननीय मिति । कथं यजुर्वेद मन्त्रवक्ता सारस्येन इदमवदत्—

को अद्य वेद भुवनस्य नाभिं को द्यावापृथिवी अन्तरिक्षम् ॥५८।२३य

यदि कोपि न वेद, तत् कथं तेषा मनभिज्ञानां व्याख्याकाराणां वचसि

सर्वे विलुण्ठितमूर्द्धान इति। अन्ये परे का कथा? स्वयं पाणिनिरपि तत्र बुबुधे, तेन हेतुना तेन सूचितं—

दिवश्रौत्। ७।१।८४। दिवोद्यावा।६।३।२८

वस्तुतस्तु दिव् द्युलोकः (महः, तपः, सत्य) तेन दिव्शब्देन पृथिवीशब्दस्य समासे "दिवस्पृथिव्यौ" इति पदं भवति, नतु "द्यावापृथिव्यौ" इति। उक्तञ्च तत् तेनैव भगवता पाणिनिना—

दिवसश्च पृथिव्याम्।६।३।३०

पृथिवीशब्दे परे दिव्शब्दस्थाने समासे "दिवस्" आदेशो भवति। दिव् च पृथिवी च ते दिवस्पृथिव्यौ।

परन्तु अत्रापि वृथा अकारसंयोगः कृतः। "दिवस पृथिव्याम्" इदमेव सूत्रं साधु स्यात्, सूत्रस्य स्वल्पाक्षरत्वात्। दि+सु=दिव्, नतु द्यौः। परन्तु द्यो+सु=द्यौः (गोशब्दवत्)। अनेन द्योशब्देन सह पृथिवीशब्दस्य समासे द्यावापृथिव्यौ पदं—बभूव। अतएव "दिवोद्यावा" इति सूत्रं प्रमादगर्भमिति। कथं? यतो यदा द्यौः (आदिसर्गः) समुत्पन्ना, पृथिवी (भारतवर्षञ्च) समुत्पन्ना, तदा दिव् नासीत्। सा तु अन्तरीक्षस्यापि अवरजा इति। एतत् समर्थनार्थम् अस्माभिः पूर्वं द्यो रुत्पत्तिः प्राचीनतमस्वस्य प्रदर्श्यते। उक्तञ्च—

किंस्वित् वनं क उ स वृक्ष आस, यतो द्यावापृथिवी निष्टतक्षुः।४

परमेश्वराः केन प्रकारेण द्यावापृथिवी निष्टतक्षुः निर्म्मितवन्तः? कस्य वनस्य कान् कान् वृक्षान् कर्त्तित्वा तद्द्वारा द्यावापृथिव्यौ निर्म्मिते? तदुक्तं—

विश्वतश्चक्षुरुत विश्वतोमुखो, विश्वतोबाहुरुतो विश्वतस्पात्।

सं बाहुभ्यां धमति सं पतत्रैः, द्यावाभूमी जनयन् देव एकः॥३-८१-१०म

यथा कर्म्मारो बाहुभ्यां पतत्रैः भस्त्राभिः भस्त्रासञ्चालनैः धमति अग्निं प्रज्वालयति यथेच्छं कटाहादिकञ्च निर्म्मोति, तथा एकोदेवः स परमेश्वरः द्यावाभूमी द्यावापृथिव्यौ जनयन् सृजन् वर्त्तते। तथाहि—

चक्षुषः पिता मनसा हि धीरो घृतमेने अजनन्नम्नमाने ।
यदेदन्ता अददृहन्त पूर्वं आदित् द्यावापृथिवी अप्रथेताम् ॥
१-८२-१०म

चक्षुषो जगत्प्रसवितुः सूर्य्यस्यापि पिता स्रष्टा धीरः परमेश्वरः मनसा मनसि पर्य्यालोच्य, पूर्वं घृतम् उदकम् अजनत् अजनयत्, पश्चात् तस्मिन् घृते महासागरजलराशौ नम्नमाने निमग्ने द्यावापृथिवी द्योभारतवर्षौ अजनयत् ससर्ज । अथ यदा यस्मिन् समये अन्ताः द्यावापृथिव्योः प्रान्तप्रदेशा अददृहन्त दृढ़ा अभवन्, तदा द्यावापृथिवी द्यावापृथिव्यौ द्योभारतवर्षौ अप्रथेतां प्रथिते अभूताम् स्थले परिणते बभूवतुः ।

अस्माभिः पूर्वं प्रदर्शितं यद्यजनपदो द्यौरेव अभिवो, स च यज्ञो जलधौ समुत्पन्नः, साम्प्रतम् प्रदर्श्यते द्यौश्च पृथिवी च महासागरगर्भे समुत्पन्ने, अतएव ते भौम्यौ इति । अहो तथापि अन्धा बहुकामाः एते स्वर्गाः पारलौकिकाः गगनस्थ ! ! ! द्यावापृथिव्योरुत्पत्तिः कथिता, साम्प्रत मेतयो र्ज्यैष्ठत्वञ्च प्रदर्शितं स्यात् । उक्तञ्च ऋषिभिरार्षैः—

मही द्यावापृथिवी ज्येष्ठे ।१।५६।४म
प्र पूर्वजे पितरा द्यावापृथिवी । २।५२।७म
परिक्षिता पितरा पूर्वजावरी द्यावापृथिवी ८।६५।१०म

तत्र सायणभाष्यम्······पूर्वजे पूर्वं प्रजाते, उत्पन्ने । पूर्वजावरी—पूर्वं जाते, पूर्वजे सृष्ट्यादौ उत्पन्ने (७८४पृ—तैः—ब्राः ।

अतएव द्यावापृथिवी सर्वेभ्योजनपदेभ्य एव वर्षीयसौ इति गम्यते नैगमात् । तथाहि—

रोदसी (द्यावापृथिवी) देवी चर्षणीनां जनित्री,
अजीजनत् भद्रा जनित्री अजीजनत् ।१।१२४।१०म
रोदसी देवपुत्रे प्रत्ने मातरा ।७।१७।६म
ईळे द्यावापृथिवी पूर्वचित्तये ।१।११२।१म

देवी द्यावापृथिवी द्योभारतवर्षौ चर्षणीनां आपकाणां कर्षणवृत्ति परायणानां सर्वेषां मानवानां जनित्री जनयित्री । कथं ? देवी सर्वान् पश्चमानवान् अजनयत् जनयामास । अतएव ते द्यावापृथिव्यौ प्रत्ने पुरातने मातरा

मातरौ मातृभूमी। अहं पूर्वचित्तये पूर्वकित्तये पूर्वकित्ती पूर्वनिकेतने द्यावापृथिवी द्यावापृथिव्यौ स्वर्गभारतवर्षौ ईले स्तौमि।

कथं रोदसी द्यावापृथिवी देवपुत्रे ? यतः पूर्वं दिवि देवाः प्रसूताः, पश्चात् स्वर्गभ्रष्टास्ते देवा भारतवर्ष मागत्य अत्र कृतनिवासाः,तदा तेषां ये पुत्रपौत्रादयो देवा अस्मिन् भारतवर्षे लब्धजन्मानो, भारतभूमिरियं तेषां मातृभूमि रतोदेवाः पुत्रा ययोर्द्यावापृथिव्यो स्ते "देवपुत्रे" इति। बहूना मिन्द्राणां मध्ये कश्चिदिन्द्रोऽपि भारतवर्ष प्रसूत इति। उक्तञ्च अथर्ववेदे—

इन्द्रोजातो मनुष्येषु। ५६६पृ।१ख

अतएव द्यावापृथिवी प्राक्तनमातृभूमी तेन ऋषिभिरुक्तम्—

देवी देवस्र रोदसी जनित्री ।८।८७।७म

ते द्यावापृथिवी मातरा ।१४।६४।१०म

रोदसी मातरा (माता च पिता च ते) ।१२।८५।८म

द्यौः पिता पृथिवी माता। तैः ब्राः १०८० पृ

तन्माता पृथिवी तत् पिता द्यौः ।७४८पृ ऐ

तन्माता पृथिवी पिता द्यौः ।४।८८।१म

रोदसी पिता माता ।८।१६०।१म

द्यावा पृथिवी पिता माता ।२।४३।५म

सुष्ठ, परन्तु कथं द्यौः पिता, पृथिवी माता इत्युक्तं ? एते द्वे एव किं मातृभूमी न ? एवमेव। परन्तु या आदि मातृभूमिः परित्यक्ता, या खलु पूर्व पितापितामहानां मातृभूमिः, सा एव "पिता" इति विशेषणेन समलङ्कृता भूत्, अतएव उक्तम्—

द्यौर्नः पिता जनिता नाभि रत्र बन्धुर्नः माता पृथिवी महीयम्।

उत्तानयो चम्वोर्योनिरन्त,र्यत्र पिता दुहितुर्गर्भमाधात् ॥३३।१६४।१म

द्यौरादिस्वर्गो नः अस्माकं भारतवासिनां जनिता जनयिता जनयित्री पिता पितृभूमिः पितृलोकः, (Father land), यत स्तत्रैव दिवि अस्माकं पूर्वपितामहानां नाभिरुत्पत्तिरभूत्। नः अस्माकं बन्धुर्ज्ञातिदेवगणश्च अद्यापि तत्रैव दिवि वर्त्तते। इयम् अस्मदध्युषिता मही महती विस्तीर्णा पृथिवी

भारतभूमिः न अस्माकं भारतवासिनां माता मातृभूमिः। उत्तानयो र्ज्ञान विज्ञानविदादिभि रत्युन्नतयो रुच्चोः सेनापतिस्वरूपयो रनयो र्द्यावा पृथिव्योर्मध्ये पिता द्यौरेव योनिरादुत्पत्तिस्थान मादिनिकेतनम्। यत्र पिता द्यौः दुहितुः कन्यास्थानीयायाः समुद्रस्य अन्तरीक्षस्य दिवस्य द्युलोकस्य च गर्भं प्रजाः औपनिवेशिकान् आधात् धारयामास। उक्तञ्च—

ते नव्यं नव्यं तन्तु मातन्वते दिवि समुद्रे ।४।१५८।१म

ते द्यावापृथिव्यौ दिवि त्रिदिवे द्युलोके महस्तपःसत्येषु लोकेषु तथा समुद्रे अन्तरीक्षे तुरुष्कपारस्यापोगस्थानेषु नव्यं नव्यं नूतनं नूतनं तन्तुं वंशं प्रजाम् आतन्वते आतन्ववाते विस्तारयतः। स्वर्गभारतवर्षयोरेव देवमनुष्या द्युलोकम् अन्तरीक्ष च गत्वा उपनिविविशुरिति। अतएव उक्तम्—

द्यावापृथिवो विश्वशम्भुवा ।१।१६०।१म

द्यावापृथिवी विश्वजन्ये ।३।२५।२म

द्यावापृथिवी द्यावापृथिव्यौ द्योभारतवर्षौ विश्वशम्भुवा विश्वशम्भुवौ विश्वेषां जनानां मङ्गलकारिण्यौ। कथं? यत स्ते विश्वजन्ये विश्वेषां लोकानां जनयित्र्यौ।

इदं द्यावापृथिवी स्वर्गभारतवर्षौ, तथा द्यौ र्वायुविहारि गगनं न (द्यौरपि वायौ त्रिता१२५८ ए तैः ब्राः)शून्यसंस्था अपादगम्या भूमिरपि न, तथा पृथिवी भूमण्डलं न,परन्तु भारतवर्षं मिति। एते द्यावापृथिव्यौ अतीवप्राचीनतमे भूमी। किन्तु अनयोर्मध्ये का प्राचीनतरा? तदपि ऋषिणा पृष्टम्—

कतरा पूर्वा कतरा अपरा अयोः ।१।१८५।१म

तत्र सायणः········अयोरनयोर्द्यावापृथिव्योर्मध्ये कतरा पूर्वा पूर्वमुत्पन्ना, कतरा वा अपरा पश्चाद्भाविनो? तदुक्तं तु पूर्वमेव—

कंस्विद् गर्भं प्रथमं दध्र आपः ।५।८२।१०म

आपोहयं दधाना जनयन्तीर्यज्ञं ।८

आपो गर्भं दधाना जनयन्तीरग्निम् ।७।१२१।१०म

अनन्तजलधौ यः प्रथमोगर्भोजातः समुद्रगर्भे यः प्रथमो महाजनपदः समुत्पन्नः, स खलु मानवाना मादिनिकेतनं "यज्ञः" इति। यः खलु आदि स्वर्गो द्यौः। कथमादिनिकेतनं सः? यतस्तत्रैव आदिमानवः अग्निर्विराट

प्रादुर्भूतः। अतएव द्यावापृथिव्योर्मध्ये पिता द्यौरेव प्रत्न इति। उक्तञ्च—

पिता एषां प्रत्नः ।३।७३।८म

एषां चतुर्दशभुवनानां मध्ये पिता द्यौरेव प्रत्नः पुरातनः। तथाहि कृष्णयजुः—

सुवर्गो वै लोकः प्रत्नः। देवलोकादेव मनुष्यलोके प्रति तिष्ठति इति। १८पृ

सुवर्गः स्वर्गलोक एव प्रत्नः पुरातनः, तस्मात् स्वर्गलोकात् देवलोकादेव सर्वे मनुष्यलोके भारतवर्षे समागता इति। वस्तुतस्तु द्यौरेव सर्वासां नरनारीणां पूर्वपितृभूमिः (Father land) अतएव ऋषिभिरुक्तम्—

द्यौः पिता जनिता ।१०।१।४म

मधु द्यौरस्तु नः पिता ।७।९०।१म

द्यौरेव पिता पितृभूमिः (नतु दिव्) जनिता जनयिता जनयित्री, सर्वेषां जन्मभूमिः। नः अस्माकं पिता सा द्यौः आदिस्वर्गो मधु अस्तु।

अहो यास्कसायणदयानन्दादयस्तु अस्य पितृशब्दस्य प्रकृतार्थं न बुबुधिरे। परन्तु प्रश्नोपनिषद्भाष्यप्रणेता केवलो विद्वद्गोष्ठीगरीयान् शिष्यः शङ्करः, बुबुधे खलु, नान्य इति। यथा—

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्द्धे पुरीषिणम् ।१२।१६४।१म

तेन व्याख्यातं शङ्करेण—पितरं सर्वस्य जनयितृत्वात् पितृत्वम्। ८पृ प्रश्न

द्यौः पिता सर्वेषां पशुमानवानां जन्मभूमिः पितृलोकः (Father land) अतएव सा द्यौः पिता इति। अतएव द्यावापृथिवी अश्विनौ न,भूस्थानदेवते च न, परन्तु मङ्गभारतवर्षौ इति। ते एव जगति ज्येष्ठे, दिव् अवरजा, अतएव "दिवो द्यावा" सूत्रमेतत् स्खालनबहुलं, "द्यौर्दिवौ" इति च अमरनिर्देशा दोषसमाघ्रात इति।

भुवः—अन्तरीक्षम्।

भुवः—भुवर्लोकः अन्तरीक्षमिति पूर्वमेव प्रदर्शितं, साम्प्रतम् इदमेव प्रदर्शितं स्यात् यत् अन्तरीक्षं अनन्तगगने न, परन्तु मध्यमो लोको भौमः—

"लोकस्तु भुवने जने"।

न तु शून्ये इति। महान् यास्कस्तु अन्तरीक्षशब्दस्य व्युत्पत्तिं निर्दिशन् एव मुक्तवान्—

अन्तरिक्षं कस्मात् ? अन्तरा क्षान्तं भवति, अन्तरा इमे इति वा ।

तत्र दुर्गाचार्य्यः......अन्तरिक्षम् एव तावत् कस्मात ? उच्यते अन्तरा हि इदं द्यावापृथिव्यो रवस्थितं क्षान्तं च भवति, अथवा अन्तरा इमे द्यावा-पृथिव्यौ क्षियति निवसति इति अन्तरिक्षम् । ५७८।५८१ पृ-१म ख

तथाहि सायणः......अन्तरिक्षम्—अन्तरा क्षान्तं मध्यमस्थानगतम् ।१४८। १०म । अन्तरिक्षाणि—द्यावापृथिव्यो रन्तरा मध्ये क्षियन्ति निवसन्ति इति अन्तरिक्षाणि ।४।६५।१०म

परन्तु एतानि व्याख्यानानि विशदानि न । यदि एते द्यां शून्यस्थां मत्वा एव मवदन्, तर्हि शून्य मेव अन्तरीक्षमिति न कथं सिद्धं स्यात् ? वस्तुतस्तु एतद् व्याख्याकदम्बकं कौशलेन प्रणीत मिति । पक्षान्तरे असौ सायणः, सायणस्य शिष्यविशेषो वा निर्दिशति—

अन्तरिक्षे गन्धर्वादिभिः सेविते मध्यमे लोके यत् नृम्णं धनमस्ति दिवि द्युलोके च यदस्ति ।२।६।८म । अन्तरिक्षात्—अन्तरा क्षान्तात् मध्यमात् लोकात् ।३।८।८म

इय मेव व्याख्या अतीव साधीयसी । अथ अनेनैव सायणेन तच्छिष्येण वा अथर्ववेदे या या व्याख्याः—कृताः, ता अपि नितरां शोभना इति ।

अन्तरिक्षे......द्यावापृथिव्योर्मध्यवर्त्तिनि लोके ।१६७पृ—प्रथम खण्ड

अन्तरिक्षेण......द्यावापृथिव्योर्मध्यवर्त्तिलोकेन ।६२४पृ—१म ख—अथर्व ।

अतएव ज्ञायते अन्तरीक्षं त्रैलोक्यस्य (भूर्भुवःस्वः) मध्ये मध्यमलोक इति ।

वस्तुतस्तु अन्तर्मध्ये (द्यावापृथिव्योः स्वर्गभारतवर्षयोः) ईक्ष्यते दृश्यते तत् अन्तरीक्षं कृत्स्नं छान्दसं । तर्हि कतमो जनपदः अन्तरीक्षम् ? पौराणिका यद् यत् स्थानं केतुमालवर्ष मिति नाम्ना निर्दिशन्ति तदेवस्थानम् अन्तरीक्ष मिति । अतएव तुरुष्कपारस्यापोगस्थान मन्तरीक्ष मिति प्रतीयते प्रमाणात् ।

१ । अन्तरीक्षं—तृतीयोलोकः—तत्र प्रमाणानि—रोदसी अन्तरिक्षं । २।१२८।१०म । ३।८५।५म । द्यावापृथिवी अन्तरिक्षं ८।६६।१०म । सिन्धुः पृथिवी उत द्यौः ।५।८७।८म । १८।१०० ।१म । पृथिवी, द्यौः अन्तरिक्षं ।७।५८।१०म

तं द्यौर्वेद तं पृथिवी तमापः ।८।८८।१०म । पृथिवी द्यौरुत आपः ।२।८८।१०म

अन्तरिक्ष, द्यौः भूमिः ।१४।८०।१०म। पृश्निं, मातरं—स्वः ।१।१८८।१०म
पृथिवीं,अन्तरिक्ष स्वः ।३।१८०।१०म। द्यावाक्षामा सिन्धवः ।१३।१४०।१म
त्रयोलोकाः सम्मिता ब्राह्मणेन द्यौरेव असौ पृथिवी अन्तरिक्षम्। २२८पृ—
३ख—अथर्ववेद।

एवंविधा बह्वो मन्त्राः सन्ति, यत्र त्रिभुवनस्य अंशावबोधाय अन्तरीक्षं, तदर्थ-बोधकाः सिन्धुः आपः, पृश्निः पृथिवी च (द्यावाक्षामा पृथिवी) इत्येवमादयः शब्दा प्रयुक्ता बभूवुः। अतएव त्रिलोक्या एकदेशः अन्तरीक्षं गगनं न।

२। अन्तरीक्षं स्थाने भूमिविशेषो वा। तत्र प्रमाणम्—

दिवि अन्यः सदनं चक्रे उच्चा, पृथिव्यामन्यः अधि अन्तरिक्षे ।४।४०।२म
वसुरन्तरिक्षसत् ।५।४०।४म (अष्ट वसवः अन्तरीक्षवासिनः)।

तस्थिवान् अन्तरिक्षे यः ।५।८५।५म। तत्र सायणः—योवरुणोऽन्तरिक्षे तस्थिवान्।

त्रितो विभर्त्ति वरुणं समुद्रे।—त्रितनामा देवो वरुणं समुद्रे अन्तरीक्षे विभर्त्ति। समुद्रो वरुणालयः। विश्वेदेवाः शृणुत हवं मे ये अन्तरिक्षे ये उप-द्यवि स्थ। १३।५२।६म। मरुतः पृश्निमातरः ।१०।२३।१म—पृश्निरन्तरीक्ष मेव माता मातृभूमिर्येषां ते इन्द्रसैनिकाः। ये देवासो दिवि एकादश स्थ,पृथिव्यामधि एकादश स्थ,अप्सुक्षितः महिना एकादश स्थ। ११।१४०।१म

आन्तरिक्षाश्च याः प्रजाः गन्धर्वाप्सरसश्च ये सर्वास्ताः ।१४२१ष-तैः ब्राः
अन्तरिक्षसप्रा नृभ्यः।६।१०।१म। समुद्रे अधि आक्रते गृहे...अन्तरिक्षे तस्मिन् आक्रते निर्म्मिते गृहे।१।१०।८म

तद्वत् पृथिवीं विस्तीर्णा मन्तरिक्षं तृतीयस्यां पृथिव्याम् इति श्रुतेः
तैः सं ।१।२।१२)।

अवमस्यां पृथिव्यां मध्यमस्यां पृथिव्यां परमस्यां पृथिव्याम् ।८।१०८।१म

अत्र अवमा पृथिवी एषा भारतभूमिः, मध्यमा पृथिवी अन्तरीक्षं भुवर्लोकः, परमा पृथिवी द्यौरादिस्वर्गोभङ्गः। तैत्तिरीयास्तु, द्यावापृथिव्यो रनन्तर प्रभ-वत्वात् अन्तरीक्षं "तृतीया पृथिवी" इति निरदिशन्।

३। अन्तरीक्षम् एकतमो देवयानपथविशेषः। अतएव तत्र् गगनं न। तत्र प्रमाणम्—

ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी सञ्चरन्ति ।

४२४पृ—१म ख अथर्ववेद

अत्र सायण:……ते प्रसिद्धा देवयाना: देवा यान्ति येषु इति देवयाना: । ये पन्थानो मार्गा: द्यावापृथिवी द्यावापृथिव्योर्मध्ये सञ्चरन्ति वर्त्तन्ते । सुर्गस्य पथो मार्गान् देवायानान् । भाष्य — ।५३।१०म । तथाहि—

चत्वार: पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ।१८०पृ, कृष्णयजु: ८म ख—महीशूर संस्क । स्वर्गभारतवर्षयोर्मध्ये चत्वारो देवयानपथा विद्यन्ते । तेषामेक: पन्था अन्तरीक्षं, तत्र द्वौ पन्थानौ खाइवारपाश:,बोलानपाशश्च,तृतीयस्तु वद्रिनारायणपथ:, येन हरिर्विष्णुर्भारत माजगाम, (हरिद्वारम्) अनेनैव पथा युधिष्ठिरादय: स्वर्गं गता: । चतुर्थस्तु दुर्जयलिङ्गपथ: ।

अयुक्त सूर एतशं पवमानो मनौ अधि अन्तरिक्षेण यातवे ।५।६३।८म

प्रकृतार्थवाहिनी……पवमानो विशुद्धचेता: सूर: अदितिनन्दन: सूर्य्यो मनौ वैवस्वतमनो: अन्तरिक्षेण अधि अन्तरीक्षस्थमार्गेण यातवे यातुं भारत-मागन्तुं भारतागमनाय एतशम् अश्वम् अयुक्त तस्य आरोहणार्थं दत्तवान् ।

अन्तरिक्षेण पतति विश्वा रूपा अवचाकशत् मुनि र्देवस्य देवस्य सौकृत्याय सखा हित: । ४।१३६।१०म

प्रकृतार्थवाहिनी……देवस्य देवस्य देवतानां सखा बन्धु: सौकृत्याय हित: मङ्गलसाधनाय हितकारी मुनि: विश्वा विश्वानि रूपा रूपाणि प्राकृतिकशोभा-दीनि अवचाकशत् सम्यक् पश्यन् अन्तरीक्षेण अन्तरिक्षस्थितेन देवयानपथेन पतति स्वर्गं गच्छति, स्वर्गात् भारतं प्रत्यागच्छति च ।

अन्तरिक्षेण पतथो रोदसी ।६।१०।८म

प्रकृतार्थवाहिनी……हे अश्विनौ युवाम् अन्तरिक्षेण मार्गेण रोदसी द्यावापृथिव्यौ स्वर्गभारतवर्षौ पतथो गच्छथ: ।

ये ते पन्था: सवितु: पूर्व्यास:,अरेणव: सुकृता अन्तरिक्षे ।
तेभि र्नो अद्य पथिभि: सुगेभि:, रक्षा च नो अधि च ब्रूहि देव ॥

११।३५।१म

प्रकृतार्थवाहिनी……हे देव ! अन्तरिक्षे भुवर्लोके सवितु: अदितिनन्दन विवस्वत सुकृता: सुष्ठु सम्पादिता अरेणवो धलिशून्या: परिष्कृता ये ते पूर्व्यास:

प्राक्तना: सर्वजनविदिता: पन्थान: सन्ति, त्वम् अद्य साम्प्रतं तेभि: सुगेभि: सुगै: पथिभि: आगत्य, न: अस्मान् रक्ष, न: अस्मान् अधिब्रूहि कर्त्तव्योपदेशञ्च कुरु।

वां रथ: समुद्रे अश्विना ईयते। १८।३०।१म

तत्र सायण:……हे अश्विना अश्विनौ वां रथ: समुद्रे अन्तरिक्षे ईयते गच्छति।

सायणस्तु ऋषयो योगबलेन शून्यमार्गेण गता इत्युक्तवान्, परन्तु अनेनैव पथा भारतीयवणिजो धनोपार्जनार्थं स्वर्गं गता: (४२३पृ अथर्ववेद १म ख)। दिव्ये अन्तरीक्षे च नदी प्रवहमाणा बभूव, भवति च। यदुक्तं विष्णुपुराणे—

पूर्वेण शैलात् सीता तु शैलं यात्यन्तरिक्षगा।

ततश्च पूर्ववर्षेण भद्राश्वेनैति सार्णवम्॥ २३।२ष। २यअं

इयमेव सीता साम्प्रतम् "इयांशिकियाम्" इति नाम्ना प्रसिद्धा। भागीरथी अपि अस्मिन् आकाशे (तिब्बते) समुत्पन्ना अद्यापि प्रवहति।

३। अन्तरीक्षं वायुवरुणादीनाम् उपनिवेशभूमि:, अप्सरोगन्धर्वादीना मपि वासस्थानमिति। तत्र प्रमाणम्—

अत्र वसवो रन्त देवा उरौ अन्तरिक्षे। ३।१८।७म।

एतदन्तरीक्षं तु दिव्यं नभ: (त्रिनाकस्य एकदेश:) किम्पुरुषवर्षं। तथाहि—

वसुरन्तरिक्षसत्। ५।४०।४म

धवादय: अष्ट वसव: किम्पुरुषवर्षे अग्न्यधीना न्यवसन्। तत्र प्रमाणम्—

तत् ह यत् प्रथम मम्रृतं तत् वसव उपजीवन्ति अग्निना मुखेन। छान्दोग्य।

किम्पुरुषवर्षात् उत्तरकुरुपर्य्यन्तं स्वर्भूमय: पञ्चास्तैर्विभक्ता: (अमृतं Sanatorium) तासां मध्ये किम्पुरुषवर्षं प्रथम मम्रृतं,तदपि दिव्यं नभ इति।

अतएव नदीवसूना मधिष्ठानभूमि रिदं दिव्यं नभ: गगनम् न,परन्तु पार्थिवं नभ:। भुवर्लोकोऽपि गगनं न। यदुक्तं विष्णुपुराणे—मैत्रेय उवाच—

कथितं भूतलं ब्रह्मन् ममैतदखिलं त्वया।

भुवर्लोकादिकान् लोकान् श्रोतु मिच्छाम्यहं मुने॥ १

पराशर उवाच।

रविचन्द्रमसोर्यावत् मयूखै रवभास्यते।

ससमुद्रसरिच्छैला तावती पृथिवी स्मृता॥२

यावत्प्रमाणा पृथिवी विस्तारपरिमण्डलात् ।
नभस्तावत्प्रमाणं वै व्यासमण्डलतो द्विज ॥४।७अ २अं

यदि नभः शून्यं गगनं स्यात्, तर्हि तस्य व्यासोमण्डलं वा कुत्र परिमाण सहितं स्यात् अस्याने अनन्तत्वात्, कथं वा परिमितायाः पृथिव्या अपि परिमाणं तत्तुल्यं भवितुमर्हति ? वस्तुतस्तु एषा पृथिवी भारतवर्षं, नभश्च अन्तरीक्षं तुरुष्कपारस्यापोगस्थानात्मकमिति । तथाहि—

पादगम्यं तु यत्किञ्चित् वस्त्वस्ति पृथिवीमयम् ।
स भूर्लोकः समाख्यातोविस्तारोऽस्य मयोदितः ॥१६

एव भूर्लोकोऽपि भारतवर्षमिदं । पौराणिकास्तु प्रमादात् तत् विशदीकर्त्तुं न समर्थाः सूर्य्यशब्ददर्शनात्—

भूमिसूर्य्यान्तरं यत्तु सिद्धादिमुनिसेवितम् ।
भुवर्लोकस्तु सोऽप्युक्तो द्वितीयो मुनिसत्तम ॥१७

अत्र श्रीधरस्वामी—"सुगमम्" इतिकृत्य निवृत्त इति । परन्तु चतुर्थमन्त्रस्य व्याख्याच्छलेन तेन उक्तं नभो भुवर्लोकाख्यम् । द्यावापृथिव्यो लोकालोक परिच्छिन्नयो रन्तरालवर्त्ती भुवर्लोकः । वस्तुतस्तु द्यावापृथिव्योः स्वर्ग भारतवर्षयोर्मध्यवर्त्ती भुवर्लोक एव अन्तरीक्षं, तदेव तुरुष्कपारस्यादिकमिति ।

भूमिरत्र भारतवर्षं, सूर्य्यशब्देन च तदधिकृतः पितृलोकः (तिस्रोद्यावः त्रिनाक इति यावत्) अवबोधित इति । सूर्य्याधिकृतं स्थानं किम् ?

एधि प्रियो देवानां परमे जनित्रे । १।५६।१०म

तत्र सायणः……"देवानां हि एतत् परमं जनित्रं यत् सूर्य्यः" इति श्रुतेः । द्यौरादित्यो भवति—आदित्यस्य अदितिनन्दनस्य द्यौः । अत्र सा समग्रा द्यौरेव सूर्य्यशब्देन संसूचिता इति ।

अतएव तिसृणां द्यवां भूर्लोकस्य भारतवर्षस्य च मध्ये अवस्थितम् अन्तरीक्ष मेव भौमो भुवर्लोक इति । भूमिसूर्य्यान्तरं द्यावापृथिव्यो रन्तरा इति ।

अथ भारतवर्षात् अन्तरीक्षे गमनम् ।

सर्वे देवमनुष्याः स्वर्गभ्रष्टाः सर्वादौ भारतवर्ष माजग्मुः, तदा लोकान्तराभावात् । ततो—भुवर्लोके स्थले परिणते सति, देवमनुष्या अस्मात् भारतवर्षात् तदन्तरीक्षं गत्वा उपनिविविशुः । तत्र प्रमाणम्—

अन्तरिक्षे विष्णुर्व्यक्रंस्त त्रैष्टुभेन छन्दसा । ६८ पृ-यजुः ।

विष्णुः कनीयान् कश्यपात्मजः त्रिष्टुभेन छन्दसा साम गायन् अन्तरीक्षे द्वितीयपादविक्रमणं कृतवान् । कदा ? यदा स हि अन्तरीक्षमार्गेण देवैः सह भारत माजगाम ?

नहि नहि, तदा किम् अन्तरीक्षं नासीत् ? एवमेव, तदा अन्तरीक्षस्य एकांशः (अपोगस्थानपूर्वप्रान्तभूमिः) स्थले परिणतो बभूव, तेनैव मार्गेण देवा भारत मागताः । ततः किं ? ततो बहुकालादनन्तरम् अन्तरीक्षे मनुष्यवासयोग्ये सति देवमनुष्या भारतवर्षात् तत्र गताः । तदुक्तम्—

मनुष्यान् अन्तरिक्षमगन् यज्ञः । ६०-८म यजुः

यज्ञो विष्णुः मनुष्यान् वायुवरुणप्रभृतीन् मातृमनुनन्दनान् अन्तरीक्षम् अगन् अगमयन् । अतएव कृष्णयजुषि उक्तम्—

प्रतीचीं मनुष्याः । २६० पृ

मातृमनोर्नन्दना वरुणादयो मनुष्याः प्रतीचीं पश्चिमां दिशं व्यभजन्त जग्मु-रिति । केन प्रकारेण ?—

त्रितो विभर्त्ति वरुणं समुद्रे । ४।८५।८म

त्रितो नाम देवो वरुणं समुद्रे अन्तरीक्षे (नतु महासागरजलगर्भे) विभर्त्ति धारयामास निनाय ।

यो देवोवरुणोयश्च मानुषः । ६०५पृ। १ख अथर्व.

एष वरुणः मातृमनुतनयः, देवश्च कश्यपनन्दनत्वात् विद्यावत्तया च ।

वरुणो अपामधिपतिः ।७७८पृ-ऐ—

एष वरुण (uranas) एव, अपाम् अन्तरीक्षस्य अधिपतिर्बभूव ।

सर्वं तत् राजा वरुणो विचष्टे ।

यदन्तरा रोदसी परस्तात् । ६०२पृ-ऐ—

रोदसी द्यावापृथिव्यो रन्तरा मध्ये परस्तात् पश्चादादिभागे यत् स्थान मासीत्, राजा वरुणस्तत् विचष्टे अधिकृतवान् । तथाहि—

यासु राजा वरुणो यासु सोमो विश्वेदेवाः ।

मदन्ति यासु अग्निः आपोदेवी रिह मामवन्तु ॥ ४।५०।७म

अतएव वरुणादीनां देवानां समुद्रे अन्तरीक्षे गमनं, तत्र राज्याधिकारश्च अभवत् इति गम्यते।

अप्सु ते राजन् वरुण गृहोहिरण्यय: ।४८०।२ख अथर्व

हे राजन् वरुण ! अप्सु अन्तरीक्षेषु पारस्ये इति यावत् ते तव हिरण्ययो लौहमयो गृहोगृहं वर्त्तते । अतएव पौराणिकैरुक्तं—

समुद्रो वरुणालय: ।

समुद्र: अन्तरीक्षं वरुणालयो वरुणस्य निवासस्थान मिति। तथाहि—

वायुरन्तरिक्षस्य अधिपति: । ७७८पृ-१म-ख । अथर्व ।

वायुरपि त्वष्टुर्जामाता अन्तरीक्षं गत्वा तत्र आधिपत्यम् जग्राह । तथाहि—

वायुमेव तदन्तरिक्षलोके आयातयति । ऐत ब्रा २६१ पृ

वायुदेवं कश्चित् त्रितवत् देव: अन्तरीक्षलोके निनाय। एष हि सर्वतो देवैर्वृत एतमेव तदेतस्मिन् लोके आयातयति। ऐ—

वायुमन्तरिक्षात् । २००छान्दोग्य महेशपाल

सुरज्येष्ठो ब्रह्मा अन्तरीक्षजनपदात् मन्त्रसमाहारार्थं वायुमृषिं प्रायुहत् जग्राह । अतएव उक्तम्—

वायोर्यजूंषि । ऐ—

वायुदेवो यजुर्वेदं समाजहार, कस्मात् ? अन्तरीक्षादिति । परन्तु त्वग्दर्शिन: खलु वायुं प्रभञ्जनं मत्वा तदधिष्ठानभूमिं अन्तरीक्षमपि गगनं मेनिरे।

अध द्युतान: पित्रो: सचासाऽमनुत गुह्यं चारु पृश्ने: ।

मातु: पदे परमे अन्ति सद् गो:, वृष्ण: शोचिष: प्रयतस्य जिह्वा॥१०।५।४म १। सायण:……अध अथ द्युतानोदीप्यमान: पित्रोर्द्यावापृथिव्यो: सचा सह मध्ये व्याप्त: सन् पृश्ने: गो: सम्बन्धि चारु रमणीयं गुह्यम् ऊधसि निगूढं पय: आसा स्वकीयेन आस्येन अमनुत पानाय अबुध्यत। उक्त मेवार्थं विवृणोति मातु: क्षीरादि निर्म्मात्र्या गो: परमे पदे उत्कृष्टे स्थाने ऊधोलक्षणे अन्ति सत् समीपे विद्यमानं क्षीरं वृष्ण: फलानां वर्षितु: शोचिषो दीप्तस्य प्रयतस्य आहवनीयादिरूपेण नियतस्य वैश्वानरस्य जिह्वा पातुम् इच्छति इति शेष: ।

২। দয়ানন্দভাষ্যম্……অধ অথ দ্যুতানঃ প্রকাশমানঃ পিত্রোর্জনকয়োঃ সচা সত্যেন আসা আসীন অমনুত বিজানীত,, গুহ্যং গুপ্তং চারু সুন্দরং পৃশ্নেঃ অন্তরিক্ষস্য মধ্যে মাতু র্মাতৃবৎ বর্ত্তমানস্য পদে প্রাপণীয়ে পরমে উৎকৃষ্টে অন্তি সমীপে সন্ বর্ত্তমানং গোঃ বৃষ্ণো বর্ষকস্য শোচিষঃ প্রকাশমানস্য প্রয়তস্য প্রযত্নং কুর্বতঃ জিহ্বা বাণী।

৩। দত্তজানুবাদ……অনন্তর পিতামাতাস্বরূপ (দ্যাবাপৃথিবী) মধ্যে ব্যাপ্ত হইয়া দীপ্তিমান্ (বৈশ্বানর) গাভীর (ঊধোদেশে) নিগূঢ় রমণীয় (দুগ্ধ) মুখের দ্বারা পান করিবার জন্য প্রবোধিত করেন। অভীষ্টবর্ষী দীপ্ত এবং প্রযত বৈশ্বানরের জিহ্বা মাতা গাভীর (অধঃপ্রদেশরূপ) উৎকৃষ্ট স্থানের সমীপে বিদ্যমান আছে।

স্বাভিমতম্…… নায়ং মন্ত্রঃ সুখবোধঃ, এতস্য চতুর্থং চরণমতীব দুরবগাহ মিতি। দ্যুতানস্তু কশ্চিৎ সামবেদস্য ঋষিঃ। স ভারতং বিহায় অন্তরীক্ষং গতঃ, এষ এব "দ্যুতান" শব্দঃ ইরিয়ূরোপায়াং Teuton শব্দে পরিণতো বভূব, তদ্বংশ্যা এব Teutonic Race- তে অন্তরীক্ষাৎ য়ুরোপদেশং গতাঃ। অমীষাং সায়ণাদীনাং ভাষ্যানুবাদাদিকং চ নিতরাং দুরবগাহম্।

৪। প্রকৃতার্থবাহিনী……দ্যুতানো দ্যুতানো নাম কশ্চিৎ সামবেদস্য দেবঃ (১।২।৩ঋক্।।১৮১সূ। ১০ম) পিত্রোঃ দ্যাবাপৃথিব্যোঃ স্বর্গভারতবর্ষয়োঃ সচ সহ আস আসীৎ। পূর্বং স পিতরি দ্যবি আসীৎ, পশ্চাৎ স্বর্গভ্রষ্টো মাতরি পৃথিব্যাং ভারতবর্ষে আসীৎ। অধ অনন্তরম্ অন্তরীক্ষে স্থলে পরিণতে সতি, তৎ যদা বাসযোগ্যম্ অভবৎ, তদা স দ্যুতানঃ পৃশ্নেঃ গো মাতুঃ অন্তরীক্ষস্য পরমে পদে উৎকৃষ্টে স্থানে অন্তি অন্তে প্রান্তভাগে পশ্চিমপ্রান্তে তুরুষ্কদেশে ইতি যাবৎ (বেবিলোনিয়া-মেষপটেমিয়া-প্রভৃতিষু) সন্ বর্ত্তমানং চারু রমণীয়ং গুহ্যং গোপনীয়ং সুরক্ষিতং বাসস্থানম্ অমনুত অভনিষ্ট মেনে হৃদ্যত্বেন স্বীচকার (পছন্দ করিলেন,) মনোনীতং চকার। স দ্যুতানঃ শোচিষঃ দীপ্তেঃ দীপ্তিকারস্য তেজস্করস্য ক্ষীরস্য বৃষ্ণোবর্ষিতস্য গো মাতুঃ প্রযতস্য দুগ্ধং পাতুং প্রযতস্য প্রযত্নপরস্য বৎসস্য বৎসানা মিতি যাবৎ মধ্যে জিহ্বা জিহ্বাস্বরূপঃ প্রধান ইতি যাবৎ আসীৎ। স দ্যুতানস্তু সর্বাভ্যঃ প্রজাভ্যঃ শ্রেষ্ঠ আসীদিত্যর্থঃ।

অনুবাদ……দ্যৌ বা আদিস্বর্গবাসী দ্যুতান (১।২।৩—১৮১।১০ম)

स्वर्गभ्रष्ट हइया पृथिवी वा भारतवर्षे आसिया वास करेन। पिता द्यौ ओ माता पृथिवीर सेइ श्युतान गोमाता पृश्नि अर्थात् अन्तरीक्षेर प्रान्त देशे वर्त्तमान एकटी सुरचित रमणीय स्थान पछन्द करेन। तथाय ये सकल औपनिवेशिक प्रजा छिल, श्युतान तन्मध्ये सर्वश्रेष्ठ छिलेन। तथाहि—

ये नः पितुः पितरो ये पितामहा ये आविविशुरुर्वन्तरिक्षम्।
ये आक्षियन्ति पृथिवीमुत द्यां तेभ्यः पितृभ्योनमसा विधेम॥ ११८पृ ४ख अथर्व

तत्र सायणः······न अस्माकं पितुः तातस्य ये पितरः जनकाः ये च पितामहा तज्जनकाः ये च अन्ये उरु विस्तीर्णम् अन्तरिक्षम् आविविशुः आविष्टवन्तः, ये च पृथिवीम् आक्षियन्ति, अभिनिवसन्ति, पृथिव्यां वर्त्तन्ते इत्यर्थः। ये च द्यां स्वर्गलोकम् आक्षियन्ति आश्रित्य निवसन्ति, इत्थं लोकत्रयं (भूर्भुवः स्वः) व्याप्य वर्त्तन्ते इत्यर्थः, तेभ्यः पितृभ्यः नमसा नम इति अन्ननाम हविर्लक्षणेन अन्नेन नमस्कारेण वा विधेम परिचरेम।

एतेन किं लब्धं? अन्तरीक्षे वासयोग्ये सति वरुणवायुद्युतानादिभ्यः अन्ये बहवोदेवमनुष्या अन्तरीक्षे गताः, स्वर्गं पुनरधिकृते सति भारतवर्षात् स्वर्गे श्चवि च पुनर्गत्वा निवासं चक्रुरिति।

अतएव हे भारतीययुवका यूयं मिसरमेषपटेमियाबेबिलोनिया-पन्टासप्रभृतिभ्यः अर्वाचीनेभ्यो जनपदेभ्यो भारतवर्षे समागताः, उत युष्माकं बहवः पूर्वपितामहा एव भारतवर्षात् स्वर्गाच्च अन्तरीक्षम्, अतएव मेषपटेमियाबेबिलोनियाप्रभृतिषु गत्वा उपनिविविशुरिति ?. सत्यमेतच्च यत् बहवो यजुर्वेदीया मुसलमानाक्रमणेन व्याकुलाः पार्शीजातिवत् तुरुष्कादिभ्यो भारतमाजग्मुः. परन्तु तत्तु चान्द्रत्रयोदशशतवर्षमात्रं प्रवृत्तमिति। तेन मेषपटेमियादिजनपदानां प्राचीनत्वम् आदिनिकेतनत्वञ्च न सिध्यति खलु, परन्तु तत् सर्वमेव निराकृतं भवतीति।

अथ असुराणामन्तरीक्षगमनम्।

असुराः के? पौराणिकाः कोषकाराः कवयश्च एवं जानन्ति यत् ये सुरविरोधिन स्तएव असुरा इति। अतएव अमरेण उक्तम्—

असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः॥

सुरद्विषः—असुरा इति सत्यमेव, परन्तु वैदिकयुगे तदितरत् एवं किमपि अवबोधितं स्यात्, यत् सः असुरः खलु सुरविरोधी नासीत्। यथा—

त्वं राजा इन्द्र नूनं पाहि असुर त्वं ।१।१७४।१म

त्वमग्ने रुद्रो असुरो महोदिवः ।६।१।२म

त्वं विश्वेषां वरुण असि राजा असुर ।१०।२७।२म

मा नो वधै र्वरुण असुर।७।२८।२म

पिता यज्ञानामसुरो विपश्चिताम् अग्निः ।४।२सू।३म

एतेषु मन्त्रेषु इन्द्रः, अग्निः, वरुणः, एते देवा; असुरविशेषणेन समलङ्कृताः, अतएव एषः असुरशब्दः सुरविरोधिनं न कमपि बोधयति। वस्तुतस्तु—

असून् प्राणान् राति ददाति इति असुरः—प्राणदाता इति।

परन्तु तस्मिन्नेव वेदे एवं केचित् असुरशब्दा विद्यन्ते, ये असुरा देवैः सह विरोधिन आसन्। यथा—

अनायुधासः असुराः अदेवाः चक्रेण तान् अपवप ऋजीषिन् ।८।८५।८म

इन्द्र असुरघ्नः ।४।२२।६म

तत्र सायणः······हे इन्द्र! असुरघ्नः असुराणां हन्तुस्ते तव।

अतएव असुरशब्दः खलु प्राक् श्रेष्ठार्थे व्यवहृतोऽभूत् पश्चात् देवविरोधिनो-बोधयितुं च प्रयुक्तो बभूव। कथम्? यदा भारतागता देवा (ब्राह्मणाः) ज्ञातीनाम् इन्द्रादीनामपि वीराणामुपासका अभवन्,यज्ञादौ पिण्डदानमपि कर्त्तुं प्रवृत्ताः मद्यमांसाहारिणश्च ते अभवन्, तदा तद्विरक्ताः केचित् दायादा ब्राह्मणाः (देवाः) देवविरोधिनो बभूवुः, अपि च हविष्याशिनस्ते वेदोदितं वरुण मसुरं पूजयितु मारेभिरे। अतो देवपक्षपातिनः सर्वे "देवाः",पक्षान्तरे असुरस्य पूज-कास्ते अदेवयवः, "असुर" इति आख्यां भेजुः। अतएव तेषा मसुराणाम्—

अहुरो मज्दा (असुरो महान् महत्)

उपास्यदेवता बभूव, अन्ये सुरापायिनोदेवाः तैरसुरैः निन्दाच्छलेन "सुराः" (सुरापायिनः मत्ता मातालं) इति कुत्सितशब्देन संसूचिता बभूवुरिति। उक्तञ्च—

सुरापरिग्रहात् देवाः सुराख्या इति विश्रुताः।—रामायणम्।

अतएव दैत्या दानवाश्च असुरा न। ते तु स्वर्गं जित्वा तत्रैवासन्। अथ

ये स्वर्गभ्रष्टा भारतमागता, स्तेषां मध्ये केचित् देवा एव पानभोजनोपासना विषये विरोधात् इन्द्रादिभि र्देवैः सह ग्रातवं जग्मुरिति। तएव सुरद्विषः असुराः, तेऽपि भारतवासिनो देवा एव। के ते ? उक्तञ्च कृष्णद्वैपायनेन—

दनायुषः पुनः पुत्राश्चत्वारोऽसुरसंज्ञकाः।

विक्षरो बलवीरौच वृत्रश्चैव महासुरः॥ ३२-६४ म आदिपर्व।

दनायुस्तु काचित् दक्षकन्या, कश्यपपत्नीविशेषः, तद्गर्भजा विक्षरबलवीरवृत्रा एते चत्वारः असुरा इति। अतएव ते देवानां मातृष्वस्रेया देवा एव। उक्तञ्च—

असुरा ये तदा आसन् तेषां दायादबान्धवाः।—वायुपुराण

अथ तेषा मनुचराः पणयश्च असुरशब्देन संसूचिता इति। अथ यदा भारतागता सर्वे देवा आर्य्यनामानो बभूवु रत्न चातुर्वर्ण्यञ्च प्रतिष्ठापित मभूत्, तदा देवासुरैः सह विरोधः सञ्जातः। यथा—

देवासुराः संयत्ता आसन्। कृष्णयजुः।१२२७

देवा असुरैः सह संग्रामलिप्ता अभवन्। अथ देवास्तान् असुरान् पराजित्य भारतवर्षात् नुनुदुरिति। अथ तद्विरोधस्य निदर्शनं प्रदर्श्यते।

उत ब्रुवन्तु नो निदो निरन्यतश्चित् आरत। दधाना इन्द्रे इत् दुवः॥५।४।१म

हे इन्द्र! उत अपि च नः अस्माकं निदः (कपोलचलः शब्दोऽयं) निन्दका द्वया निन्दाकारिणोजना आर्य्या असुरा वृत्रादयः ब्रुवन्तु कथयन्तु निन्दन्तु तेषां देवद्वेषिणां निन्दया मनसि न कापि ग्लानिर्भवति। ते किं मुक्त्वा निन्दन्ति ? "यूयम् अन्यतः अन्यान् देवान् निरारत। (निः—ऋ+त लुङ्) परित्यक्तवन्तः, तेषां पूजां न कुरुथ। केवलम् इन्द्रे देवराजे दुवः (कपोलचलमेतत्) दुवस्यथ परिचरथ, इत् इति उक्त्वा निन्दन्ति। तथाहि—

त्रातारं त्वा तनूनां हवामहे, बृहस्पते देवनिदो निवर्हय।८।२३।२म

हे बृहस्पते इन्द्र! वयं तनूनां देहानां त्रातारं रक्षाकर्त्तारं त्वा त्वां हवामहे आह्वयामः, त्वं देवनिदो देवनिन्दकान् असुरान् निवर्हय विनाशय। तथाहि—

जामिम् अजामिं प्रमृणीहि शत्रून्।५।४।४म

हे अग्ने! त्वं जामिं ज्ञातिं ज्ञातीन् आत्मव्यान्, अजामिं ज्ञातिभिन्नान्

कृष्णत्वगादीन् असुरपक्षपातिनः शत्रून् अनार्य्यांश्च प्रस्तणीहि जहि। तथाहि—

पराचिच्छीर्षा ववृजुस्ते इन्द्र अयज्वानः यज्वभिः स्पर्द्धमानाः। निरव्रतान् अधमो रोदस्योः।५।३३।१म

तत्र सायणः......हे इन्द्र ते वृत्रानुचराः शीर्षा स्वकीयानि शिरांसि पराचित् पराङ्मुखानि एव कृत्वा ववृजुः गतवन्तः। कीदृशास्ते ? अयज्वानः स्वयं यागरहिताः प्रत्युत यज्वभिः यागानुष्ठातृभिः, स्पर्द्धमानाः। रोदस्योः द्यावापृथिव्योः सकाशाच्च अव्रतान् व्रतरहितान् वृत्रानुचरान् निष्प्रधमः निःशेषेण धमनं कृतवान् (निःसारितवान्) असि। तथाहि—

परानुदस्व अमित्रान् मघवन् भव वृधः सखीनाम्। २५।२२।७म

हे मघवन् इन्द्र त्वम् अमित्रान् शत्रून् परानुदस्व भारतवर्षात् दूरीकुरु, सखीना मस्माकं त्वद्बन्धूनां वृधो वर्द्धयिता भव। तथाहि—

अमन्यमानान् अभिमन्यमानैः निर्ब्रह्मभिरधमो दस्युमिन्द्र।८।३३।१म

हे इन्द्र! त्वं अमन्यमानान् त्वाम् अस्तुवतः त्वाम् अस्वीकुर्वाणान् वृत्रानुचरान् दस्युं चोरं तं वृत्रञ्च ब्रह्मभिः ब्रह्मवादिभिः स्तोतृभिः अभिमन्यमानैः त्वदनुरक्तैः निरधमः निःसारितवान्।

न ये दिवः पृथिव्या अन्तमापुः।१०।ऐ

ये असुराः दिवः (भ्रान्तिरेषा द्योः) स्वर्गस्य पृथिव्या भारतवर्षस्य च अन्तं पर्य्यन्तस्थानं न आपुः प्राप्तवन्तः, ये स्वर्गे भारतवर्षे वा स्थातुं न समर्थाः। बभूवुः। तथाहि—

विजानीहि आर्य्यान् ये च दस्यवः। रन्धय अव्रतान्।८।५१।१म

हे इन्द्र! के आर्य्याः, ये के च आर्य्याः सन्तो दस्यवः, तान् त्वं विजानीहि। त्वम् अव्रतान् व्रतहीनान् असुरान्, रन्धय विनाशय।

त्वं मायाभिरप मायिनोऽधमः स्वधाभि र्ये अधि शुप्तौ अजुह्वत।५।५१।१म

तत्र सायणः......ये असुराः स्वधाभिर्हविर्लक्षणैरन्नैः शुप्तौ अधि शोभमाने स्वकीये मुखे एव अजुह्वत, अहौषुः, नाग्नौ, तान् असुरान् हे इन्द्र त्वं मायाभिः कपटैः अपाधमः अपाजीगमः (अपास्तवान्)। तथाहि—

वज्रिन् ओजसा पृथिव्या निःशशा अहिम्। १।८०।१म

हे वज्रिन् इन्द्र त्वं अहिं वृत्रासुरम् ओजसा बलेन, पृथिव्या भारतवर्षात् निःशशा निरगमयः निःसारितवान् । तथाहि—

अर्वाञ्चं नुनुदे वलम् । ८।१४।८म

अर्वाञ्चं तद्वृत्रानुजं वलं वलासुरञ्च नुनुदे भारतवर्षात् सन्ताड़ितवान् । तथाहि—

अबुध्यमानाः पणयः ससन्तु ।१०।१२४।१म

बोद्धुमशक्ता वर्वराः पणयो वृत्रानुचराः ससन्तु दीर्घनिद्रां भजन्तु म्रियन्तामित्यर्थः । तथाहि—

जुरतं पणेरसुं ।३।१८२।१म

तत्र सायणः······हे दस्रा युवां पणेर्वणिग्भूतस्य लुब्धकस्य अयष्टुः असुं प्राणं जुरतम् अहिंसिष्टम् अनीनशतम् । तथाहि—

जहि अत्रिणं पणिं वृकोहि सः । १४।५१।६म
अक्रतून् ग्रथिनो मृध्रवाचः पणीन् अश्रद्धान्
अयज्ञान दस्यून् अग्निर्विवाय, पूर्वश्चकार
अपरान् अयज्यून् ।३।६।७म । ब्रह्मद्विषो जहि ।१।५३।८म ।
पदा पणीन् अराधसो निवाधस्व । २।५३।८म

इत्थं सर्वे असुरा वृत्रवलपणयः शम्बरनमुचिप्रभृतयश्च अस्मात् भारत-वर्षात् अन्तरीक्षे विताड़िता अभवन् । उक्तञ्च—

वृत्रं रुजन् अपः समुद्रमैरयत् ।१२।६।८म

इन्द्रः वृत्रं वृत्रासुरं रुजन् पीड़यन् अपः समुद्रं अन्तरीक्षलोकम् ऐरयत् प्रेरयामास ।

अनिन्द्रं नुनुदे अभि क्षाम् ।१६।१८।७म

इन्द्रः अनिन्द्रम् इन्द्रविरोधिनम् असुरकदम्बकं क्षां मध्यमां पृथिवीम् अन्त-रीक्षम् अभि अन्तरीक्षे नुनुदे विताड़ितवान् । ततः किं मभवत्? ततो देवैरुक्तम्—

अन्तरिक्षात् निरधमो महाम् अहिम् ।२०।४।८म

हे इन्द्र त्वं महां महान्तम् अहिं वृत्रासुरम् अन्तरिक्षात् निरधमः बहिष्कुरु ।

वृत्रासुर आर्य्यैः अन्तरीक्षे पारस्यदेशस्य उदीच्यां दिशि "आर्य्यायणं" नाम

जनपदं प्रतिष्ठाप्य तत्र वसति स्म । तत स्तद्वधार्थं इन्द्रः अन्तरीक्षे प्रविवेश उक्तञ्च—

भीमो विवेष आयुधेभिरेषां अपांसि विद्वान् इन्द्रो वज्रहस्तः ।४।२१।७म

ततो विद्वान् वज्रहस्तो बिन्दुकधारी भीम इन्द्र आयुधेभिः आयुधैः सह अपांसि अपोऽन्तरीक्षं विवेष प्रविवेश इति । सान्तव मार्षम् ।

घ्नन्तो वृत्रम् अतरन् रोदसी अप उरु चयाय चक्रिरे ।८।२६स्।१म

तत इन्द्रो रोदसी द्यावापृथिवी मङ्गभारतवर्षौ अतरन् अतिक्रम्य वृत्रं घ्नन्तः हन्तुं अपः अन्तरीक्षं गत्वा तत्र चयाय चयं गृहं चक्रिरे चक्रे ।

ऊर्द्ध्वो हि अस्थात् अधि अन्तरिक्षे अधा वृत्राय प्रवधं जभार ।

अजयत् गव्यु मिन्द्रः ।२।२०।२म

वृत्रः अन्तरीक्षे अधि अन्तरीक्षस्य ऊर्द्ध्वः उत्तरभागे आर्य्यायणे अस्थात्, अथ अनन्तरम् इन्द्रः तम् अजयत् तस्य वृत्रस्य वधं च प्रजभार कृतवान् ।

अहिं विवृश्चत् वि वज्रेण जघान आयन् आपो अयनम् ।७।२३।२म

इन्द्रो आपोऽयनं अन्तरीक्षस्य आर्य्यायणं गत्वा वज्राघातेन अहिं वृत्रा सुरं विवृश्चत् निजघान च ।

वि अन्तरिक्षम् अतिरत् इन्द्रो यत् अभिनत् वलम् ।७।१४।८म

इन्द्रो अन्तरिक्षं विभेद वलम् । नुनुदे विवाचः ।१०।२४।३म

इन्द्रः अन्तरीक्षं गत्वा वलासुरञ्च जघान । विवाचो विकृतभाषाभाषिणो- जनांश्च नुनुदे ।

वृत्रखादो वलं रुजः पुरां दर्म्मः अपामजः ।२।४५।३म

इत्यमिन्द्रः वृत्रं वलञ्च निहत्य तेषां पुराणि च विदार्य्य अपां अपः अन्तरीक्षं अजः अजयत् ।

अयं वलः कुत्र न्यवसत् ? स खलु अन्तरीक्षस्य पश्चिमदक्षिणभागे कमपि जनपदम् प्रतिष्ठाप्य तत्र आसीत् । तस्य जनपदस्यैव नामधेयं—

आसुरीयमिति-(असुरस्य इदं)

तस्य आसुरीयस्य विकारेण-एव Asseria. Siria. इति अभवत् । अतएव वर्त्तमानतुरुष्कदेशस्य दक्षिणपश्चिमभागे एव वलाधिकार आसीत् । यदुक्तं श्रीमता कृष्णमोहनवन्द्योपाध्यायमहाशयेन स्वार्ष्टेन (P-62-Aryan witness)—

If now we compare the Indian narrative with the records of Cuneiform inscriptions, there can scarcely remain a doubt that the Vala of the Rig Veda, was the Belus or Bel of the Inscriptions—that "the lofty capital of Vala" in the Rig Veda, was "the lofty citadel of Bel" in the Inscriptions, that the Asuras, Panis, (Sanskrit Panayas) of the Veda, were identical with the Phinides of classical history or mythology—that the river crossed by Sarama, or whatever detective was indicated by that term, was the Euphrates. As far then as the subject of this chapter is concerned, we find that the Arians who emigrated to India were once familiar with the lofty citadel of Bel, and must have then lived not very far from the Euphrates.

अयमेव Bel अस्माकं भारतवर्षस्य वलासुर इति। यदा देवाः स्वर्गभ्रष्टा भारत माजग्मुस्तदा तुरुष्कपारस्यापोगस्थानानि समुद्रगर्भे निमग्नानि आसन् कुतस्तदा Euphrates नदी ?. तत्रैव अन्तरीचे गत्वा इन्द्रः वृत्रं वलं पणींश्च जघान। पणय एव दक्षिणतुरुष्के Phænisia नाम कमपि जनपदं प्रतिष्ठाय न्यूषुः, तस्य पणयस् (पणयः) पदस्य विकारेण एव Phænisian संज्ञा बभूव। अस्मादेव डिडोनाम्नी काचित् पणिमहिला कार्थेजनगरम् गता। तत्र ये Moor जातिर्विद्यते, तएव वेदस्य मूरदेवाः (भूढ़देवाः) इति। कार्थेज गतैः तैः पणिभिः सह लाटिनजातेर्यः संग्रामो बभूव तदेव पिउनिकयुद्ध मिति। अस्मिन्नेव अन्तरीचे इन्द्रः स्वधर्म्मस्य च प्रवर्त्तनं कृतवान्, उक्तञ्च—इन्द्र प्रास्य पारं नवतिं नाव्यानाम् अपि कर्त्तमवर्त्तयः अयज्यून्।१२।१२१।१म तेन हेतुना मितानिवंशीयानां मध्ये वरुणेन्द्रनासत्यपूजा प्रचलिता बभूव।

अथ अयोध्याया यो नरिष्यन्तो राजा ईक्ष्वाको रनुज अपोगस्थान मागत्य सलिमानपर्वतपाददेशे राज्यस्थापनं कृतवान्, तदेव स्थानं—"शकस्थान" (Sewstan) मिति।

एते शका वैवस्वतमनुवंशीयाः (विशुद्धसूर्य्यवंशीया) नतु None Ariyan इति। अमुष्य नरिष्यन्तस्य पुत्र एव "शकः"।

नरिष्यतः शकाः पुत्राः ।२८।१० अ। हरिवंश

ते शका: सगरकोपेन भ्रष्टधर्म्माण: ककेशशपादर्द श गत्वा "आर्य्यमानवत्वात्" Armanean जातौ प्रथिता बभूवु:, तेषामेव तत्र जनपद:

आर्य्यरम इति (urzaram आर्य्या रमन्ते अत्र)।

ते शका भारतवर्षादेव अन्तरीक्षं ककेशशपादप्रान्तं गता:, अतएव अथर्ववेदे केनचित् ऋषिणा उक्तम्—

यत् शका * वाच मारुहन् अन्तरीक्षम् ।७३४पृ—४र्थ खण्ड।

ते शका: शकसूनव: शाकारीं भाषां गृहीत्वा अन्तरीक्षं गता:। उक्तञ्च—सा: द:

शकाराणां शकादीनां शाकारीं सम्प्रयोजयेत् ।३८७पृ

अस्या: शाकारीभाषाया विकारेण एव शाकसनभाषा (Saxonlanguage) शाकसनराज्ये प्रवर्त्तिता। तै: सह ये शर्म्माण: (ब्राह्मणा:—जरमाणा:) इरियूरोपायां गतास्ते "जर्म्माणा" इति।

अथ बहुकालेषु गतेषु यदा रामो राज्याभिषिक्तो बभूव, तदा तत्पूर्वं वा मात्मनो: सन्ताना गन्धर्वा अन्तरीक्षे प्रभावशालिनो बभूवु रिति।

भीमसेनोग्रसेनौ च सुपर्णो वरुणस्तथा ।४२

इत्येते देवगन्धर्वा मानवा: परिकीर्त्तिता: ।४४।६५ अ आदिपर्व

एतेषां गन्धर्वाणाम् अन्तरीक्षे वासप्रसङ्गो बहुषु वेदशास्त्रेष्वेव दृश्यते। यदुक्त ऋचि—

तयोरित् घृतवत् पयो विप्रा रिहन्ति धीतिभि:। गन्धर्वस्य ध्रुवेपदे।

१४।२२।१म

तत्र सायणभाष्यम्......गन्धर्वस्य ध्रुवं पदम् अन्तरिक्षं। तथाच तापनीय शाखायां समाम्नायते—

यत्त्वगन्धर्वाप्सरोगणसेवित मन्तरिक्ष मिति।

अतएव यक्षगन्धर्वाप्सरसां निवासस्थानम् अन्तरीक्ष मिति गम्यते। तथाहि—

ये अन्तरिक्षे ये दिवि पृथिव्यां ये च मानवा:। १८७ पृ-२ख अथर्व

केचित् मानवा मात्मनुनन्दना: पृथिव्यां भारतवर्षे, केचित् दिवि द्युलोके (द्यवि वा), केचित् अन्तरीक्षे आसन् इति शेष:। तथाहि—

* अत्र लिपिकरप्रमादात् मुद्राकरप्रमादात् वा "शका:" इति पाठस्तु "शका:" इति परिणतो बभूव, परन्तु तस्य कोपि अर्थो न भवति।

ये अन्तरिक्षात् ।७२५पृ, १म ख अथर्व ।

तत्र सायणः······अन्तरा द्यावापृथिव्यौ ईक्षितम् अन्तरा ऋक्षं वा यक्ष-गन्धर्वादिगणसेवितम् अवकाशात्मकम् अन्तरिक्षम् । तथाहि—

यत् अन्तरिक्षे ।२।८।८म

तत्र सायणः······अन्तरिक्षे गन्धर्वादिभिः सेविते मध्यमे लोके । तथाहि—

गन्धर्वो अप्सु अप्या च योषा ।४।१०।१०म

अप्सु अन्तरीक्षेषु गन्धर्वः, अप्या अन्तरीक्षभवा योषा च । तथाहि—

समुद्रिया अप्सरसः ।१।७८।८म

अप्सरसो देवयोनिविशेषाः समुद्रिया अन्तरीक्षवासिनः । तथाहि—महाभारतम्

अन्तरिक्षस्य विषये प्रजा इव चतुर्विधाः । आदिपर्व ।

विषयो जनपदः, अन्तरीक्षजनपदे चतुर्विधाः प्रजा ब्राह्मणक्षत्रियवैश्यशूद्रा इति ।

के ते ? असुरा वर्णाश्रमधर्मिण आसन्, गान्धारराजादयश्च पाणिनि प्रभृतयोपि ब्राह्मणाः, शकयवन-कम्बोजादयश्च क्षत्रिया अन्तरीक्षवासिन आसन् इति । तथाहि—रामायणम्—

श्रुत्वा सेनापतिं प्राप्तं भरतं केकयाधिपः ।१
स निर्ययौ जनौघेन महता केकयाधिपः ।
त्वरमाणोऽभिचक्राम गन्धर्वान् केकयाधिपः ॥२
भरतश्च युधाजिच्च समेतौ लघुविक्रमौ ।
गन्धर्वनगरं प्राप्तौ सबलौ सपदानुगौ ॥३
ततः समभवत् युद्धं तुमुलं लोमहर्षणम् ।
सप्तरात्रं महाभीमं न चान्यतरयोर्जयः ॥५
ततो रामानुजः क्रुद्धः कालस्यास्त्रं सुदारुणम् ।
सम्वर्त्तं नाम भरतो गन्धर्वेष्वभ्यचोदयत् ॥७
हतेषु तेषु सर्वेषु भरतः केकयीसुतः ।
निवेशयामास तदा समृद्धे द्वे पुरोत्तमे ॥१०
तक्षं तक्षशिलायां तु पुष्कलं पुष्कलावते ।
गन्धर्वदेशे रुचिरे गान्धारविषये च सः ॥११

१०१ सर्ग उत्तरकाण्डं ।

अयं गान्धारो जनपदः साम्प्रतं "कान्दाहार" इति नाम्ना प्रसिद्ध इति। अतएव वलासुरसाम्राज्य Asseria, तथा कान्दाहारप्रभृतयः जनपदा अमरीच-मिति प्रतीयते प्रमाणात्।

न केवल मेतत्, एकदा अस्माकं पञ्चनदप्रदेशोपि अमरीचसाम्राज्यान्त-र्गतो बभूव। उक्तञ्च—

सुदेवो असि वरुण (uranas), यस्य ते सप्तसिन्धवः।१२।५८।८म

एताः सप्तसिन्धव एव सिन्धुशतद्रुसरस्वतीप्रभृतयः सप्त नद्यः। तासां पुलिन देशः खलु पञ्चनदप्रदेश इति। वागदेवी सरस्वती अपि पित्रा धर्षिता अभिषमरीचे कियत्काल मासीत् (७।६१।१०म।७।१२५।१०म)।

अथ दिव्।

त्रिभुवनं "भूर्भुवः स्वः", दिव् त्रिभुवनान्तर्गता न, अतएव स्वः, दिव् न। द्यौः, स्वश्च, अभिन्नम्, अतएव द्यौश्च दिव् न। तर्हि दिव् का ? त्रिभुवनादतिरिक्तं किञ्चन चतुर्थं स्थानमिति।

पूर्वं किमपि नासीत्, ततो यश्चो बभूव, यस्य नामान्तरं द्यौ, स्वः, व्योम, मरु आकाशो नाकः पुष्करम्, इलावृतवर्षञ्च। ततः पृथिव्या उत्पत्ति रभूत्, सा पृथिवी भारतवर्षम्। तौ द्योभारतवर्षौ मिलित्वा "द्यावापृथिव्यौ" इति।

अथ पश्चिमसमुद्रगर्भे अमरीचस्य उत्पत्ति रभूत्, ते त्रयो जनपदाः मिलित्वा त्रिभुवनमिति।

तदा दिव् न आसीत्, अन्यत् किमपि स्थानञ्च नासीत्, अतस्तदा सर्वे सामा-जिकाः सवितारं त्रिभुवनस्यैव प्रसवितारं स्थिरीचक्रुरिति। अतः सर्वे इदमपि अवधारितवन्तो यत् त्रैलोक्यं विना चतुर्थोलोकश्च कश्चित् नास्ति। उक्तञ्च—शतपथेन—स यदिमान् लोकान् अति चतुर्थ मस्ति न वा—८४ पृ

तत्र सायणभाष्यम्······इमान् त्रीन् लोकान् अति अतिक्रम्य यत् चतुर्थं स्थानं, तत् अस्ति वा न वा इति सन्दिग्धमेव। १०२ पृ

अनेनैव हेतुना काण्वयजुषि ऋषिभिरुक्तम्—"एतावती वै पृथिवी यावती वेदी ।" २।६।४

वेदी यावत्पर्य्यन्तं प्रसारिता, तावत्पर्य्यन्तं स्थान मेव पृथिव्याः पर्य्यन्त देश इति । सा वेदी का ? तदुक्तम् ऐतरेयेण—

एतद्वै इलायास्पदं यदुत्तरवेदी नाभिः ।११८५ ।

तर्हि इलायास्पदम् इलावृतवर्षमेव पृथिव्याः शेषोत्तरसीमा इति । कथं ? यत एकदा इलावृतवर्षस्यैव उत्तरस्यां दिशि उत्तरमहासागर आसीत् । उक्तञ्च तैत्तिरीयब्राह्मणेन—

स समुद्र उत्तरतः प्राज्वलत्, भूम्यन्तेन एष वाव स समुद्रः, यच्चात्वालः । एष उ वेव स भूम्यन्तः, यत् वेद्यन्तः ।२६८५

तत्र सायण······:योऽयं चात्वालाख्योगर्त्तः अस्ति, स एष एव समुद्रस्थानीयः, योऽयं वेदे रवसानदेशः, सोऽयं भूमिरवसानभागः ।

अतएव ज्ञायते पूर्वं तावत् इलावृतवर्षस्य उदीच्यां दिशि उत्तरमहासमुद्र एव आसीत्,तद्गर्भे कियत्परिमाणं स्थानं स्थले परिणतं सत् चात्वालाकारं प्राप्तवत्, स एवचात्वालोद्युलोके परिणतो बभूव ।

अतएव यथा (३।१८०।१०म) (दिवञ्च पृथिवीञ्च अन्तरिक्ष मथो स्वः) मन्त्रेण प्रमीयते दिव् त्रिभुवनादतिरिक्तः कश्चित् चतुर्थलोकः (भूराद्यान् चतुरोलोकान् पूर्ववत् समकल्पयत् । इति वि, पु) इति । तथा अनेनैव तैत्तिरीय-मन्त्रेण तदेव समर्थ्यते इति । तथाहि—

"आत्मनः पृथिवीं सन्तनु, पृथिव्या अन्तरिक्षं सन्तनु, अन्तरिक्षात् दिवं सन्तनु, दिवः सुवः सन्तनु ।२५५४ तैः ब्रा

अतएव पृथिवी, अन्तरीक्षं, दिव्, तथा, सुवः, परस्परं स्वतन्त्रं स्थानमिति । तत्र पृथिवी—भारतवर्षं भूः; अन्तरीक्षं—भुवः (तुरुष्कपारस्यापोगस्थानं), दिव् द्यौः (अत्र ऋषिः प्रमादात् द्योदिवोः साम्यं मत्वा, विवक्षया दिवं प्रयुक्तवान् । परन्तु दिव् नहि, द्यौरिव स्यात्) ततः सुवः ।

सुवः किं ? वाजसनेयाः स्वः (स्वर्गं) "सुवः" (सुवर्गं Heaven) इति उच्चारयन्ति, लिखन्ति च । तेन तैत्तिरीयोपनिषदपि उक्तवती—

भूरिति वा अयं लोकः, भुव इत्यन्तरीक्षं, सुवरित्यसौ लोकः ६७५ । तथाहि—

भूरित्याह प्रजा एव तद्यजमानः सृजते, भुव इत्याह, अस्मिन् लोके प्रतितिष्ठति। सुवरित्याह सुवर्ग एव लोके प्रतितिष्ठति। त्रय इमे लोकाः।२८। तैः ब्राः।

अतएव स्वरेव (द्यौरेव) सुवः सुवर्गोवा। परन्तु यदा ब्रह्मादयो देवा दिवं गत्वा तां स्वरिति संज्ञया समलञ्चक्रुः, स द्यौश्च "पिता" (पितृलोकः Father land) इति संज्ञामाप, तदा दिवपि "सुवर्गः" इति संज्ञां भेजे। तेन ब्रह्मा स्वराट् (विष्णु पु). यमः सोमश्च इन्द्रश्च पितृराट् इति। उक्तञ्च—

स्वर्द्वा अगन्म, अमृता अभूम प्रजापतेः प्रजा अभूम।२८।१८अ यजुः।

स्वर्गो वै लोको ब्रध्नस्य विष्टपम्।४४२पृ ऐः ब्राः

सुवर्गं लोकं नाकस्य पृष्ठं ब्रध्नस्य विष्टपम् अगमम्।११०८पृ, तैः ब्राः

इत्थं ब्रह्मणोविष्टपे (दिवि), स्वर्गत्वं गते सति, पश्चात् सापि दिव् पृथिव्या नूतनोत्तरसीमा (काष्ठा) बभूव। अतएव उक्तम्—

सुवर्गो वै लोकः काष्ठा।१४१ तैः ब्राः

पूर्वं तावत् इलावृतवर्षम् उत्तरवेदी पृथिव्या उत्तरसीमा आसीत्, ततो दिवि उत्पन्नायां सा दिव् (सुवर्गः) काष्ठा उत्तरसीमा अभूत्।

अथ दिव उत्पत्तिः।

उत्तरसमुद्रगर्भं इलावृतवर्षस्य उत्तरप्रान्ते यदात्वाल आसीत्, काले स स्थले परिणतो भूत्वा द्युलोके परिणतो बभूव। तदुत्पत्ति माह ऋग्वेदः—

ऋतं च सत्यं च अभीद्धात् तपसोऽध्यजायत।
ततो रात्री अजायत, ततः समुद्रो अर्णवः॥१

अथ हलायुधमतम्......"अस्य अघमर्षणस्य व्याख्यान माचरितुं हृत्कम्पो जायते। यतः सर्ववेदसारभूतोऽत्यन्तगुप्त च अयं मन्त्रः। अस्य यत् पाठमात्रस्य अर्थबोधसौगम्यं नास्ति, ब्राह्मणनिरुक्तादिकञ्च नास्त्येव। इत्थम् एतदीय व्याख्यानानुगुणं कमपि उपायम् अप्राप्य यदेतस्य स्वरूपोपलम्भमात्रेण व्याख्यान माचरणीयं तदतीव साहसम्।१०२। योगियाज्ञवल्क्येन तु—

तनुभूताऽपि सृष्टिस्थित्युत्- पत्तिप्रलयं तथा।
सूक्तेऽस्मिन् व्याकृत मेतत्तु तत्त्वमाचार्य मेव वै॥

इति वचनात् सृष्टिस्थितिप्रलयार्थता अस्य प्रतिपादिता। पुराणमहाभारतादिष्वपि तु सृष्टिस्थितिप्रलयप्रतिपादकार्थग्रन्थभागाः समासते। तेषाञ्च अवलो-

तत्कीर्त्तनेन च महाफललाभः प्रतिपादितः। तदेतत्सकल-वेदसारभूतस्य सृष्टिस्थितिप्रलयप्रतिपादकाघमर्षणमन्त्रस्य स्नानादिना तत्तत्प्राग्लिखित नाना मुनिवचनप्रतिपादितं फलभूयस्त्वमुपपन्नमेव। किञ्च अस्मिन् ग्रन्थे सकलकर्म्म-काण्डोचितमन्त्रभागव्याख्यानस्यैव मुख्यत्वात्। यद्यपि अत्र सारभूतमन्त्रस्य एव व्याख्यानं न क्रियते, तदा अस्य ग्रन्थस्य असङ्गतता भवति। एतादृशदोषभय-मात्रेण स्वप्रतिभानुरूपमन्त्रव्याख्यान मेतत् क्रियते। यथा—

१। अथ हलायुधव्याख्या......ऋतञ्च सत्यञ्च इति परब्रह्म उच्यते। तथाच श्रुतिः स्मृतिश्च—ऋत मेकाक्षरं ब्रह्म,सत्यं ज्ञानमनन्तं ब्रह्मइति। आसीदित्यध्याहार्य्यं, तेन अय मर्थः—ऋतञ्च सत्यञ्च परं ब्रह्म आसीत्। एतेन महाप्रलयावस्था प्रतिपादिता। महाप्रलयसमये केवलं परं ब्रह्ममात्रमासीत् इत्यर्थः। ततस्तदनन्तरं महाप्रलयावस्थायामेव रात्रि रजायत रात्रिश्च समुत्पन्ना, सकलम् अन्धकारमय मासीत् इत्यर्थः। तथाच स्मृतिः—

आसीदिदं तमोभूतम् अप्रज्ञातमलक्षणम्।

तदनन्तरं महाप्रलयावसानसमये सृष्ट्यारम्भे तपसः अदृष्टबलात् समुद्रः अजायत। किम्भूतः समुद्रः? अर्णवः अर्णः—पानीयं तदस्य अस्तीति। अर्णसः सलोपश्च इति वप्रत्ययः सलोपश्च। अर्णवः पानीययुक्तः समुद्रः समजायत इत्यर्थः। प्रथमतः सकलसंसारसृष्टि-निमित्तजलराशि रुत्पन्न इत्यर्थः। तथाच स्मृतिः—

अप एव ससर्जादौ तासु वीज मवासृजत्। इति

ततस्तदनन्तरं समुद्रात् अर्णवात् धाता स्रष्टा अजायत, किम्भूतो धाता? मिषतः अप्रकटीभूतो विश्वस्य वशी प्रभुः। महाप्रलयेन विलुप्तस्य अस्य त्रैलोक्यस्य निर्म्माणे प्रभु रित्यर्थः। स धाता यथापूर्वं यथाक्रमं सूर्य्याचन्द्रमसौ अकल्पयत् निर्म्मितवान्। किम्भूतौ सूर्य्याचन्द्रमसौ? अहोरात्राणि विदधत् अहोरात्रान् कुर्व्वाणौ, सूर्य्य एव दिवसं करोति, चन्द्र एव रात्रिं करोति। ततः सूर्य्यचन्द्रयो रुत्पत्त्यनन्तरं संवत्सरः अजायत समुत्पन्नः। सूर्य्यचन्द्रोत्पत्त्यनन्तरं रात्रि-दिवसविभागः अभवत्। रात्रिदिवसविभागे सति संवत्सरव्यवस्था भवति इत्यर्थः। अथानन्तरं—

दिवञ्च पृथिवीञ्च अन्तरीक्षञ्च स्वश्च स्वर्गञ्च।

एतान् लोकान् स एव धाता अकल्पयत, कल्पितवान्। चराचरात्मकसकललोकान् एव स धाता सृष्टवान् इत्यर्थः। अत्र स्वःशब्देन नक्षत्रलोकोपरिस्थ स्वर्गलोक उच्यते।

दिव्‌शब्देन तु तदूर्ध्वस्थ महर्लोकादिलोकचतुष्टयम्।

तदित्थ मनेन मन्त्रेण सृष्टिस्थितिप्रलयाः प्रतिपादिताः। विदधत् इति द्विवचने एकवचनम्। इत्यघमर्षणमन्त्रव्याख्यानम्। १०५ ष्ठ

अथ सायणभाष्यम्······ऋत मिति सत्यनाम, ऋतं मानसं यथार्थसङ्कल्पनं, सत्यं वाचिकं यथार्थभाषणं, चकाराभ्याम् अन्य-दपि-शास्त्रीयं धर्मजातं च समुच्चीयते। तत्सर्व्वम् अभीद्धात् अभितमात् ब्रह्मणा पुरा सृष्ट्यर्थं कृतात् तपसः अधि अधि उपर्य्यर्थे इत्यर्थः। उपरि अजायत उदपद्यत।

"तपस्तप्त्वा इदं सर्व्वं मसृजत" इति श्रुतेः।

तपश्च अत्र स्रष्टव्यपर्य्यालोचनलक्षणं—"यस्य ज्ञानमयं तपः"—इति श्रुत्यन्तरात्। अभिपूर्व्वात् इन्धेः कर्म्मणि निष्ठा।

यद्वा अभीद्धात् अभितः प्रकाशमानात् परमात्मनो मायाधिष्ठानरूपात् उपादानभूतात् ऋतं सत्यं च अजायत। ततः तस्मादेव ईश्वरात् रात्री उपलक्षणमेतत् अह्नोपि, अहश्च रात्रिश्च अजायत। ततः तस्मादेव ईश्वरात् अर्णवः अर्णसा उदकेन युक्तः समुद्रश्च अजायत। समुद्रशब्दः अन्तरीक्षोदध्योः साधारण इति। अभिमतार्थस्य प्रकाशनाय अर्णवशब्देन विशेष्यते।

दत्तजानुवाद······प्रज्वलित तपस्याहइते ऋत अर्थात् यज्ञ, एवं सत्य जन्मग्रहण करिल। परे रात्रि जन्मिल, परे जलपूर्ण समुद्र।

अथ स्वाभिमतम्······हलायुधः खलु मन्त्रस्य प्रकृतार्थं मबुद्धा सरलेन मनसा यत् किमपि व्याचख्यो इति।—अस्मिन् मन्त्रे केनचित् ऋषिणा समुद्रस्य (अन्तरीक्षस्य) तथा ऋतापरनाम्नः सत्यलोकस्य तथा रात्रिजनपदस्य च सृष्टिरुत्पत्तिरुक्ता, नतु अघमर्षण इति। सतु मन्त्रसमाहर्त्ता मात एव। अत्र तेषां जनपदानां स्थिति संयश्च न उक्तमिति वेदविरुद्धत्वात्। यतः सृष्टेरनन्तरं महाप्रलयो बभूव इति न वेदमत मिति। अश्वमेधयज्ञावभृते अस्य विनियोगः स्यात्, अयमपि ऋषीणां वृथा विनिर्द्दिश इति। अश्वमेधेन सह एतस्य न कोपि सम्बन्ध इति। अयं मन्त्रः सामवेदीयसन्ध्यामन्त्र

इदमपि न। हलायुधस्य तिरोभावादनन्तरं केऽपि पुरोहिता मन्त्रमेनं सन्ध्या विधौ योजितवन्त इति। अस्य मन्त्रस्य देवतापि न कापि आसीत्,नायं कस्यापि देवस्य स्तुतिमन्त्र इति, परन्तु एष मन्त्रस्तु केवलं भौगोलिकव्यापारपर इति। "भाववृत्तः" इत्थं कोपि देवो जगति नासीत् नास्त्येव, नागमिष्यति च इति।

ऋतम्—एकाक्षरं ब्रह्म, सत्यं—ध्यान मनस्तं ब्रह्म।

अत्र इति न। परन्तु अत्र "ऋतम्" ऋतलोकः, "सत्य" सत्यलोक इति। "रात्री" अपि अन्यपदार्थो न, समुद्रश्च अत्र सागरो न, परन्तु अन्तरीक्ष-लोक इति।

धाता समुद्रात् अजायत।

इति च न, यतः स स्वयम्भूस्तस्य जन्म नास्ति, जन्मस्थानमपि नासीत्। एष धाता कश्यपात्मजः त्वष्टा ब्रह्मा (३।१८०।१०म)। "मिषतः" अप्रकटीभूतस्य न, परन्तु "पश्यतः," "सूर्याचन्द्रमसौ" अपि एतौ निशाकरदिवाकरौ न; परन्तु देवताद्वयमिति। उक्तञ्च महाभारते—

अन्यौ तु खलु देवानां सूर्याचन्द्रमसौ स्मृतौ।
अन्यौ दानवमुख्यानां सूर्याचन्द्रमसौ तथा॥ २७।६४अ-आदि

अयं सूर्यस्तु ब्रह्मानुजः कश्चित्, सतु सावर्णिमनोः पिता, चन्द्रस्तु अत्रिनन्दनः, सतु, बङ्गनाम् ब्राह्मणानां यवनयादवादीनां क्षत्रियाणाञ्च पूर्वपितामह इति। रात्रि रेषा जनपदः (धूमोरात्रिः २५।८ गीता), अहश्च जनपद विशेषः (अग्निर्ज्योतिरहः शुक्लः २४), "अहर्वै देवा अश्रयन्त रात्री मसुराः"। ४४५पृ-ऐः ब्रा। संवत्सरश्च जनपदविशेष इति। अत्र सायणोऽपि यत् व्याख्यातवान् तदप्यतीव भ्रष्टमिति।

प्रकृतार्थवाहिनी······अभीद्धात् अत्युत्कटात् तपसः सृष्टिपर्य्यालोचनाया अर्णवः अधि अर्णवस्य उपरि अर्णवगर्भे उत्तरमहासागरगर्भे ऋतञ्च सत्यञ्च ऋतापरनामा सत्यलोकः अजायत उदपद्यत। यदुक्तं मैतरेयेण—

ऋतम् इत्येव सत्यम्, ऋतजा इत्येव वै सत्यजाः ४८६ पृ। ऋतसत् इत्येव वै सत्यसत् ४८५। ऐः ब्राः।

ततस्तदनन्तरं रात्री रात्रिनामा कश्चित् जनपदः अजायत। तत स्तद-नन्तरं, (परन्तु भ्रान्तिरेषा ऋषेः, यतः ऋतरात्रीजनपदयोः पूर्वमेव अन्त-

रीक्षस्य उत्पत्तिर्बभूव, तस्य तृतीयलोकत्वात्) अर्णवः अधि पश्चिममहासागरगर्भे समुद्रः अन्तरीक्षलोको भुवर्लोकः अजायत इति।

वङ्गानुवाद—तत्पर द्यावापृथिवीर उत्पत्तिर बहुकाल परे पश्चिमसमुद्रे अन्तरीक्षलोकेर उत्पत्ति हइल (तुरुष्क पारस्य आफगानिस्थान), अनन्तर उहारओ बहुकाल परे, परमेश्वरेर उत्कट तपस्याहइते (इहाओ ऋषिर मिथ्या कल्पनामात्र) उत्तरमहासागरगर्भे ऋतापरनामा सत्यलोक ओ रात्रि जनपदेर (तपोलोकेर पूर्वांश येखाने दैत्यदानवेरा एकदा वास करितेन) उत्पत्ति हइयाछिल। तथाहि—

समुद्रात् अर्णवादधि संवत्सरो अजायत।
अहोरात्राणि विदधत्, विश्वस्य मिषतो वशी॥ २।१८०।१०म

अत्र सायणभाष्यम्……अर्णवात् समुद्रात् सृष्टात् अधि ऊर्द्धं संवत्सरोपलक्षितः सर्व्वः कालः अजायत। श्रूयते हि—'सर्व्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि कला मुहूर्त्ताः काष्ठाश्च" इति। स च ईश्वरः अहोरात्राणि एतदुपलक्षितानि सर्व्वाणि भूतजातानि विदधत् कुर्व्वन् सृजन्, मिषतो निमेषादियुक्तस्य विश्वस्य सर्व्वस्य प्राणिजातस्य वशी स्वामी भूत्वा वर्त्तते।

दत्तजानुवाद……जलपूर्ण समुद्रहइते संवत्सर जन्मिलेन। तिनि दिन रात्रि सृष्टि करितेछेन। तावत लोके देखितेछे।

स्वाभिमतम्……एतौ भाष्यानुवादौ अपि अतीव कलुषितौ इति। संवत्सरः, अहः, रात्रिश्च कालबोधकाः केचित शब्दाः सन्त्येव। परन्तु ते जन्यपदार्था नश्वराश्च न। सूर्य्यस्य उदयात् अस्तगमनसमयपर्य्यन्तः कालो दिवसः, अस्तकालो रात्रिः, द्वादशमासात्मकः कालः संवतसर इति। परन्तु ते समुद्रगर्भे न समुत्पद्यन्ते। गीताप्रश्नोपनिषदैतरेयादिषु एतयो रहोरात्रजनपदयो र्भूरि प्रयोगो दृश्यते। तत्र चन्द्रस्य जनपदौ संवत्सरौ इति। उक्तञ्च—

संवत्सरो वै प्रजापतिः, तस्य अयने दक्षिणञ्च उत्तरञ्च। तत् ये ह वै तदिष्टापूर्त्ते इत्युपासते,ते चान्द्रमस मेव लोकम् अभिजयन्ते। ८पृ प्रश्नोपनिषत्

चन्द्रस्य द्वौ जनपदौ, तयोरेको दक्षिणसंवत्सरः मेरुपर्वतसानुसंस्थः आदिसंवत्सरः, तथा अपरश्च उत्तरसमुद्रे उत्पन्नः उत्तरसंवतसरः, अस्मिन् मन्त्रे तस्यैव उत्पत्ति र्विहता इति। उक्तञ्च ऐतरेयब्राह्मणेन तैत्तिरीयेण च—

द्वादश वै मासाः संवत्सरः, संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेव भाभीराप्नोति । ६०पृ । द्वादशमासाः संवत्सरः संवत्सरः खलु वै देवानां पुः । २११पृ। तथाहि कृष्णयजुः—संवत्सरः खलु वै देवानामायतनम् एतस्मात् वै भायतनात् देवा असुरान् अजयन् । ८८पृ

अतएव संवत्सरशब्दस्य द्वावेवार्थौ, पूर्णवत्सरः तथा प्रजापते चन्द्रमस आयतनविशेषश्च । तथाहि—तैत्तिरीयब्राह्मणम्—

संवत्सरो वै सोमः पितृमान् । २८७ पृ

संवत्सरस्य आयतनस्य अधिपतिरसौ सोम चन्द्रो, यः सोमः पितृमान् पितृलोकस्यापि अधिपतिरासीत् । कोऽयं तर्हि संवसरो लोकः ? तदुक्तं—

मह इति चन्द्रमाः । १८ पृ, प्रश्नोपोनिषत्

चन्द्रमसो यो लोकः उत्तरसंवत्सरः स नाम्ना महर्लोक इति । अतएव अत्र संवत्सरः पूर्णवत्सरो न । परन्तु उत्तरसंवत्सरलोक चन्द्रस्य इति । पितृलोकस्य दक्षिणे यः संवत्सरः स खलु दक्षिणसंवत्सर इति । यदाह भास्कराचार्य्यः—विधूर्द्ध्वभागे पितरो वसन्ति ।१३-७म-सि, शिरोमणि

चन्द्रस्य ऊर्द्ध्वभागे दक्षिणसंवत्सरस्य उत्तरस्यां दिशि पितृलोको मह्ना इति ।

तर्हि अहर्ज्जनपदो रात्रिजनपदश्च कौ ? कोवा तयोरधिपतिः ? तदुक्तम्—

अहोरात्रो वै प्रजापतिः, तस्य अहरेव प्राणः, रात्रिरेव रयिः । १५पृ ! प्रश्न

अथ उत्तरेण तपसा ब्रह्मचर्य्येण श्रद्धया विद्यया आत्मानमन्विष्य आदित्य मभिजयन्ते । एतत् वै प्राणाना मायतनम् एतदमृतम् अभयमेतत्, परायण मेतत्, एतस्मात् न पुन रावर्त्तन्ते इत्येष निरोधः ।११पृ प्रश्न

एतौ अहर्जनपदः, रात्रिजनपदश्च मिलित्वा तपोलोको बभूव, तत्र रात्रौ असुराः (वस्तुतस्तु दैत्यदानवाः) आसन्, तान् विधूय सूर्य्यदेव उभयजनपदयो राधिपत्यं जग्राह ।

अतएव अहोरात्राणि "भूतजातानि" दिनरजन्यौ च न । एवं "मिषतो" निमेषादियुक्तस्य इति च न, परन्तु "पश्यतः" इति । यथा—महाभारतम्—हैरथे यत्र कर्णेन धर्म्मराजो युधिष्ठिरः संशयं गमितो युद्धे मिषतां सर्वधन्विनां । आदिः२७४-२श्व

तत्र नीलकण्ठः······मिषतां पश्यताम् । तथाहि कुमारे—

जातोवेदोमुखात् मायी, मिषता माच्छिनत्ति नः ।४६-२स

तत्र मल्लिनाथः……मिषतां पश्यतां पश्यत्सु सत्सु। अतएव अस्य प्रकृतार्थं एव अयम्—

प्रकृतार्थवाहिनी……अर्णवात् जलपूर्णात् समुद्रात् उत्तरमहासागरादधि उत्तरमहासागरगर्भे संवत्सरः संवत्सराख्यः कश्चित् जनपदः चन्द्रस्य मण्डलौक इति यावत् अजायत उपद्यत, वशी स्वाधीनो यदृच्छया यत् किमपि कर्त्तुं समर्थः परमेश्वरः तस्मिन्नेव उत्तरसमहासागरगर्भे मिषतः पश्यतः विश्वस्य सर्व्वस्य जनस्य प्रत्यक्षमिति भावः अहोरात्राणि अहोरात्रनामानि स्थानानि अहर्जनपदं रात्रिजनपदञ्च विदधत् अदधत् सृष्टवान्।

बङ्गानुवाद—परमेश्वरेर सेइ कठिन तपस्या हइते प्रभूतजलमय उत्तरमहासागरगर्भे संवत्सरनामक जनपद (मण्डलौक, रम्यकवर्ष वा दक्षिण साइबिरिया) उत्पन्न हय एवं सेइ वशी परमेश्वर सकलेर चक्षेर सामने उक्त महासागरगर्भे अहः ओ रात्रिनामक दुइटी जनपदेर सृष्टि करेन।

सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयत्।
दिवञ्च पृथिवीञ्च अन्तरिक्षमथो स्वः॥३

तत्र सायणभाष्यम्……सूर्य्याचन्द्रमसौ कालस्य अङ्गभूतौ दिवञ्च पृथिवीञ्च अन्तरिक्षञ्च इत्थं त्रिभुवनं, स्वः, स्वःशब्दः सुखवाची दिवो विशेषणम्। सुखरूपां दिवं, तदेतत् सर्व्वं धाता विधाता यथापूर्व्वं पूर्व्वस्मिन् काले अकल्पयत् सृष्टवान्। तथा एव आगामिनि अपि कल्पे कल्पयिष्यति इत्यर्थः।

दत्तजानुवाद……सृष्टिकर्त्ता यथासमये सूर्य्य ओ चन्द्रके सृष्टि करिलेन एवं स्वर्ग, पृथिवी ओ आकाश सृष्टि करिलेन।

स्वाभिमतम्……एतौ अपि भाष्यानुवादौ अतीव स्खलनबहुलौ इति। एतौ सूर्य्याचन्द्रमसौ द्वौ देवौ, तयोरेकौ ब्रह्मानुजविशेषः, अपरश्च अत्रिनन्दनः, बहुब्राह्मणक्षत्रिययवनानां (ग्रीकादेश:) पूर्वपितामह इति। "स्वः" इति पदं दिवो विशेषणं न।

प्रकृतार्थवाहिनी……धाता कश्यपस्य ज्येष्ठः पुत्रः सुरज्येष्ठो ब्रह्मा (न तु विधाता परमेश्वरो वा) सूर्य्याचन्द्रमसौ स्वकनिष्ठभ्रातरं महर्षिसूर्य्यदेवं चन्द्रमसम् अत्रिनन्दनं स्वसुतातं च यथापूर्व्वं पूर्व्ववत् अकल्पयत् एतयोरुभयोः राज्यं कल्पितवान् सम्पादितवान्; एतयोः चन्द्रसूर्य्ययोः यथा—आदिसर्गे

यत्र मेरुपर्व्वतसानौ पृथक् पृथक् राज्यम् आसीत् तथैव अस्यामेव दिवि द्युलोके सूर्य्यस्य अहोरात्राख्यं चन्द्रस्य संवत्सराख्यं जनपदं विहितवान्। एवं सति किं स्यात्? पूर्व्वं सर्व्वादौ द्यावापृथिव्यौ आस्तां, ततः पश्चिम-सागरे समुद्रस्य अन्तरीक्षस्य उत्पत्तौ लोकसंख्या त्रिसंख्यौ बभूवुः—

भूः—भुवः—स्वः

ततः उत्तरमहासागरे सत्याहोरात्रसंवत्सरलोकानामुत्पत्तौ ते चत्वारो जनपदा मिलित्वा दिव् द्युलोको वा समपद्यत। अतएव ऋषिणा विहितम्—

दिवञ्च पृथिवीं च अन्तरीक्षमथो स्वः अकल्पयत्

धाता एतत् लोकचतुष्टयं यथाक्रमेण दिव्, पृथिवी, अन्तरीक्ष, स्वः इति नामचतुष्टयेन प्रख्यापितमकरोत्।

एइ प्रकारे पश्चिमसमुद्रे समुद्र वा अन्तरीक्ष एवं उत्तरमहासागरे सत्य, अहः, रात्रि ओ संवत्सरजनपदेर उत्पत्ति हइले सुरज्येष्ठ ब्रह्मा समुद्रेर नाम अन्तरीक्ष एवं सत्य, अहः, रात्रि, ओ संवत्सर जनपदेर नाम दिव् वा द्युलोक राखिलेन। किन्तु समुद्र दिवेर पूर्व्वे जन्मिया छिल, एजन्य प्रथमे भूः—भुवः—स्वः एइ तिन लोक वा त्रिभुवन नाम बहुदिन चलिते थाके, परे दिवेर उत्पत्ति हइले उहा लइया लोकसंख्या चारिटी हय। यथा—

४। दिव्, २। पृथिवी (भूः), ३। अन्तरीक्ष, (भुवः) ओ १। स्वः।

तत्पर तिनि चन्द्र ओ सूर्य्यके आदिस्वर्गहइते नूतन दिव् वा द्युलोके लइया याइया ताँहादिगके नूतन राजत्व प्रदान करेन।

अथ त्रिदिवादीनां विशेषविवरणम्।

या दिव् (दिव्+सु=दिव्, द्यौ+सु=द्यौ रिति) तदेव पिष्टपं द्युलोकश्च इति। तदेव पिष्टपं विष्टपं (पोवः—हेमचन्द्रः)। सा दिव् अहः, तपः, सत्यम् इति त्रिधा विभक्ता भूत्वा त्रिदिव मिति नाम्ना प्रसिद्धाऽभूत्। इमान्येव लोकविष्टपा। ५।८०।८८। तानि साम्प्रतं केन केन नाम्ना प्रसिद्धानि?—

अहः (रम्यकवर्षं दक्षिण साइबिरिया),

तपः (हिरण्मयवर्षं—मध्यसाइबिरिया), सत्यं—उत्तरकुरुवर्षं—उत्तरसाइबिरिया। (किष्किन्ध्याकाण्ड—४२ सर्गशेष)। त्रिदिव मिदम् अतीवप्रामालोकसम्पन्नमासीत्, तेन तत् रोचनसंज्ञया समलङ्कृतं बभूव। उक्तञ्च—

ये नाकस्याधि रोचने दिवि देवास आसते। ६।१९८।१म दिवि रोचना ददृशे। ५।६१।२म

अमी ये देवाः स्थन त्रिष्वा रोचने दिवः।५।१०५।१म
रोचन्ते रोचना दिवि।५।२२ अ-यजुः
विरुक्मता दुर्नशा रोचनानि।८।५६।३म
इन्द्र च रोचना दिवो दृढ़ानि।८।१४।८म
अहं दूरे पारे रजसो रोचना अकरम्।६।४८।१०म

ये उत्तरकुरवो वानरगम्याः, नरगम्याश्च (१२०अ-आदिपर्व), ये च उत्तर-महासागरवेलाविलासिनश्च, अतो तेषां पादगम्यानां पारलौकिकत्वं न सङ्गच्छते। समुद्रप्रभवत्वञ्च तेषां पारलौकिकत्वं निरसयति। त्रिदिवं साइबिरियाजनपद इति कथम्? इति तु मानचित्रेण सह सम्मेलनात् पुराणसिद्धान्तशिरोमणिवचनाच्च गम्यते।

"स्वर्गो वै लोको नाकः" ।८।२।३।२४ इति श्रुतिः।१५।१७अ-यजुर्भाष्यम्।

अतएव स्वर्गः स नाकोपि गगनं न। तर्हि कथमत्र नाके नक्षत्र-निवासः? पिपेश नाकं स्तृभिर्दमूनाः।१।६८।१म)। इतरत्र नाके नक्षत्राख्या देवा एव न्यवसन्, अतएव तस्य गगनत्वं निरस्यते। एष स्तृशब्दो यदि जड़नक्षत्रवाची स्यात्, तर्हि ब्रूमः ऋगियं भ्रान्तिपूर्णा इति। यथा एका दिव् त्रित्वं गता, तथा एकोपि नाको (द्यौः,), त्रित्वं गत इति। यत आदिदेवलोकात् देवा अन्ययो रभिनवजनपदयो र्हरिवर्षकिम्पुरुषवर्षयोरुपनिविष्टाः। तेन हेतुना हरिवर्षं (तातार), किम्पुरुषवर्षञ्च (तिब्बत) च नाकत्वं गते इति। इलावृतवर्षं (द्यौः) मुख्योनाकः, हरिवर्षकिम्पुरुषवर्षौ गौणनाकौ अतएव तानि इलावृतवर्षहरिवर्षकिम्पुरुषवर्षाणि त्रिनाका इति। उक्तञ्च—

त्रिनाके त्रिदिवे दिवः। लोका यत्र ज्योतिष्मन्तः।८।११३।८म

अथ त्रिदिवं—महस्तपः सत्यलोकाः, त्रिनाकस्तु चोहरिवर्षकिम्पुरुष-वर्षाणि (मङ्गलिया, तातार, तिब्बत)।

इत्थं—स्वः—नाकः, स्वः—द्यौः,।

तथा त्रिनाकाः पुनः "तिस्रोद्यावः", त्रयः पितरश्च अभवन्। कथं? स्वः—पिता, द्यौः पिता—अतएव त्रिनाकाः तिस्रो द्यावश्च त्रयः पितरः। यदुक्तञ्च—

तिस्रो द्यावः सवितुर्द्वा उपस्था, १।३५।१म
तिस्रो मातॄस्त्रीन् पितॄन्।१०।६४।१म

इत्थं त्रयः पितरस्तु पश्चात् आकाशत्रयत्वं गता इति। अथ अन्तरीक्षादीनामपि त्रित्वं दृश्यते वेदेषु—

त्रिरन्तरिक्षं सविता महित्वना, त्रीरजांसि परि भूस्त्रीणि रोचना।

तिस्रोदिवः पृथिवीस्तिस्र इन्वति, त्रिभिर्व्रतै रभि नो रक्षति त्मना ॥५।५२।४म

अस्मिन् मन्त्रे "त्रिरन्तरिक्षं"—इति पदेन तुरुष्कपारस्यापोगस्थानम् अवबोधितम्; त्रीरजांसि त्रिभुवनं, त्रीणि रोचना—त्रिदिवस्थानि त्रीणि प्रधाननगराणि, तिस्रोदिवः—त्रिदिवमिति। "पृथिवीस्तिस्रः" इति वाक्येन—

तिस्रोभूमीः (तिस्रोमहीः) ८।१०२।१म

आर्य्यावर्त्त दक्षिणापथपूर्वोपद्वीपसनाथा भारतभूमिरेव अवबोधिता इति। अतएव अथर्ववेदे ऋषिणा उक्तञ्च—

त्रीन् नाकान् त्रीन् समुद्रान् त्रीन् ब्रध्नान् त्रीन् वैष्टपान् त्रीन् मातरिश्वनः,

त्रीन् सूर्य्यान् त्रातॄन् कल्पयामि ते।३७६ए ४र्थखण्ड—

त्रयो नाकाः—तिब्बततातारमङ्गाः, त्रयः समुद्राः (अन्तरीक्षाणि) तुरुष्कपारस्यापोगस्थानानि; त्रयो ब्रध्नाः स्वयम्भुलोकपितामहसुरज्येष्ठा ब्रह्माणः; त्रयोवैष्टपाः—त्रिदिवं त्रिपिष्टपं वा; त्रयो मातरिश्वानः—वायुनामानो देवाः, त्रयः सूर्य्याः सूर्य्यनामानोदेवाः।

अथ एतेषां लोकचतुष्टयानां (दिव् भूः—भुवः स्वः) मध्ये किम्पुरुषवर्षादारभ्य उत्तरकुरुपर्य्यन्तं स्वर्गाख्यं स्थानं"पञ्चामृतानि"इति संज्ञया समाख्यातम् बभूव स्वास्थ्यकरत्वात्, अमृतं—Sanatorium.। यत्र जना न अकाले म्रियन्ते तदमृत मिति। उक्तञ्च

अस्मिन् दिवः अमृताः अकृण्वन् ।१०।७२।१म

प्रथमस्य अमृतानां ।२।२४।१म

शृण्वन्तु विश्वे अमृतस्य पुत्राः ।१।१३।१०म

एषां पञ्चामृतानां विवरणं सविस्तारं छान्दोग्योपनिषदि विवृत मासीत्।

अथ सप्त भुवनानि।

सप्त देवलोका एव सप्त भुवनानि। ते तु—भूः—भुवः—स्वः—महः, तपः, सत्यं जनश्च इति सप्त व्याहृतय इति। उक्तञ्च—

भूराद्याश्चैव सत्यान्ताः सप्त व्याहृतयश्च याः।

लोकास्त्र एव सप्त ते ऊर्ध्वं परि संस्थिताः॥ ४४५ ब्राह्मणसर्वस्वं

परन्तु एते शिकारस्थितहण्डिकावत् उपर्य्युपरि गगनविलम्बिनो न, परन्तु ते ऊर्द्धाधोभावेन उत्तरदक्षिणादिभावेन भूतले संस्थिताः इति। तत्र—

१। भूः—भारतवर्षं। २। भुवः—अन्तरीक्षं—केतुमालवर्षं तुरुष्कपारस्या-योगस्थानं, ३। स्वः—किम्पुरुषवर्षं हरिवर्ष—इलावृतवर्षम्—(तिब्बततातार-मङ्गः) ४। महः—रम्यकवर्ष—दक्षिण साइविरियाः, ५।तपः—हिर-ण्मयवर्ष—मध्यसाइविरिया, ६। सत्यं—उत्तरकुरुवर्ष—उत्तर साइविरिया (ब्रह्मलोकः—परमव्योम), ७।जनः—भद्राश्ववर्ष—वर्त्तमानचीनदेश इति।—कथमेतत्?—यदाह अथर्ववेदः—

उदङ् जातो हिमवतः स प्राच्यां नीयसे जनम्।

हे कुष्ठ! त्वं हिमवतो हिमालयपर्वतस्य उदङ् उत्तरस्यां दिशि जातः सन् पश्चात् हिमालयस्य प्राच्यां पूर्वस्यां दिशि जनं जनलोकं नीयसे।

हिमालयस्य प्राच्यां चीनदेशं विना जनपदान्तरं नास्ति, अतएव जनलोक एव चीनदेशो भद्राश्ववर्षं वा।
अथर्ववेदे यजुर्वेदे च एष जनपदस्तु "जानराज्यम्" इति नाम्ना प्रसिद्ध इति। उक्तञ्च—

महते जानराज्याय।४०—८म यजुः।

उवटमहीधरौ तु एतस्य मिथ्या व्याख्यां कृतवन्तौ।—महामतिसुइरः, महान् अक्षयकुमारदत्तः, विश्वकोषश्च अमुष्य अथर्ववेदमन्त्रस्य मिथ्यानु-वादं चक्रुरिति। यत् भवतु एते सप्तलोका एव सप्त भुवनानि सप्त स्वर्गाश्च इति। यदुक्तं मत्स्येन महता—

भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः।

तपः सत्यञ्च सप्तैते—देवलोकाः प्रकीर्त्तिताः॥

कथं? यतो दर्शदेवा एषु लोकेषु आगताः अनेकप्रनिविष्टा इति। तत्र एते सप्तदेवलोका एव नव-वर्षेषु विभक्ता इति। तैरेव एष कामपीयो (Asia) महाजनपदोऽजायत इति।

अथ चतुर्द्दश भुवनानि।

सप्त भुवनानि, तथा सप्त पातालानि मिलित्वा चतुर्द्दशभुवनं घटितं। तानि सप्तपातालानि तु इमानि—

अतलं वितलं चैव सुतलञ्च तलातलम्।
महातलञ्च विख्यातं तस्योद्ध्र्वं रसातलम्॥ पाद्मे पातालखण्डे—१।२।१।

एतेषां नामव्यतायार्थक्यं पुरस्तादिषु द्रष्टव्यं। अतलम् उत्तरामेरिका, तलातल।

अतलान्तिकमहासागरस्य नाम समागतमिति। रसातलन्तु "पराटागणिया" इति—तस्य जनपदस्य वासुकिरेव नागराजः अधिपतिरासीत्। तेन पौराणिकैरुक्तं वासुकि रमन्तनागः, पृथिव्याः सर्वनिम्ने आस्ते ।

तर्हि कथं ऋषिभिः अतीव प्राक्तनानां मिश्रदेशादीनां नाम न गृहीत मिति। मिश्रदेशसनाथ आफ्रिकाजनपदस्तु अतीव सद्यः प्रसुतः, साहारा मरुदेशस्तस्य प्रमाण मिति। वैदिकसाहित्ये तु केवलं हरियूपीया (Europe) महाजनपदस्य नामनिर्देशो दृश्यते।

वधीदिन्द्रो वरशिखस्य शेषः, हरियूपीयायां ।५।२७।६म

तत्र सायणः······हरियूपीयायां—हरियूपीया नाम काचित् नदी,—काचित् नगरी वा ।

परन्तु व्याख्येय मतीव असाधीयसीति। वस्तुतस्तु एतस्यैव शब्दस्य विकारात् Europe शब्दोव्युत्पादित इति। यथा—

हरियूपीया—घरियूपीया—Europea—Europa(L)—Europe.

मोक्षमूलरेण यदुक्तं मेध्यशब्दात् मज्दा (अहुरो मज्दा), उर्व्वगोशब्दाच्च Europe शब्दः समागतस्तन्न। अनेनैव ध्येयं सायणादिभ्यः पाश्चात्याः कीदृक् समधिकभाषातत्त्वविद्यापारदर्शिन आसन् इति। अयमेव हरियूपीया जनपदः पञ्चदश भुवन मिति। उक्तञ्च—

द्यावापृथिवी पञ्चदश इति। ऋक्परिशिष्टं

एष द्यावापृथिवीशब्दोऽत्र खलु भुवनार्थे प्रयुक्त इति वयं मन्यामहे। सप्तभुवनानि, सप्त पातालानि, तथा हरियूपीया, एतानि पञ्चदशभुवनानीति। अथ वैदिकानां—रुशियाप्रभृतिजनपदानामपि नामधेयं परिज्ञात मासीत्। यथा—

भद्रमिदं रुशमाः ऋणञ्चयस्य ।१२

ऋणञ्चये राजनि रुशमानाम् ।१४।२०।५म

रुशमं, शयावकं, कृपं ।१२।३।८म

यद् वा रुमे रुशमे शयावके कृपे ।२।४।८म

एते रुशमादयो जनपदा एव रुशियादय इति अनुमातुं शक्यते। रुमजनपदः किम्? एष इतालीदेशीयं रोमनगरम्, उत केतुमालवर्षस्थं रोमकपत्तनं तदेवम्। काम्बोजाः क्षत्रियाः खलु रोमकपत्तनात् इतालीदेशं गत्वा

तादृवरनदीतीरे रोमनगरस्य प्रतिष्ठां चक्रुरिति। अतएव एतत् "रुम" शब्दस्य रोमकपत्तन मिति, अथ पौराणिकानां सप्तद्वीपवृत्तान्तस्तु—भौमकाण्डे सविस्तारम् वक्ष्यते इति।

सा पृथिवी, उत्तमा पृथिवी द्यौ रिलावृतवर्षं न तु भूमण्डलं। साम्प्रतं यत्स्थानानि मङ्गलियातातारतिब्बतनाम्ना परिचितानि, तान्येव उत्तमपृथिव्यन्तर्गतानि, सा एव उत्तमापृथिवी जम्बुशाकादिसप्तद्वीपसनाथा इति।

सधस्थं किं ?

अथ बहुषु वेदमन्त्रेषु सधस्थशब्दो दृश्यते। किमेतत् ? वयं मन्यामहे यथा गोष्ठीशब्देन पाश्चात्यानां club (संलापस्थानं) इति बोधयति, तथा सधस्थमिति शब्दश्च तदेवावाबोधयत् इति।

परमात् सधस्थात् ।७।११।८म

अग्ने सदनं सधस्थे ।८।११।१०म

परमे सधस्थे ।१०।१६।१०म

तत्र सायणः......परमात् चित् उत्कृष्टादपि सधस्थात् सहस्थानात् द्युलोकात् हे अग्ने सधस्थे सहस्थाने। परमे सधस्थे उत्कृष्टे सधस्थे सहस्थाने।

अग्निं सधस्थे महति ।१८।११अ यजुः

तत्र महीधरः......सधस्थे सहस्थाने। उवटः—सधस्थे सहस्थाने पृथिव्यां वर्त्तमाने महति उत्कृष्टप्रदेशे।

अस्मिन् सधस्थे अधि उत्तरस्मिन् ।५४।१५अ

तत्र महीधरः......सधस्थे देवैः सह स्थितियोग्ये उत्तरस्मिन् रविलोके द्युलोके (अहोरात्रजनपदे),

द्रोणे सधस्थ मासदत् ।२६।२६अ,

तत्र महीधरः—सधस्थं सह सार्द्धं तिष्ठन्ति सोमो यत्र स सधस्थः।

सधस्थे—देवमनुष्याणां सह सोमपानस्थाने ।७२-१३अ यजुर्भाष्यम्

अतएव "सधस्थ" सहावस्थानं, सध सह तिष्ठति यत्र तत्—स्थानं गोष्ठी Club इति वा। तदेव परमशब्दयोगात् परमव्योम अवाबोधयदिति।

ॐ हरि रोम्।